शांतोराज्ञःसर्वमस्मैन्यवेदयत।शमीकवचनंघोरंयथोक्तंमंत्रिसन्निधौ गौरमुखउ शमीकोनामराजें
द्रविषयेवर्त्ततेतव।ऋषिःपरमधर्मात्मादांतःशांतोमहातपाः।तस्यत्वयानरव्याघ्रसर्पःप्राणैर्वियोजितः।अ
वसक्तोधनुष्कोट्यास्कंधेमौनान्वितस्यवै।क्षांतवांस्तवतत्कर्मपुत्रस्तस्यनचक्षमे।तेनशप्तोसिराजेंद्रपितुरज्ञा
तमद्यवै।तक्षकःसप्तरात्रेणमृत्युस्तवभविष्यति।तत्ररक्षांकुरुष्वेतिपुनःपुनरथाब्रवीत।तदन्यथानशक्यंच
कर्त्तुंकेनचिदप्युत।नहिशक्नोतितंयंतुंपुत्रंकोपसमन्वितं।ततोहंप्रेषितस्तेनतवराजहितार्थिना सूतउवा
च इतिश्रुत्वावचोघोरंसराजाकुरुनंदनः।पर्य्यतप्यततत्पापंकृत्वाराजामहातपाः।तंचमौनव्रतंश्रुत्वाव
नेमुनिवरंतदा।भूयएवाभवद्राजाशोकसंतप्तमानसः।अनुक्रोशात्मतांतस्यशमीकस्यावधार्य्यच।पर्य्य
तप्यतभूयोपिकृत्वातत्किल्बिषंमुनेः।नहिमृत्युंतथाराजाश्रुत्वावैसोऽन्वतप्यत।अशोचदमरप्रख्योयथा
कृत्वेहकर्मतत्।ततस्तंप्रेषयामासराजागौरमुखंतदा।भूयःप्रसादंभगवान्करोत्विहममेतिवै।तस्मिं
श्चगतमात्रेथराजागौरमुखेतदा।मंत्रिभिर्मंत्रयामाससहसंविग्नमानसः।समंत्र्यमंत्रिभिश्चैवसतथामंत्र
तत्ववित।प्रासादंकारयामासएकस्तंभंसुरक्षितं।रक्षांचविदधेतत्रभिषजश्चौषधानिच।ब्राह्मणान्मंत्रसि

द्वांश्च सर्वतोचैन्ययोजयत्। राजकार्याणितत्रस्थः सर्वाण्येवाकरोन्नृपः। मंत्रिभिः सहधर्मज्ञः समंतात्परि
रक्षितः। नचैनं कश्चिद्दारोढुं लभते राजसत्तम। वातोपिनिःसरंस्तत्र प्रवेशे विनिवार्यते। प्राप्ते चदिवसेत
स्मिन्सप्तमे द्विजसत्तम। काश्यपोभ्यागमद्विद्वांस्तं राजानं चिकित्सितुं। श्रुतं हि तेन तदभूद्यथातं राजसत्तमं।
तक्षकः पन्नगश्रेष्ठो नेष्यते यमसादनं। तं दष्टं पन्नगेंद्रेण करिष्येहमपज्वरं। तत्र मेर्थश्च धर्मश्च भवितेति वि
चिंतयन्। तं ददर्श स नागेंद्रस्तक्षकः कश्यपं पथि। गच्छंतमेकमनसं द्विजोभूत्वा वयोतिगः। तमब्रवीत्पन्नगें
द्रः काश्यपं मुनिपुंगवं। क्व भवांस्त्वरितो याति किंच कार्यं चिकीर्षति॥ काश्यप उ ॥ नृपं कुरुकुलोत्प
न्नं परिक्षितमरिंदमं। तक्षकः पन्नगश्रेष्ठस्तेजसाद्य प्रधक्ष्यति। तं दष्टं पन्नगेंद्रेण तेनाग्निसमतेजसा। पांड
वानां कुलकरं राजानममितौजसं। गच्छामि त्वरितं सौम्य सद्यः कर्तुमपज्वरं तक्षक उ अहं स तक्षको
ब्रह्मंस्तं धक्ष्यामि महीपतिं। निवर्तस्व न शक्तस्त्वं मया दष्टं चिकित्सितुं काश्यप उ अहं त्वं नृपतिं गत्वा
त्वया दष्टमपज्वरं। करिष्यामीति मे बुद्धिर्विद्याबलसमन्वितः॥ इत्यादिपर्वण्यास्तीके तक्षक उ
यदि दष्टं मयेह त्वं शक्तः किंचिच्चिकित्सितुं। ततो दष्टं मया दृष्टमिमं जीवय काश्यप। परं मंत्रबलं यत्ते तद्दर्शय यत

स्वचान्यग्रोधमेनंधक्ष्यामिपन्नगपतस्तेद्विजोत्तम काश्यपउ दशनागेंद्रवृक्षंत्वंयद्येतदभिमन्यसे।अ
हमेनंत्वयादष्टंजीवयिष्येभुजंगम सौतिरुवाच एवमुक्तःसनागेंद्रःकाश्यपेनमहात्मना।अदशद्वृ
क्षमभ्येत्यन्यग्रोधंपन्नगोत्तमः।सवृक्षस्तेनदष्टस्तुपन्नगेनमहात्मना।आशीविषविषोपेतःप्रजज्वालसमंत
तः।तंदग्ध्वासनगंनागःकाश्यपंपुनरब्रवीत्।कुरुयत्नंद्विजश्रेष्ठजीवयैनंवनस्पतिं॥ सौतिरुवाच॥
भस्मीभूतंततोवृक्षंपन्नगेंद्रस्यतेजसा।भस्मसर्वंसमाहृत्यकाश्यपोवाक्यमब्रवीत्।विद्याबलंपन्नगेंद्रप
श्यमेस्यवनस्पतौ।अहंसंजीवयाम्येनंपश्यतस्तेभुजंगम।ततःसभगवान्विद्वान्काश्यपोद्विजसत्तमः।भ
स्मराशीकृतंवृक्षंविद्ययासमजीवयत्।अंकुरंकृतवांस्तत्रततःपर्णद्वयान्वितं।पलाशिनंशाखिनंचतथा
विटपिनंपुनः।तंदृष्ट्वाजीवितंवृक्षंकाश्यपेनमहात्मना।उवाचतक्षकोब्रह्मन्नैतदत्यद्भुतंत्वयि।द्विजेंद्रयद्विषं
हन्याममवामद्विधस्यवा।कंत्वमर्थमभिप्रेप्सुर्यासितत्रतपोधन।यत्तेभिलषितंप्राप्तुंफलंतस्मान्नृपोत्तमात्।
अहमेवप्रदास्यामितत्तेयद्यपिदुर्लभं।विप्रशापाभिभूतेचक्षीणायुषिनराधिपे।घटमानस्यतेविप्रसिद्धिः
संशयिताभवेत्।ततोयशःप्रदीप्तंतेत्रिषुलोकेषुविश्रुतं।निरंशुरिवघर्मांशुरंतर्धानमितोव्रजेत् काश्यप

उवाच धनार्थी याम्यहं तत्र तन्मे देहि भुजंगम। ततो हं विनिवर्त्तिष्ये स्वापतेयं प्रगृह्य वै तक्षक उ
वाच यद्धनं प्रार्थयसे तस्माद्राज्ञस्ततो धिकं। अहमेव प्रदास्यामि निवर्त्तस्व द्विजोत्तम सौतिरुवाच तक्षकस्य
वचः श्रुत्वा काश्यपो द्विजसत्तमः। प्रदध्यौ सुमहातेजा राजानं प्रति बुद्धिमान्। दिव्यज्ञानः स तेजस्वी ज्ञात्वा तं नृपतिं
तदा। क्षीणायुषं पांडवेयमपावर्त्तत काश्यपः। लब्ध्वा वित्तं मुनिवरस्तक्षकाद्यावदीप्सितं। निवृत्ते काश्यपे तस्मिन्
समयेन महात्मनि। जगाम तक्षकस्तूर्णं नगरं नागसाह्वयं। अथ शुश्राव गच्छन्स तक्षको जगतीपतिं। मंत्रागदैर्विष
हरै रक्ष्यमाणं प्रयत्नतः॥ सूत उवाच ॥ स चिंतयामास तदा मायायोगेन पार्थिवः। मया वंचयितव्योसौ
क उपायो भवेदिति। ततस्तापसरूपेण प्राहिणोत्स भुजंगमान्। फलदर्भोदकं गृह्य राज्ञे नागो थ तक्षकः त
क्षक उवाच गच्छध्वं यूयमव्यग्रा राजानं कार्यवत्तया। फलपुष्पोदकं नाम प्रतिग्राहयितुं नृपं सौतिरु
नेतक्षकसमादिष्टास्तथा चक्रुर्भुजंगमाः। उपनिन्युस्तथा राज्ञे दर्भानापः फलानि च। तच्च सर्वं स राजेंद्रः प्रतिजग्रा
ह वीर्यवान्। कृत्वा तेषां च कार्याणि गम्यतामित्युवाच तान्। गतेषु तेषु नागेषु तापसच्छद्मरूपिषु। अमात्यान्सुहृ
दश्चैव प्रोवाच स नराधिपः। भक्षयंतु भवंतो वै स्वादूनीमानि सर्वशः। तापसैरुपनीतानि फलानि सहिता मया।

ततोराज्ञाससचिवैःफलान्यादातुमैहृत।विधिनासंप्रयुक्तोवैऋषिवाक्येनतेनतु।यस्मिन्नेवफलेनागस्तमे
वाभक्षयत्स्वयं।ततोभक्षयतस्तस्यफलात्कृमिरभूदणुः।ह्रस्वकःकृष्णनयनस्ताम्रवर्णोथशौनकः।सतंगृह्य
नृपश्रेष्ठःसचिवानिदमब्रवीत्।अस्तमभ्येतिसविताविषादद्यनमेभयं।सत्यवागस्तुसमुनिःकृमिर्मांदशताम
यं।तक्षकोनामभूत्वावैतथापरिहृतंभवेत्।तेचैनमनुवर्त्तन्तमंत्रिणःकालचोदिताः।एवमुक्त्वासराजेंद्रोग्रीवा
यांसन्निवेश्यह।कृमिकंप्राहसन्नूर्णमुमूर्षुर्नष्टचेतनः।प्रहसन्नेवभोगेनतक्षकेनत्ववेष्ट्यत।तस्मात्फलाद्वि
निष्क्रम्ययत्तद्राज्ञेनिवेदितं।वेष्टयित्वाचवेगेनविनद्यचमहास्वनं।अदशत्पृथिवीपालंतक्षकःपन्नगेश्वरः
॥ इतिमहाभारतेआदिपर्वण्यास्तीके सूतउवाच तंतथामंत्रिणोदृष्ट्वाभोगेनपरिवेष्टितं।
विवर्णवदनाःसर्वेरुरुदुर्भृशदुःखिताः।तंतुनादंततःश्रुत्वामंत्रिणस्तेप्रदुद्रुवुः।अपश्यन्तथायान्तमाकाशे
नागमद्भुतं।सीमन्तमिवकुर्वाणंनभसःपद्मवर्चसं।तक्षकंपन्नगश्रेष्ठंभृशंशोकपरायणाः।ततस्तुतेतद्गृ
हमग्निनावृतंप्रदीप्यमानंविषजेनभोगिनः।भयात्परित्यज्यदिशःप्रपेदिरेपपातराजाशनिताडितोयथा।तं
तोनृपेतक्षकतेजसाहतेप्रयुज्यसर्वाःपरलोकसत्क्रियाः।शुचिर्द्विजोराजपुरोहितस्तदातथैवतेतस्यनृपस्यमं

त्रिणः। नृपं शिशुं तस्य सुतं प्रचक्रिरे समेत्य सर्वे पुरवासिनो जनाः। नृपं यमाहुस्तममित्रघातिनं कुरुप्रवी
रं जनमेजयं जनाः। स बाल एवार्य्यमतिर्नृपोत्तमः सहैव तैर्मंत्रिपुरोहितैस्तदा। शशास राज्यं कुरुपुंगवाग्र
जो यथास्य वीरः प्रपितामहस्तथा। ततस्तु राजानममित्रतापनं समीक्ष्य ते तस्य नृपस्य मंत्रिणः। सुवर्णव
र्म्माणमुपेत्य काशिपं वपुष्टमार्थं वरयां प्रचक्रमुः। ततः स राजा प्रददौ वपुष्टमां कुरुप्रवीराय परीक्ष्य ध
र्मतः। स चापि तां प्राप्य मुदा युतोऽभवन्न चान्यनारीषु मनो दधे क्वचित्। सरस्सु फुल्लेषु वनेषु चैव ह प्रसन्न
चेता विजहार वीर्य्यवान्। तथा स राजन्यवरो विजह्रिवान् यथोर्वशीं प्राप्य पुरा पुरूरवाः। वपुष्टमा चापि वरं
पतिं तदा प्रतीतरूपा समवाप्य भूपतिं। भावेन रामा रमयांबभूव तं विहारकालेष्ववरोधसुन्दरी इत्या
दिपर्वण्यास्तीके सूत उवाच एतस्मिन्नेव काले तु जरत्कारुर्महातपाः। चचार पृथिवीं कृत्स्नां
यत्र सायंगृहो मुनिः। चरन्दीक्षां महातेजा दुश्चरामकृतात्मभिः। तीर्थेष्वाप्लवनं कृत्वा पुण्येषु विचचार
ह। वायुभक्षो निराहारश्शुष्यन्नहरहर्मुनिः। स ददर्श पितॄन्गर्त्ते लंबमानानधोमुखान्। एकतंत्ववशिष्टं वै वी
रणस्तम्बमाश्रितान्। तं तंतुं तं दशनैराखुमाददानं विलेशयं। निराहारान्कृशान्दीनान्गर्त्ते स्वत्राणमिच्छतः।

उपसृत्यसतान्दीनान्दीनरूपोभ्यभाषत।केभवन्तोवलंबंतेवीरणस्तम्बमाश्रिताः।दुर्बलंखादितैर्मूलैराखु
नाबिलवासिना।वीरणस्तंबकेमूलंयदप्येकमिहस्थितं।तदप्ययंशनैराखुरादत्तेदशनैःशितैः।छेत्स्यतेल्पा
वशिष्टत्वादेतदप्यचिरादिव।ततस्तुपतितारोत्रगर्त्तेस्मिन्नधोमुखाः।तस्यमेदुःखमुत्पन्नंदृष्ट्वायुष्मानधो
मुखान्।कृच्छ्रमापदमापन्नान्प्रियंकिंकरवाणिवः।तपसोस्यचतुर्थेनतृतीयेनाथवापुनः।अर्द्धेनवापिनिस्त
र्तुमापदंब्रूतमाचिरं।अथवापिसमग्रेणतरन्तुतपसाममभवन्तःसर्वएवेहकाममेवंविधीयतां। पि
तरऊचुः वृद्धोभवान्ब्रह्मचारीयोनस्त्रातुमिहेच्छति।नतुविप्राग्र्यतपसाशक्यमेतद्व्यपोहितुं।अस्तिन
स्ताततपसःफलंप्रवदतांवरः।संतानप्रक्षयाद्ब्रह्मन्पतामनिरयेऽशुचौ।लंबतामिहनस्तातनज्ञानंप्रति
भातिवै।येनत्वांनाभिजानीमोलोकेविख्यातपौरुषं।वृद्धोभवान्महाभागोयोनःशोच्यान्सुदुःखितान्।शोच
नेचैवकारुण्याच्छृणुयेवैवयंद्विजा।यायावरानामवयमृषयःशंसितव्रताः।लोकात्पुण्यादिहभ्रष्टाःसंता
नप्रक्षयान्मुने।प्रनष्टंनस्तपस्तीव्रंनहिनस्तंतुरस्तिवै।अस्तित्वेकोद्यनस्तंतुःसोपिनास्तियथातथा।मंदभा
ग्योल्पभाग्यानांतपएकंसमास्थितः।जरत्कारुरितिख्यातोवेदवेदांगपारगः।नियतात्मामहात्माचसुव्र

तःसुमहातपाः।तेनस्मतपसोलोभात्कृछ्रमापादितावयं।नतस्यभार्यापुत्रोवावांधवोवास्तिकश्चन।तस्मा
ल्लंवामहेगर्त्तेनष्टसंज्ञाह्यनाथवत्।सवक्तव्यस्त्वयादृष्ट्वाअस्माकंनाथवत्तया।पितरस्तेवलंवन्तेगर्त्तेदीना
ह्यधोमुखाः।साधुदारान्कुरुष्वेतिप्रजामुत्पादयेतिच।कुलतंतुर्हिनःशिष्टस्त्वमेवैकस्तपोधन।यस्त्वंपश्य
सिनोब्रह्मन्वीरणस्तंवमाश्रितान्।एषोस्माकंकुलस्तंबआस्तेस्वकुलवर्द्धनः।यानिपश्यसिवैब्रह्मन्मूला
हास्यवीरुधः।एतेनस्तंतवस्तातकालेनपरिभक्षिताः।यत्त्वेतत्पश्यसिब्रह्मन्मूलमस्यार्द्धभक्षितं।यत्रलं
वामहेगर्त्तेसोप्येकस्तपआस्थितः।यमाखुंपश्यसिब्रह्मन्कालएषमहाबलः।सतंतपोरतंमंदंशनैःक्षप
यतेतुदन्।जरत्कारुंतपोलुब्धंमंदात्मानमचेतसं।नहिनस्तत्तपस्तस्यतारयिष्यतिसत्तम।छिन्नमूला
न्परिभ्रष्टान्कालोपहतचेतसः।अधःप्रविष्टान्पश्यास्मान्यथादुष्कृतिनस्तथा।अस्मासुपतितेषत्रसह
सर्वैःसवांधवैः।छिन्नःकालेनसोप्यत्रागंताबैनरकंततः।तपोवाप्यथवायज्ञोयच्चान्यत्पावनंमहत्।तत्स
र्वमपरंतातनसंततसासमंमतं।सतातदृष्ट्वाब्रूयास्त्वंजरत्कारुंतपोधनं।यथादृष्टमिदंचात्रत्वयाख्येयम
शेषतः।यथादारान्प्रकुर्यात्सपुत्रानुत्पादयेद्यथा।तथाब्रह्मंस्त्वयावाच्यःसोस्माकंनाथवत्तया।वांध

वानांहितस्येहयथाचात्मकुलंतथा।कस्त्वंबंधुमिवास्माकमनुसोचसिसत्तम।श्रोतुमिछामसर्वेषांकोभवा
निहतिष्ठति इत्यादिपर्वण्यास्तीके सौतिरुवाच एतछ्रुत्वाजरत्कारुर्भृशंशोकपरायणः।
उवाचतान्पितॄन्दुःखाद्वाष्पसंदिग्धयागिरा जरत्कारुरुवाच ममपूर्वेभवन्तोवैपितरःसपिता
महाः।तद्ब्रूतयन्मयाकार्यंभवतांप्रियकाम्यया।अहमेवजरत्कारुःकिल्विषीभवतांसुतः।तद्दंडंधारयतमेदु
ष्कृतेरकृतात्मनः॥ पितरऊचुः पुत्रदिष्ट्यासिसंप्राप्तइमंदेशंयदृछया।किमर्थंचत्वयाब्रह्मन्नकृतोदा
रसंग्रहः॥ जरत्कारुरुवाच ममायंपितरोनित्यंहृद्यर्थःपरिवर्त्तते।ऊर्ध्वरेताःशरीरंवैप्रापयेयम
मुत्रवै।नदारान्वैकरिष्येहमितिमेभावितंमनः।एवंदृष्ट्वातुभवतःशकुंतानिवलंबतः।मयानिवर्त्तिताबुद्धि
र्ब्रह्मचर्यात्पितामहाः।करिष्येवःप्रियंकामंनिवेक्ष्येहमसंशयं।सनाम्नींयद्यहंकन्यामुपलप्स्येकदाचन।भ
विष्यतिचयाकाचिद्भैक्ष्यवत्स्वयमुद्यता।प्रतिग्रहीतातामस्मिन्नभरेयंचयामहं।एवंविधमहंकुर्यांन्निवे
शंप्राप्नुयांयदि।अन्यथानकरिष्येहंसत्यमेतत्पितामहाः।तत्रचोत्पत्स्यतेजंतुर्भवतांतारणायवै।शाश्व
ताःस्थानमव्याश्चैवतिष्ठंतुपितरोमम॥ सूतउवाच ॥एवमुक्त्वातुसपितॄंश्चचारपृथिवींमुनिः।नच

स्मलभतेभार्यांवृद्धोयमितिशौनक।यदानिर्वेदमापन्नःपितृभिश्चोदितस्तथा।तदारण्यंसगत्वोच्चैश्चुक्रो
शभृशदुःखितः।सत्वरण्यगतःप्राज्ञःपितृणांहितकाम्यया।उवाचकन्यांयाचामितिस्रोवाचःशनैरिमाः।
यानिभूतानिसंतीहस्थावराणिचराणिच।अंतर्हितानिवायानितानिशृण्वंतुमेवचः।उग्रेतपसिवर्त्ततंपि
तरश्चोदयंतिमां।निविशस्वेतिदुःखार्त्ताःसंतानस्यचिकीर्षया।निवेशायाखिलांभूमिंकन्याभैक्षंचराभि
भोः।दरिद्रोदुःखशीलश्चपितृभिःसन्नियोजितः।यस्यकन्यास्तिभूतस्ययेमयेहप्रकीर्त्तिताः।तेमेकन्यां
प्रयछन्तुचरतःसर्वतोदिशं।ममकन्यासनाम्नीयाभैक्ष्यवच्चोद्यताभवेत्।भरेयंचैवयांनाहंतांमेकन्यांप्रय
छत।ततस्तेपन्नगायेवैजरत्कारौसमाहिताः।तामादायप्रवृत्तिंतेवासुकेःप्रत्यवेदयन्।तेषांश्रुत्वासनागेंद्र
स्तांकन्यांसमलंकृतां।प्रगृह्यारण्यमगमत्समीपंतस्यपन्नगः।तत्रतांभैक्ष्यवत्कन्यांप्रादात्तस्मैमहात्मने।
नागेंद्रोवासुकिर्ब्रह्मन्नसतांप्रत्यगृह्णत।असनामेतिवैमत्वाभरणेवाविचारितां।मोक्षभावेस्थितश्चापिमं
दभूतःपरिग्रहे।ततोनामसकन्यायाःपप्रछभृगुनंदन।वासुकिंभरणंचास्यानकुर्यामित्युवाच ॥ ॥
इत्यादिपर्वण्यास्तीके सौतिरुवाच वासुकिस्त्वब्रवीद्वाक्यंजरत्कारुमृषींतदा।सनाम्नीतवक

न्येयंस्वसा मे तपसान्विता। भरिष्यामि च ते भार्यां प्रतीछेमां द्विजोत्तम। रक्षणं च करिष्येस्याः सर्वशक्त्या तपो-
धन। त्वदर्थं रक्षिता चैषा मया मुनिवरोत्तम॥ ऋषिरुवाच॥ न भरिष्येहमेतां वै एष मे समयः कृतः। अ-
प्रियं च न कर्तव्यं कृते चैनां त्यजाम्यहं॥ सौतिरुवाच॥ प्रतिश्रुते तु नागेन भरिष्ये भगिनीमिति। जरत्का-
रुस्तदा वेश्म भुजगस्य जगाम ह। तत्र मंत्रविदां श्रेष्ठस्तपोवृद्धो महाव्रतः। जग्राह पाणिं धर्मात्मा विधिमं-
त्रपुरस्कृतं। ततो वासगृहं रम्यं पन्नगेंद्रस्य संमतं। जगाम भार्यामादाय स्तूयमानो महर्षिभिः। शयनं त-
त्र संक्लिप्तं स्पर्ध्यास्तरणसंवृतं। तत्र भार्यासहायो सौ जरत्कारुरुवास ह। स तत्र समयं चक्रे भार्यया सह
सत्तमः। विप्रियं मे न कर्तव्यं न च वाच्यं कदाचन। त्यजेयं विप्रिये च त्वां कृते वासं च ते गृहे। एतछ्रुत्वा वचनं म-
यायत्समुदीरितं। ततः परमसंविग्ना स्वसा नागपतेस्तदा। अतिदुःखान्विता वाक्यं तमुवाचैवमस्त्विति। त-
थैव सा च भर्तारं दुःखशीलमुपाचरत्। उपायैः श्वेतकाकीयैः प्रियकामा यशस्विनी। ऋतुकाले ततः स्नाता
कदाचिद्वासुकेः स्वसा। भर्तारं वै यथान्यायमुपतस्थे महामुनिं। तत्र तस्याः समभवद्गर्भो ज्वलनसन्निभः।
अतीव तेजसा युक्तो वैश्वानरसमद्युतिः। शुक्लपक्षे यथा सोमो व्यवर्द्धत तथैव सः। ततः कतिपयाहस्य जर-

त्कारुर्महायशाः।उत्संगेस्याःशिरःकृत्वासुष्वापपरिखिन्नवत्।तस्मिंश्चसुप्तेविप्रेंद्रेसमितास्तमयाद्गि
रिं।अन्हःपरिक्षयेब्रह्मंस्ततःसाचिंतयत्तदा।वासुकेर्भगिनीभीताधर्मलोपान्मनस्विनी॥किंनुमेसुकृ
तंभूयाद्भर्तुरुत्थापनेनवा।दुःखशीलोहिधर्मात्माकथंनास्यापराध्नुयां।कोपोवाधर्मशीलस्यधर्मलो
पोथवापुनः।धर्मलोपोगरीयान्वैस्यादित्यत्राकरोन्मतिं।उत्थापयिष्येयद्येनंध्रुवंकोपंकरिष्यति।ध
र्मलोपोभवेदस्यसंध्यातिक्रमणेध्रुवं।इतिनिश्चित्यमनसाजरत्कारुर्भुजंगमा।तमृषिंदीप्ततपसंश
यानमनलोपमं।उवाचेदंवचःश्लक्ष्णंततोमधुरभाषिणी।उत्तिष्ठत्वंमहाभागसूर्योस्तमुपगच्छति।सं

ध्यामुपास्स्वभगवन्नपःस्पृष्ट्वायतव्रतः।प्रादुष्कृताग्निहोत्रोयंमुहूर्त्तोरम्यदारुणः।संध्याप्रवर्त्ततेचेयंप
श्चिमस्यांदिशिप्रभो।एवमुक्तःसभगवान्जरत्कारुर्महातपाः।भार्यांप्रस्फुरमाणोष्ठइदंवचनमब्रवी
त्।अवमानःप्रयुक्तोयंत्वयाममभुजंगमे।समीपेतेनवत्स्यामिगमिष्यामियथागतं।शक्तिरस्तिनवा
मोरुमयिसुप्तेविभावसोः।अस्तंगंतुंयथाकालमितिमेहृदिवर्त्तते।नचाप्यवमतस्येहवासोरोचेतक
स्यचित्।किंपुनर्द्धर्मशीलस्यममवामद्विधस्यवा।एवमुक्ताजरत्कारुर्भर्त्राहृदयकंपनं।अब्रवीद्भगि

नीतत्रवासुकेः सन्निवेशने।नावमानात्कृतवती नवाहं विप्रबोधनं।धर्मलोपेन ते विप्र स्यादिसतन्म
याकृतं।उवाच भार्यामित्युक्तो जरत्कारुर्महातपाः।ऋषिः कोपसमाविष्टस्त्यक्तुकामो भुजंगमां।न मे वा
गनृतं प्राहृ गमिष्येहं भुजंगमे।समयो ह्येष मे पूर्वं त्वया सह मिथः कृतः।सुखमस्म्युषितो भद्रे ब्रूयास्त्वं भ्रा
तरं शुभे।इतो मयि गते भीरु गतः स भगवानिति।त्वं चापि मयि निष्क्रान्ते न शोकं कर्तुमर्हसि।इत्युक्ता सा
नवद्यांगी प्रत्युवाच मुनिं तदा।जरत्कारुं जरत्कारुश्चिंताशोकपरायणा।बाष्पगद्गदया वाचा मुखेन प
रिशुष्यता।कृतांजलिर्वरारोहा पर्यश्रुनयना ततः।धैर्यमालंब्य वामोरू हृदयेन प्रवेपता।न मामर्ह
सि धर्मज्ञ परित्यक्तुमनागसं।धर्मे स्थितां स्थितो धर्मे सदा प्रियहिते रतां।प्रदाने कारणं यच्च मम तुभ्यं द्वि
जोत्तम।तदलब्धवतीं मंदां किं मां वक्ष्यति वासुकिः।मातृशापाभिभूतानां ज्ञातीनां मम सत्तम।अपत्यमी
प्सितं त्वत्तस्तच्च तावन्न दृश्यते।त्वत्तो ह्यपत्यलाभेन ज्ञातीनां मे शिवं भवेत्।संप्रयोगो भवेन्नायं मम मोघस्त्व
या द्विज।ज्ञातीनां हितमिच्छंती भगवंस्त्वां प्रसादये।इममव्यक्तरूपं मे गर्भमाधाय सत्तम।कथं त्यक्त्वा म
हात्मा सन् गंतुमिच्छस्यनागसं॥ सौतिरुवाच ॥एवमुक्तस्तु स मुनिर्भार्यां वचनमब्रवीत्।यद्युक्त

मनुरूपंचजरत्कारुंतपोधनः। अस्त्ययंसुभगेगर्भस्तववैश्वानरोपमः। ऋषिःपरमधर्म्मात्मावेदवेदांग
पारगः। एवमुक्त्वासधर्म्मात्माजरत्कारुर्महानृषिः। उग्रायतपसेभूयोजगामकृतनिश्चयः इत्या
दिपर्व्वणिआस्तीके सौतिरुवाच गतमात्रंतुभर्त्तारंजरत्कारुरवेदयत्। भ्रातुःसकाशमागम्य
याथातथ्यंतपोधन। ततःसभुजगश्रेष्ठःश्रुत्वासुमहदप्रियं। उवाचभगिनींदीनांतदादीनतरःस्वयं
वासुकिरुवाच जानासिभद्रेयत्कार्यंप्रदानेकारणंचयत्। पन्नगानांहितार्थायपुत्रस्तेस्यात्ततोय
दि। ससर्पसत्रात्किलनोमोक्षयिष्यतिवीर्यवान्। एवंपितामहःपूर्वमुक्तवांस्तुसुरैःसह। अप्यस्तिगर्भः
सुभगेतस्मात्तेमुनिसत्तमात्। नचेच्छाम्यफलंतस्यदानकर्ममनीषिणः। कामंचममनन्याय्यंप्रष्टुंत्वांकार्य
मीदृशं। किंतुकार्यगरीयस्त्वात्ततस्त्वाहमचूचुदं। दुर्वार्य्यतांविदित्वाचभर्त्तुस्तेतितपस्विनः। नैनमन्वाग
मिष्यामिकदाचिद्धिशपेत्समां। आचक्ष्वभद्रेभर्त्तुस्त्वंसर्व्वमेवविचेष्टितं। उद्धरस्वचशल्यंमेघोरंहृदिचिर
स्थितं। जरत्कारुस्ततोवाक्यमित्युक्ताप्रत्यभाषत। आश्वासयंतीसंतप्तंवासुकिंपन्नगेश्वरं जरत्का
रुरुवाच पृष्टोमयापत्यहेतोःसमहात्मामहातपाः। अस्तीत्युद्दिश्यममेदगतवांश्चसः। स्वैरेष्वपि

नतेनाहंस्मरामिवितथंवचः।उक्तपूर्वंकुतोराजन्सांपरायेसवक्ष्यति।नसंतापस्त्वयाकार्यःकार्यंप्रति
भुजंगमे।उत्पत्स्यतिचतेपुत्रोज्वलनार्कसमप्रभः।इत्युक्त्वासहिमांभ्रातर्गतोभर्त्तातपोधनः।तस्माद्व्ये
तुपरंदुःखंतवेदंमनसिस्थितं सौतिरुवाच एतच्छ्रुत्वासनागेंद्रोवासुकिःपरयामुदा।एवम
स्त्वितितद्वाक्यंभगिन्याःप्रत्यगृह्णत।सांत्वमानार्थदानैश्चपूजयाचानुरूपया।सोदर्यांपूजयामासस्व
सारंपन्नगोत्तमः।ततःप्रववृधेगर्भोमहातेजामहाप्रभः।यथासोमोद्विजश्रेष्ठशुक्लपक्षोदितोदिवि।
यथाकालंतुसाब्रह्मन्प्रजज्ञेभुजगस्वसा।कुमारंदेवगर्भाभंपितृमातृभयापहं।ववृधेसतुतत्रैवनाग
राजनिवेशने।वेदांश्चाधिजगेसांगान्भार्गवाच्च्यवनान्मुने।चीर्णव्रतोबालएवबुद्धिसत्वगुणान्वितः।ना
मचास्याभवत्ख्यातंलोकेष्वास्तीकइत्युत।अस्तीत्युक्त्वागतोयस्मात्पितागर्भस्थमेवतं।वनंतस्मादिदं
तस्यनामास्तीकेतिविश्रुतं।सबालएवतत्रस्थश्चरन्नमितबुद्धिमान्।गृहेपन्नगराजस्यप्रयत्नात्परि
रक्षितः।भगवानिवदेवेशःशूलपाणिर्हिरण्मयः।विवर्द्धमानःसर्वांस्तान्पन्नगानभ्यहर्षयत्
इत्यादिपर्वण्यास्तीके शौनकउवाच यदपृच्छत्तदाराजामंत्रिणोजनमेजयः।पितुःस्वर्गगतिं

तन्मेविस्तरेणपुनर्वद   सौतिरु   शृणुब्रह्मन्यथाऽपृष्टन्मंत्रिणोनृपतिस्तदा।यथाचाख्यातवंत
स्तेनिधनंतत्परीक्षितः   जनमेजयउ   जानंतिस्मभवंतस्तद्यथावृत्तंपितुर्मम।आसीद्यथासनि
धनंगतःकालेमहायशाः।श्रुत्वाभवत्सकाशाद्धिपितुर्वृत्तमशेषतः।कल्याणंप्रतिपत्स्यामिविपरीतं
नजातुवित्॥ सौतिरुवाच ॥मंत्रिणोथाब्रुवन्वाक्यंपृष्टास्तेनमहात्मना।सर्वधर्मविदःप्राज्ञाराजा
नंजनमेजयं॥ मंत्रिणऊचुः ॥शृणुपार्थिवयद्ब्रूषेपितुस्तवमहात्मनः।चरितंपार्थिवेंद्रस्ययथा
निष्ठांगतश्चसः।धर्मात्माचमहात्माचप्रजापालःपितातव।आसीदिहयथावृत्तःसमहात्माशृणुष्वतत्।
चातुर्वर्ण्यंस्वधर्मस्थंसकृत्वापर्यरक्षत।धर्मतोधर्मविद्राजाधर्मोविग्रहवानिव।ररक्षपृथिवींदेवींश्रीमा
नतुलविक्रमः।द्वेष्टारस्तस्यनैवासन्सचद्वेष्टिनकंचन।समःसर्वेषुभूतेषुप्रजापतिरिवाऽभवत्।ब्राह्मणाः
क्षत्रियावैश्याःशूद्राश्चैवस्वकर्मसु।स्थिताःसुमनसोराजंस्तेनराज्ञाःस्वधिष्ठिताः।विधवानाथविकलान्
कृपणांश्चबभारसः।सुदर्शःसर्वभूतानामासीत्सोमइवापरः।तुष्टपुष्टजनःश्रीमान्सत्यवाग्दृढविक्रमः।ध
नुर्वेदेतुशिष्योभून्नृपःशारद्वतस्यसः।गोविंदस्यप्रियश्चासीत्पितातेजनमेजय।लोकस्यचैवसर्वस्यप्रि

यस्मिन्नासीन्महायशाः।परिक्षीणेषुकुरुषुसोत्तरायामजीजनत्।परिक्षिदभवत्तेनसौभद्रस्यात्मजोबली।रा
जधर्म्मार्थकुशलोयुक्तः सर्वगुणैर्वृतः।जितेंद्रियश्चात्मवांश्चमेधावीधर्मसेविता।षड्वर्गजिन्महाबुद्धिर्नीति
शास्त्रविदुत्तमः।प्रजाइमास्तवपिताषष्टिंवर्षाण्यपालयत्।ततोदिष्टांतमापन्नः सर्वेषांदुःखमावहन्।तत
स्त्वंपुरुषश्रेष्ठधर्मेणप्रतिपेदिवान्।इदंवर्षसहस्राय राज्यंकुरुकुलागतं।बालएवाभिषिक्तः स्त्वंसर्वभूता
नुपालकः जनमेजयउ नास्मिन्कुलेजातुबभूवराजायोनप्रजानांप्रियकृत्प्रियश्च।विशेषतः
प्रेक्ष्यपितामहानांवृत्तंमहद्वृत्तपरायणानां॥कथंनिधनमापन्नःपितामम तथाविधः।आचक्ष्ध्वंयथावन्मे
श्रोतुमिच्छामितत्वतः॥ सौतिरुवाच ॥एवंसंचोदिताराज्ञामंत्रिणस्तेनराधिपं।ऊचुःसर्वेयथावृत्तंरा
ज्ञःप्रियहितैषिणः॥ मंत्रिणऊचुः सराजापृथिवीपालःसर्वशस्त्रभृतांवरः।बभूवमृगयाशीलःस्तव
राजन्पितासदा।यथापांडुर्महाबाहुर्धनुर्धरवरोयुधि।अस्मास्वासज्यसर्वाणिराजकार्याण्यशेषतः।सकदा
चिद्वनगतोमृगंविव्याधपत्रिणा।विद्ध्वाचान्वसरत्तूर्णंतंमृगंगहनेवने।पदातिर्बद्धनिस्त्रिंशस्तथायुधकला
पवान्।नचाससादगहनेमृगंनष्टंपितातव।परिश्रांतोवयस्थश्चषष्टिवर्षोजरान्वितः।क्षुधितःसमहारण्ये

ददर्श मुनिसत्तमं। स तं पप्रछ राजेंद्रो मुनिं मौनव्रते स्थितं। न च किंचिदुवाचेदं पृष्टोपि स मुनिस्तदा। ततो रा
जा क्षुच्छ्रमार्त्तस्तं मुनिं स्थाणुवत्स्थितं। मौनव्रतधरं शांतं सद्यो मन्युवशंगतः। न बुबोध च तं राजा मौनव्रतध
रं मुनिं। स तं क्रोधसमाविष्टो धर्षयामास ते पिता। मृतं सर्पं धनुःकोट्या समुत्क्षिप्य धरातलात्। तस्य शुद्धात्म
नः प्रादात्स्कंधे भरतसत्तम। न चोवाच स मेधावी तमथो साधु साधु वा। तस्थौ तथैव चाक्रुद्धः सर्पं स्कंधेन धा
रयन्॥ इत्यादिपर्वणि पास्तीके मंत्रिण ऊचुः ततः स राजा राजेंद्र स्कंधे तस्य भुजंगमं। मु
नेः क्षुत्क्षाम आसज्य स्वपुरं प्रययौ पुनः। ऋषेस्तस्य तु पुत्रोभूद्गवि जातो महायशाः। शृंगी नाम महाते
जास्तिग्मवीर्योतिकोपनः। ब्रह्माणं समुपागम्य मुनिः पूजां चकार ह। सोनुज्ञयागतस्तत्र शृंगी शुश्राव
तं तदा। सख्युः सकाशात्पितरं पित्रा ते धर्षितं पुरा। मृतं सर्प्पं समासक्तं स्थाणुभूतस्य तस्य तं। वहंतं कु
रुशार्दूल स्कंधेनानपकारिणं। तपस्विनमतीवाथ तं मुनिप्रवरं नृप। जितेंद्रियं विशुद्धं च स्थितं कर्मण्यथा
द्भुते। तपसा द्योतितात्मानं स्वेष्वंगेषु यतं तदा। शुभाचारं शुभकथं सुस्थितं तमलोलुपं। अक्षुद्रमनसूयं
च वृद्धं मौनव्रते स्थितं। शरण्यं सर्वभूतानां पित्रा विनिकृतं तव। शशापाथ महातेजाः पितरं ते रुषान्वितः।

ऋषेःपुत्रोमहातेजाबालोपिस्थविरद्युतिः।सक्षिप्रमुदकंस्पृष्ट्वारोषादिदमुवाचह।पितरंतेभिसंधायते
जसाप्रज्वलन्निव।अनागसिगुरौयोमेमृतंसर्पमवासृजत्।तंनागस्तक्षकःक्रुद्धस्तेजसाप्रदहिष्यति।
आशीविषस्तिग्मतेजामद्वाक्यबलनोदितः।सप्तरात्रादितःपापंपश्यमेतपसोबलं।इत्युक्त्वासययौतत्र
पितायत्रास्यसोभवत्।दृष्ट्वाचपितरंतस्मैतंशापंप्रत्यवेदयत्।सचापिमुनिशार्दूलःप्रेषयामासतेपितुः
त्रेशिष्यंगौरमुखंनामशीलवंतंगुणान्वितं।आचख्यौसचविश्रांतोराज्ञःसर्वमशेषतः।शप्तोसिममपुत्रे
णयत्नोभवमहीपते।तक्षकस्त्वांमहाराजतेजसासौदहिष्यति।श्रुत्वाचतद्वचोघोरंपितातेजनमेजय।
यत्नोभवत्परित्रस्तस्तक्षकात्पन्नगोत्तमात्।ततस्तस्मिंस्तुदिवसेसप्तमेसमुपस्थिते।राज्ञःसमीपंब्रह्म
र्षिःकाश्यपोगंतुमैहत।तंददर्शाथनागेंद्रस्तक्षकःकाश्यपंतदा।तमब्रवीत्पन्नगेंद्रःकाश्यपंत्वरितंद्वि
जं।क्वभवांस्त्वरितोयातिकिंचकार्यंचिकीर्षति काश्यपउ यत्रराजाकुरुश्रेष्ठःपरिक्षिन्नाम
वैद्विज।तक्षकेणभुजंगेनधक्ष्यतेकिलसोद्यवै।गच्छाम्यहंतंत्वरितःसद्यःकर्तुमपज्वरं।मयाभिपन्नंतं
चापिनसर्प्पोधर्षयिष्यति तक्षकउवाच किमर्थंतंमयादष्टंसंजीवयितुमिच्छसि।अहंस

आ०प०
७८

तक्षकोवृक्षन्नृपश्यमेवीर्यमद्भुतं।नशक्तस्त्वमयादृष्टंतंसंजीवयितुंनृपं।इत्युक्त्वातक्षकस्तत्रसोदश
द्वनस्पतिं।सदष्टमात्रोनागेनभस्मीभूतोभवन्नगः।काश्यपश्चततोराजनजीवयततंनगं।ततस्तं
लोभयामासकामंब्रूहीतितक्षकः।सएवमुक्तस्तंप्राहकाश्यपस्तक्षकंपुनः।धनलिप्सुरहंतत्रयामीसु
कश्चतेनसः।तमुवाचमहात्मानंतक्षकःश्लक्ष्णयागिरा।यावद्धनंप्रार्थयसेराज्ञस्तस्मात्ततोधिकं।गृह्
णमत्तएवत्वंसंनिवर्त्तस्वचानघ।सएवमुक्तोनागेनकाश्यपोद्विपदांवरः।लब्ध्वावित्तंनिववृतेतक्षका
द्यावदीप्सितं।तस्मिन्प्रतिगतेविप्रेछद्मनोपेत्यतक्षकः।तंनृपंनृपतिश्रेष्ठपितरंधार्मिकंतव।प्रासाद
स्थंयत्तमपिदग्धवान्विषवह्निना।ततस्त्वंपुरुषव्याघ्रविजयायाभिषेचितः।एतद्दृष्टंश्रुतंचापियथाव
न्नृपसत्तम।अस्माभिर्निखिलंसर्वंकथितंतेतिदारुणं।श्रुत्वाचैनंनरश्रेष्ठपार्थिवस्यपराभवं।अस्यच
र्षेरुत्तंकस्यविधत्स्वयदनंतरं सौतिरुवाच एतस्मिन्नेवकालेतुसराजाजनमेजयः।उवाचमं
त्रिणःसर्वानिदंवाक्यमरिंदमः जनमेजयउवाच अथतत्कथितंकेनयद्वृत्तंतद्वनस्पतौ।आ
श्चर्यभूतंलोकस्यभस्मराशीकृतंतदा।यद्वृक्षंजीवयामासकाश्यपस्तक्षकेणवै।नूनंमंत्रैर्हतविषोन

प्रणश्येतकश्यपात्॥चिंतयामाससपापात्मामनसापन्नगाधमः॥दृष्टंयदिमयाविप्रःपार्थिवंजीवयिष्य
ति॥ततोलोकःसंहृतविषोलोकेयास्यतिहास्यतां॥विचिंत्यैवंकृतातेनध्रुवंतुष्टिर्द्विजस्यवै॥भविष्यतिसुया
येनयस्यदास्यामियातनां॥एकंतुश्रोतुमिच्छामितद्वृत्तंनिर्जनेवने॥संवादंपन्नगेंद्रस्यकाश्यपस्यचकस्त
था॥श्रुतवान्दृष्टवांश्चापिभवतांकथमागतं॥श्रुत्वातस्यविधास्येहंपन्नगान्तकरीमतिं॥ मंत्रिणऊ
चुः शृणुराजन्यथास्माकंयेनतत्कथितंपुरा॥समागमंद्विजेंद्रस्यपन्नगेंद्रस्यचाध्वनि॥तस्मिन्वृ
क्षेनरःकश्चिदिंधनार्थायपार्थिव॥विचिन्वन्पूर्वमारूढःशुष्कशाखांवनस्पतौ॥नबुध्येतामुभौतंचनग
स्थंपन्नगद्विजौ॥सहतेनैववृक्षेणभस्मीभूतोभवन्नृप॥द्विजप्रभावाद्राजेंद्रव्यजीवत्सवनस्पतिः॥तेना
गम्यनृपश्रेष्ठपुंसास्मासुनिवेदितं॥यथादृष्टंतुतत्सर्वंतक्षकस्यद्विजस्यच॥एतत्तेकथितंराजन्यथादृ
ष्टंश्रुतंचयत्॥श्रुत्वाचनृपशार्दूलविधत्स्वयदभीप्सितं॥ सूतउवाच ॥मंत्रिणांतुवचःश्रुत्वा
सराजाजनमेजयः॥पर्यतप्यतदुःखार्त्तःप्रत्यपिंषत्करंकरे॥निश्वासमुष्णमसकृद्दीर्घंराजीवलोचनः॥
मुमोचाश्रूणिचतदानेत्राभ्यांप्ररुदन्नृपः॥उवाचचमहीपालोदुःखशोकसमन्वितः॥दुर्द्धरंबाष्पमुत्सृ

ज्यस्पृष्ट्वाचापोयथाविधि।मुहूर्त्तमिवचध्यात्वानिश्चित्यमनसानृप॥ ।अमर्षीमंत्रिणःसर्वानिदंवच
नमब्रवीत् जनमेजयउ श्रुत्वैतद्भवतांवाक्यंपितुर्मेस्वर्गतिंप्रति।निश्चितेयंममममतिर्याच
तांमेनिबोधत।अनंतरंचमन्येहंतक्षकायदुरात्मने।प्रतिकर्त्तव्यमित्येवंयेनमेहिंसितःपिता।शृंगि
णंहेतुमात्रंयःकृत्वादग्ध्वाचपार्थिवं।इयंदुरात्मतातस्यकश्यपंयोन्यवर्त्तयत्।यद्यागच्छेत्सवैविप्रो
ननुजीवेत्पितामम।परिहीयेतकिंतस्ययदिजीवेत्सपार्थिवः।काश्यपस्यप्रसादेनमंत्रिणिनयेनच।
सतुवारितवान्मोहात्काश्यपंद्विजसत्तमं।संजिजीविषिषुंप्राप्तंराजानमपराजितं।महानतिक्रमोह्येषतक्षक
स्यदुरात्मनः।।द्विजस्ययोददद्द्रव्यमान्नृपंजीवयेदिति। ॥ उत्तंकस्यप्रियंकर्तुमात्मनश्चमहत्प्रियं।भवतांचैव
सर्वेषांगच्छाम्यपचितिंपितुः इत्यादिपर्वण्यास्तीके सौतिरुवाच एवमुक्त्वाततःश्रीमान्मंत्रि
भिश्चानुमोदितः।आरुरोहप्रतिज्ञांससर्पसत्रायपार्थिवः।ब्रह्मन्भरतशार्दूलोराजापारिक्षितस्तदा।पुरोहित
मथाहूयसर्त्विजंवसुधाधिपः।अब्रवीद्वाक्यसम्पन्नःकार्यसंपत्करंवचः।योमेहिंसितवांस्तातंतक्षकःस
दुरात्मवान्।प्रतिकुर्यांतथातस्यतद्भवंतोब्रुवंतुमे।अपितत्कर्मविदितंभवतांयेनपन्नगं।तक्षकंसंप्रदीप्ते

ग्नौ प्रक्षिपेयं सबांधवं। यथा तेन पिता मह्यं पूर्वं दग्धो विषाग्निना। तथाहमपि तं पापं दग्धुमिच्छामि पन्नगं

ऋत्विज ऊचुः अस्ति राजन्महत्सत्रं त्वदर्थं देवनिर्मितं। सर्पसत्रमिति ख्यातं पुराणे परिपठ्यते। आहर्त्ता त

स्य सत्रस्य त्वन्नान्योस्ति नराधिपः। इति पौराणिकाः प्राहुरस्माकं चास्ति स क्रतुः॥ सौतिरुवाच ॥ एवमुक्तः

स राजर्षिर्मेने दग्धं हि तक्षकं। हुताशनमुखं दीप्तं प्रविष्टमिति सत्तम। ततोब्रवीन्मंत्रविदस्तान्राजा ब्राह्मणां

स्तदा। आहरिष्यामि तत्सत्रं संभाराः संभ्रियंतु मे। ततस्त ऋत्विजस्तस्य शास्त्रतो द्विजसत्तम। तं देशं मापयामा

सुर्यज्ञायतनकारणात्। यथावद्वेदविद्वांसः सर्वे बुद्धेः परं गताः। ऋद्ध्या परमया युक्तमिष्टं द्विजगणैर्युतं। प्र

भूतधनधान्याढ्यमृत्विग्भिः सुनिषेवितं। निर्माय चापि विधिवद्यज्ञायतनमीप्सितं। राजानं दीक्षयामासुः सर्प

सत्राप्तये तदा। इदं चासीत्तत्र पूर्वं सर्पसत्रे भविष्यति। निमित्तं महदुत्पन्नं यज्ञविघ्नकरं तदा। यज्ञस्यायतने

तस्मिन्क्रियमाणे वचोब्रवीत्। स्थपतिर्बुद्धिसंपन्नो वास्तुविद्याविशारदः। इत्यब्रवीत्सूत्रधारः सूतः पौराणि

कस्तदा। यस्मिन्देशे च काले च मापनेयं प्रवर्त्तिता। ब्राह्मणं कारणं कृत्वा नायं संस्थास्यते क्रतुः। एतच्छ्रुत्वा तु

राजासौ प्राग्दीक्षाकालमब्रवीत्। क्षत्तारं न हि मे कश्चिदज्ञातः प्रविशेदिति इत्यादिपर्वण्यास्तीके

सौतिरुवाच ततःकर्मप्रवर्त्ततेसर्पसत्रेविधानतः।पर्य्यक्रामंश्चविधिवत्स्वेस्वेकर्मणियाजकाः।प्रावृत्यकृ
ष्णवासांसिधूमसंरक्तलोचनाः।जुहुवुर्मंत्रवच्चैवसमिद्धंजातवेदसं।कंपयंतश्चसर्वेषामुरगाणांमनांसिच।
सर्प्पानाजुहुवुस्तत्रसर्वानग्निमुखेतदा।ततःसर्प्पाःसमापेतुःप्रदीप्तेहव्यवाहने।विचेष्टमानाःकृपणमाह्वयंतः
परस्परं।विस्फुरंतःश्वसंतश्चवेष्टयंतःपरस्परं।पुच्छैःशिरोभिश्चभृशंचित्रभानुंप्रपेदिरे।श्वेताःकृष्णाश्चनीलाश्च
स्थविराःशिशवस्तथा।नदंतोविविधान्नादान्पेतुर्दीप्तेविभावसौ।एवंशतसहस्राणिप्रयुतान्यर्बुदानिच।अव
शानिविनष्टानिपन्नगानांतुतत्रवै।तुरगाइवतत्रान्येहस्तिहस्ताइवापरे।मत्ताइवचमातंगामहाकायामहाबलाः
उच्चावचाश्चबहवोनानावर्णाविषोल्बणाः।घोराश्चपरिघप्रख्यादंदशूकामहाबलाः।प्रपेतुरग्नावुरगामातृवा
ग्दंडपीडिताः॥ इत्यादिपर्वणिसर्पसत्रे शौनकउवाच सर्पसत्रेतदाराज्ञःपांडवेयस्यधीमतः।ज
नमेजयस्यकेत्वासन्नृत्विजःपरमर्षयः।केशदस्यावभूवुश्चसर्पसत्रेसुदारुणे।विषादजननेत्यर्थंपन्नगानांमह
भये।सर्वंविस्तरशस्तातभवांछंसितुमर्हति।सर्प्पसत्रविधानज्ञाविज्ञेयाःकेचसूतज सौतिरुवाच हंत
तेकथयिष्यामिनामानीहमनीषिणां।येऋत्विजःसदस्याश्चतस्यासन्नृपतेस्तदा।तत्रहोताबभूवाथब्राह्मणश्चंड

भार्गवः।च्यवनस्यान्वयेख्यातोजातोवेदविदांवरः।उद्गाताब्राह्मणोवृद्धोविद्वान्कौत्सोथजैमिनिः।ब्रह्माभव
च्छांर्गरवोथाध्वर्युश्चापिपिंगलः।~~असितोदेवलश्चैव~~सदस्यश्चाभवद्व्यासः पुत्रशिष्यसहायवान्।उद्दालकः
प्रमतकःश्वेतकेतुश्चपिंगलः।असितोदेवलश्चैवनारदःपर्वतस्तथा।आत्रेयःकुंडजठरौद्विजःकालघटस्त
था।वात्स्यःश्रुतश्रवावृद्धोजपस्वाध्यायशीलवान्।कोहलोदेवशर्माचमौद्गल्यःसमसौरभः।एतेचान्येचबह
वोब्राह्मणावेदपारगाः।सदस्याश्चाभवंस्तत्रसत्रेपारिक्षितस्यह।जुह्वत्स्वृत्विक्ष्वथतदासर्पसत्रेमहाक्र
तौ।अहयःप्रापतंस्तत्रघोराःप्राणिभयावहाः।वसामेदोवहाःकुल्यानागानांसंप्रवर्तिताः।ववौगंधश्चतु
मुलोदह्यतामनिशंतदा।पततांचैवनागानांधिष्ठितानांतथांबरे।अश्रूयतानिशंशब्दःपच्यतांचाग्निनाभृशं।
तक्षकस्तुसनागेंद्रःपुरंदरनिवेशनं।गतःश्रुत्वैवराजानंदीक्षितंजनमेजयं।ततःसर्वंयथावृत्तमाख्याय
भुजगोत्तमः।अगच्छच्छरणंभीतस्त्वागस्कृत्वापुरंदरं।तमिंद्रःप्राहसुप्रीतोनतवास्तीहतक्षक।भयंनागेंद्रत
स्माद्वैसर्पसत्रात्कदाचन।प्रसादितोमयापूर्वंतवार्थायपितामहः।तस्मात्तवभयंनास्तिव्येतुतेमानसोज्वरः
॥ सौतिरुवाच ॥एवमाश्वासितस्तेनततःसभुजगोत्तमः।उवासभवनेतस्मिन्शक्रस्यमुदितःसुखी।

आ० प०
८२

अजस्रंनिपतत्स्वग्नौनागेषुभृशदुःखितः।अल्पशेषपरीवारोवासुकिःपर्य्यतप्यत।कश्मलंचाविशद्घोरं
वासुकिंपन्नगोत्तमं।सघूर्णमानहृदयोभगिनीमिदमब्रवीत्।दह्यंत्यंगानिमेभद्रेनदिशःप्रतिभांतिचासी
दामीवचसंमोहाद्घूर्णतीवचमेमनः।दृष्टिर्भ्राम्यतिमेतीवहृदयंदीर्यतीवच।पतिष्याम्यवशोद्याहंतस्मि
न्दीप्तेविभावसौ।पारिक्षितस्ययज्ञोसौवर्त्ततेस्मज्जिघांसया।व्यक्तंमयापिगंतव्यंप्रेतराजनिवेशनं।अ
यंसकालःसंप्राप्तोयदर्थमसिमेस्वसः।जरत्कारोमयादत्तात्रायस्वास्मान्सबांधवान्।आस्तीकःकिल
यज्ञंतंवर्त्तंतंभुजगोत्तमे।प्रतिषेत्स्यतिमांपूर्वंस्वयमाहपितामहः।तद्वत्सेब्रूहिवत्सस्त्वंकुमारंवृद्धसंमितं।
ममाद्यत्वंसभृत्यस्यमोक्षार्थवेदवित्तमं इत्यादिपर्व्वणिसर्पसत्रे ५१ सौतिरुवाच ॥
ततआहूयपुत्रंस्वंजरत्कारुर्भुजंगमा।वासुकेर्नागराजस्यवचनादिदमब्रवीत्।अहंतवपितुःपुत्रभ्रात्रादत्ता
निमित्ततः।कालःसचायंसंप्राप्तस्तत्कुरुष्वयथातथं॥ आस्तीकउवाच ॥किंनिमित्तंममपितुर्दत्ता
त्वंमातुलेनमेतन्ममाचक्ष्वतत्त्वेनश्रुत्वाकर्त्तास्मितत्तथा। सौतिरुवाच ततआचष्टसातस्मैबांध
वानांहितैषिणी।भगिनीनागराजस्यजरत्कारुरविक्लवा जरत्कारुरुवाच पन्नगानामशेषाणां

८२

माताकद्रूरितिश्रुता।तयाशप्तारुषितयासुतायस्मान्निबोधतत्।उच्चैःश्रवाःसोश्वराजोयन्मिथ्यानकृतो
मम।विनतार्थीयपणितेदासभावायपुत्रकाः।जनमेजयस्यवोयज्ञेधक्ष्यत्यनिलसारथिः।तत्रपंचत्वमाप
न्नाःप्रेतलोकंगमिष्यथ।तांचशपन्तींदेवःसाक्षाल्लोकपितामहः।एवमस्त्वितितद्वाक्यंप्रोवाचानुममोद
च।वासुकिश्चापितछ्रुत्वापितामहवचस्तदा।अमृतेमथितेतातदेवाञ्छरणमीयिवान्।सिद्धार्थाश्चसुराःस
र्वेप्राप्यामृतमनुत्तमम्।भ्रातरम्मेपुरस्कृत्यपितामहमुपागमन्।तेतंप्रसादयामासुःसुराःसर्वेब्जसंभवं
।राज्ञावासुकिनासार्द्धंशापोसौनभवेदिति देवाऊचुः वासुकिर्नागराजोयंदुःखितोज्ञातिकार
णात्।अभिशापःसमातुस्तुभगवन्नभवेत्कथं ब्रह्मोवाच जरत्कारुर्जरत्कारुंयांभार्यांसमवा
प्स्यति।तत्रजातोद्विजःशापान्मोक्षयिष्यतिपन्नगान्।एतछ्रुत्वातुवचनंवासुकिःपन्नगोत्तमः।प्रादान्मा
ममरप्रख्यंतवपित्रेमहात्मने।प्रागेवानागतेकालेतस्मात्त्वंमय्यजायथाः।अयंसकालःसंप्राप्तोभयात्त्रा
तुमर्हसि।भ्रातरंचापिमेतस्मात्त्रातुमर्हसिपावकात्।नमोघंतुकृतंनस्याद्यदहंतवधीमते।पित्रेदत्तावि
मोक्षार्थंकथंवापुत्रमन्यसे सौतिरुवाच एवमुक्तस्तथेत्युक्त्वासोस्तीकोमातरंतदा।अब्रवीद्दुःख

आ०प०
८२

संतप्तंवासुकिंजीवयन्निव।अहंत्वांमोक्षयिष्यामिवासुकेपन्नगोत्तम।तस्माच्छापान्महासत्वसत्यमे
तद्ब्रवीमिते।भवस्वस्थमनानागनहितेविद्यतेभयं।प्रयतिष्येतथाराजन्यथाश्रेयोभविष्यति।नमे
वागनृतंप्राहस्वैरेष्वपिकुतोन्यथा।तंवैनृपवरंगत्वादीक्षितंजनमेजयं।वाग्भिर्मंगलयुक्ताभिस्तोष
यिष्येद्यमातुल।यथासयज्ञोनृपतेर्निर्वर्त्स्यतिसत्तम।ससंभावयनागेंद्रमयिसर्वंमहामते।नतेमयि
मनोजातुमिथ्याभवितुमर्हति वासुकिरुवाच आस्तीकपरिघूर्णामिहृदयंमेविदीर्यते।दिशो
नप्रतिजानामिब्रह्मदंडनिपीडितः आस्तीकउवाच नसंतापस्त्वयाकार्यःकथंचित्पन्नगोत्तम।
प्रदीप्ताग्नेःसमुत्पन्नंनाशयिष्यामितेभयं।ब्रह्मदंडंमहाघोरंकालाग्निसमतेजसं।नाशयिष्यामिमात्र
त्वंभयंकाषीःकथंचन सौतिरुवाच ततःसवासुकेर्घोरमपनीयमनोज्वरं।आधायचात्मनोंगे
भुजगामत्वरितोभृशं।जनमेजयस्यतंयज्ञंसर्वैःसमुदितंगुणैः।मोक्षायभुजगेंद्राणामास्तीकोद्विजसत्त
म८।सगत्वापश्यदास्तीकोयज्ञायतनमुत्तमं।वृतंसदस्यैर्बहुभिःसूर्यवह्निसमप्रभैः।सतत्रवारितोद्वा
स्थैःप्रविशन्द्विजसत्तमः।अभितुष्टावतंयज्ञंप्रवेशार्थीपरंतपः।संप्राप्ययज्ञायतनंवरिष्ठंद्विजोत्तमः

८२

पुण्यकृतांवरिष्ठः।तुष्टावराजानमनंतकीर्त्तिमृत्विक्सदस्यांश्चतथैवचाग्निं इत्यादिपर्वणिसर्पसत्रे
॥ ५२ आस्तीकउवाच सोमस्ययज्ञोवरुणस्ययज्ञःप्रजापतेर्यज्ञआसीत्प्रयागे।तथायज्ञोयं
तवभारताग्र्यपारिक्षितस्वस्तिनोस्तुप्रियेभ्यः।यमस्ययज्ञोहरिमेधसश्चतथायज्ञोरंतिदेवस्यराज्ञः।त
थायज्ञोयंतवभारताग्र्यपारिक्षितस्वस्तिनोस्तुप्रियेभ्यः।गयस्ययज्ञःशशबिंदोश्चराज्ञोयज्ञस्तथावैश्र
वणस्यराज्ञः।तथायज्ञोयंतवभारताग्र्यपारिक्षितस्वस्तिनोस्तुप्रियेभ्यः।नृगस्ययज्ञस्त्वजमीढस्यचासी
द्यथायज्ञोदाशरथेश्चराज्ञः।तथायज्ञोयंतवभारताग्र्यपारिक्षितस्वस्तिनोस्तुप्रियेभ्यः।यज्ञःश्रुतोदि
विदेवस्यसूनोर्युधिष्ठिरस्याजमीढस्यराज्ञः।तथायज्ञोयंतवभारताग्र्यपारिक्षितस्वस्तिनोस्तुप्रियेभ्यः।
कृष्णस्ययज्ञःसत्यवत्याःसुतस्यस्वयंचकर्मप्रचकारयत्र।तथायज्ञोयंतवभारताग्र्यपारिक्षितस्वस्तिनो
स्तुप्रियेभ्यः॥इमेचतेसूर्यसमानवर्च्चसःसमासतेवृत्रहणःक्रतुंयथा।नैषांज्ञातुंविद्यतेज्ञानमद्यदत्तंये
भ्योनप्रणश्येत्कदाचित्॥ऋत्विक्समोनास्तिलोकेषुचैवद्वैपायनेनेतिविनिश्चितंमे।एतस्यशिष्याहिक्षि
तिंचरंतिसर्वर्त्विजःकर्मसुस्वेषुदक्षाः।विभावसुश्चित्रभानुर्महात्माहिरण्यरेताविश्वभुक्कृष्णवर्त्मा।प्र

दक्षिणावर्त्तशिखः प्रदीप्तो हव्यं तवेदं हुतभुग्गृह्णिदेवः।नेह त्वदन्यो विद्यते जीवलोके समो नृपः पालयि
ता प्रजानां।धृत्या वते प्रीतमनाः सदाहं त्वं वा वरुणो धर्मराजोपमो वा।शक्रः साक्षाद्वज्रपाणिर्यथेह त्राता
ता लोके त्वं तथेह प्रजानां।मतस्त्वन्नः पुरुषेंद्रेह लोके न च त्वदन्यो भूपतिरस्ति यज्ञे।खट्वांगनाभागदि
लीपकल्पय यातिमांधातृसमप्रभावः।आदित्यतेजः प्रतिमानतेजा भीष्मो यथा राजशिशुव्रतस्त्वा वा
ल्मीकिवत्ते निभृतं स्ववीर्यं वसिष्ठवत्ते नियतश्च कोपः।प्रभुत्वमिंद्रत्वसमं मतं मे द्युतिश्च नारायणव
द्विभाति।यमो यथा धर्मविनिश्चयज्ञः कृष्णो यथा सर्वगुणोपपन्नः।श्रियां निवासोसि यथा वसूनां नि
धानभूतोसि तथा क्रतूनां।दंभोद्भवेनासि समो बलेन रामो यथा शस्त्रविदस्त्रविद्य।और्वत्रिताभ्यामसि
तुल्यतेजा दुःप्रेक्षणीयोसि भगीरथेन सौतिरुवाच एवं स्तुतास्सर्व एव प्रसन्ना राजा सदस्याश्च

त्विजो हव्यवाहः।तेषां दृष्ट्वा भावितानीगितानि प्रोवाच राजा जनमेजयोथ इत्यादि पर्वणि सर्प
सत्रे ५३ जनमेजयउ बालोप्ययं स्थविर इवाव भाषते नायं बालः स्थविरोयं मतो मे।इच्छा
म्यहं वरमस्मै प्रदातुं तन्मे विप्राः संविदध्वं यथावत् सदस्या ऊचुः बालोपि विप्रो मान्य एवेह रा

ज्ञांविद्वान्योवैसपुनर्वैयथावत्।सर्वान्कामांस्त्वत्तएववाहिनेद्ययथाचनस्तक्षकएतिशीघ्रं सौति
रुवाच व्याहर्तुकामेवरदेनृपेद्विजंवरंवृणीष्वेतिततोभ्युवाच।होतावाक्यंनातिहृष्टांतरात्माकर्मण्य
स्मिंस्तक्षकोनैतितावत् जनमेजयउ यथाचेदंकर्मसमाप्यतेमेयथाचवैतक्षकएतिशीघ्रं।त
थाभवंतःप्रयतंतुसर्वेपरंशक्त्यासहिमेविद्विषाणः॥ ऋत्विजऊचुः ॥यथाशास्त्राणिनःप्राहुः
यथाशंसतिपावकः।इंद्रस्यभवनेराजंस्तक्षकोभयपीडितः।यथासूतोलोहिताक्षोमहात्मापौराणिको
वेदितवान्पुरस्तात्।सराजानंप्राहपृष्टस्तदानींयथाहुर्विप्रास्तद्वदेतन्नृदेव।पुराणमागम्यततोब्रवी
म्यहंदत्तंतस्माभयमिंद्रेणराजन्।वसेहत्वंमत्सकाशेसुगुप्तोनपावकस्त्वांप्रदहिष्यतीति।एतच्छ्रुत्वादी
क्षितस्तप्यमानआस्तेहोतारंचोदयन्कर्मकाले।होताचयत्तोस्याजुहावाथमंत्रैरथोमहेंद्रःस्वयमाज
गाम।विमानमारुह्यमहानुभावःसर्वैर्देवैपरिसंस्तूयमानः।बलाहकैश्चाप्यनुगम्यमानोविद्याधरैर
प्सरसांगणैश्च।तस्योत्तरीयेनिहितःसनागोभयोद्विग्नःशर्मनैवाभ्यगच्छत्।ततोराजामंत्रविदोब्रवीत्पु
नःक्रुद्धोवाक्यंतक्षकस्यांतमिच्छन् जनमेजयउ इंद्रस्यभवनेविप्रायदिनागःसतक्षकः।तमिंद्रे

लोवसहितंपातयध्वंविभावसौ   सौतिरुवाच   जनमेजयेनराज्ञानुनोदितस्तक्षकंप्रति।होताजुहु
वतत्रस्थस्तक्षकंपन्नगंतथा।हूयमानेतथाचैवतक्षकःसपुरंदरः।आकाशेददृशेचैवक्षणेनव्यथितस्त
दा।पुरंदरस्तंयज्ञंदृष्ट्वोरुभयमाविशत्।हित्वातुतक्षकंत्रस्तःस्वमेवभवनंययौ।इंद्रेगतेतुराजेंद्रतक्ष
कोभयमोहितः।मंत्रशक्त्यापावकार्चिःसमीपमवशोगतः   ऋत्विजऊचुः   वर्त्ततेतवराजेंद्र
कर्मैतद्विधिवत्प्रभो।अस्मैतुद्विजमुख्यायवरंत्वंदातुमर्हसि   जनमेजयउ   बालाभिरूपस्यतव
प्रमेयंवरंप्रयच्छामियथानुरूपं।वृणीष्वयत्तेभिमतंहृदिस्थितंतत्तेप्रदास्याम्यपिचेददेयं   ऋत्विज
ऊचुः   अयमायातितूर्णंसतक्षकस्तेवशंनृप।श्रूयतेस्यमहान्नादोनदतोभैरवंरवं।नूनंमुक्तोवज्रभृता
सनागोभ्रष्टोनाकान्मंत्रविस्रस्तकायः।घूर्णन्नाकाशेनष्टसंज्ञोभ्युपैतितीव्रान्निश्वासान्निश्वसन्पन्नगेंद्रः
॥ सौतिरुवाच ॥पतिष्यमाणेनागेंद्रेतक्षकेजातवेदसि।इदमंतरमित्येवंतदास्तीकोभ्यचोदयत्॥
आस्तीकउ   वरंददासिचेन्मह्यंवृणोमिजनमेजय।सत्रंतेविरमत्वेतन्नपतेयुरिहोरगाः।एवमुक्त
स्तदातेनब्रह्मन्पारिक्षितस्तुसः।नातिहृष्टमनाश्चेदमास्तीकंवाक्यमब्रवीत्।सुवर्णंरजतंगाश्चयच्चान्य

न्नन्यस्तेविभो।तत्रेदद्यांवरंविप्रननिवर्त्तेत्क्रतुर्मम आस्तीकउ सुवर्णरजतंगाश्चनत्वांराजन्वृ
णोम्यहं।सत्रंतेविरमत्वेतत्स्वस्तिमातृकुलस्यनः॥ सौतिरुवाच आस्तीकेनैवमुक्तस्तुराजापारि
क्षितस्तदा।पुनःपुनरुवाचेदमास्तीकंवदतांवरं।अन्यंवरयभद्रंतेवरंद्विजवरोत्तम।अयाचतनचाप्यनं
वरंसम्यृगुनंदन।ततोवेदविदस्तातसदस्याःसर्वएवतं।राजानमूचुःसहितालभतांब्राह्मणोवरम्॥
इत्यादिपर्वण्यास्तीकेआस्तीकवरप्रदानम् ५४ शौनकउवाच येसर्पाःसर्पसत्रेस्मिन्
पतिताहव्यवाहने।तेषांनामानिसर्वेषांश्रोतुमिच्छामिसूतज॥ सौतिरुवाच ॥सहस्राणिबहू
न्यस्मिन्प्रयुतान्यर्बुदानिच।नशक्यंपरिसंख्यातुंबहुत्वाद्द्विजसत्तम।यथास्मृतितुनामानिपन्नगानांनिबो
धमे।नीलरक्तान्सितान्घोरान्महाकायान्विषोल्वणान्।अवशान्मातृवाग्दंडपीडितान्कृपणान्हुतान्।को
टिकोमानसःपूर्णःशलःपालोहलीमकः।पिच्छलःकौणपश्चक्रःकालवेगःप्रकालनः।हिरण्यबाहुःश
रणःकक्षकःकालदंतकः।एतेवासुकिजानागाःप्रविष्टाहव्यवाहने।अन्येचबहवोविप्रतथावैकुलसं
भवाः।प्रदीप्ताग्नौहुताःसर्वेघोररूपामहाबलाः।तक्षकस्यकुलेजातान्प्रवक्ष्यामिनिबोधतान्।पुच्छांडकोमं

डुलकः।पिंडसेक्तारमेणकः।उछिखः शरभोभंगोविल्वतेजाविरोहणः।शिलीशलकरोमूकः सुकुमारः प्र
वेपनः।मुद्गरः शिशुरोमाच सुरोमाचमहाहनुः।एतेतक्षकजानागाः प्रविष्टाहव्यवाहनं।पारावतः पारियात्रः
पांडरोहरिणःकृशः।विहंगःशरभोमेदः प्रमोदः संहतापनः।ऐरावतकलादेते प्रविष्टाहव्यवाहनं।कौरव्य
कुलजान्नागान् शृणुमेत्वंद्विजोत्तम।एरकःकुंडलोवेणीवेणीस्कंधःकुमारकः।बाहुकः शृंगवेरश्चधूर्तकःप्रा
तरांतकौ।कौरव्यकुलजास्त्वेते प्रविष्टाहव्यवाहनं।धृतराष्ट्रकुलेजातान् शृणुनागान्यथातथं।कीर्त्यमानान्म
याब्रह्मन्वातवेगान्विषोल्बणान्।शंकुकर्णःपिठरकःकुठारसुखसेवकौ।पूर्णांगदःपूर्णमुखःप्रहासःशकुनि
र्दरिः।अमाहठःकामठकःसुषेणोमानसोव्ययः।भैरवोमुंडवेदांगःपिशंगश्चोद्रपारकः।ऋषभोवेगवान्नागः
पिंडारकमहाहनूः।रक्तांगःसर्वसारंगःसमृद्धपटवासकौ।वराहकोवीरणकःसुचित्रश्चित्रवेगिकः।पराश
रस्तरुणकोमणिःस्कंधस्तथारुणिः।इतिनागामयाब्रह्मन्कीर्तिताःकीर्तिवर्द्धनाः।प्राधान्येनवहुत्वात्तुन
सर्वेपरिकीर्तिताः।एतेषांप्रसवोयश्चप्रसवस्यचसंततिः।नशक्यंपरिसंख्यातुंयेदीप्तंपावकंगताः।सप्त
शीर्षाद्विशीर्षाश्चदशशीर्षास्तथापरे।कालानलविषाघोराहुताःशतसहस्रशः।महाकायामहावेगाःशै

लश्रृंगसमुछ्रुयाः।योजनायामविस्ताराद्वियोजनसमायताः।कामरूपाःकामबलाःदीप्तानलविषोल्व
णाः।दग्धास्तत्रमहासत्रेब्रह्मदंडनिपीडिताः इत्यादिपर्वण्यास्तीके ५५ सौतिरुवाच
इदमत्यद्भुतंचान्यदास्तीकस्यानुशुश्रुम।तथावरैश्छंद्यमानेराज्ञापारिक्षितेनहि।इंद्रहस्तात्च्युतोनागः
खएवयदतिष्ठत।ततश्चिंतापरोराजावभूवजनमेजयः।हूयमानेभृशंदीप्तेविधिवद्वसुरेतसि।नस्मसप्रा
पतद्वह्नौतक्षकोभयपीडितः॥ शौनकउ ॥किंसूततेषांविप्राणांमंत्रग्रामोमनीषिणां।नप्रत्यभा
त्तदाग्नौयत्सपपातनतक्षकः॥ सौतिरुवाच तमिंद्रहस्ताद्विस्रस्तंविसंज्ञंपन्नगोत्तमं।आस्तीक
स्तिष्ठतिष्ठेतिवाचस्तिस्रोभ्युदीरयन्।तिर्यक्स्थःसोंतरिक्षेचहृदयेनविदूयता।यथातिष्ठतिवैकश्चिन्खंच
गोवांतरानरः।ततोराजाब्रवीद्वाक्यंसदस्यैश्चोदितोभृशं।काममेतद्भवत्वेवंयथास्तीकस्यभाषितं।समाप्य
तामिदंकर्मपन्नगाःसंत्वनामयाः।प्रीयतामयमास्तीकःसत्यंसूतवचोस्तुतत्।ततोहलहलाशब्दःप्रीतिदः
समजायत।आस्तीकस्यवरेदत्तेतथैवोपररामच।सयज्ञःपांडवेयस्यराज्ञःपारिक्षितस्यह।प्रीतिमांश्चाभ
वद्राजाभारतोजनमेजयः।ऋत्विग्भ्यःससदस्येभ्योयेतत्रासन्समागताः।तेभ्यश्चप्रददौवित्तंशतशोथसह

आ०प०
८६

स्वग्राः। लोहिताक्षायसूतायतथास्थपतयेविभुः। येनोक्तंतस्यतत्राग्रेसर्पसत्रनिवर्त्तने। निमित्तंब्राह्मण
इतितस्मैदत्तंददौवसु। दत्वाद्रव्यंयथान्यायंभोजनाच्छादनान्वितं। प्रीतस्तस्मैनरपतिरप्रमेयपराक्रमः। त
तश्चकारावभृथंविधिदृष्टेनकर्मणा। आस्तीकंप्रेषयामासगृहानेवसुसत्कृतं। राजाप्रीतमनाःप्रीतंकृत
कृत्यंमनीषिणं। पुनरागमनंकार्यमितिचैनंवचोब्रवीत्। भविष्यसिसदस्योमेवाजिमेधेमहाक्रतौ। तथे
त्युक्त्वाप्रदुद्रावतदास्तीकोमुदायुतः। कृत्वास्वकार्यमतुलंतोषयित्वाचपार्थिवं। सगत्वापरमप्रीतोमातु
लंमातरंचतां। अभिगम्योपसंगृह्ययथावृत्तंन्यवेदयेत्॥ सौतिरुवाच ॥ एतच्छ्रुत्वाप्रीयमाणाःसमे
तायेतत्रासन्पन्नगावीतमोहाः। आस्तीकेवैप्रीतिमंतोबभूवुरूचुश्चैनंवरमिष्टंवृणीष्व। भूयोभूयःसर्वशस्ते
ब्रुवंस्त्वंकिंतेप्रियंकरवामाद्यविद्वन्। प्रीतावयंमोक्षिताश्चैवसर्वेकामंकिंतेकरवामाद्यवत्स ॥ आस्तीक
उवाच ॥ सायंप्रातर्येप्रसन्नात्मरूपालोकेविप्रामानवायेपरेपि। धर्माख्यानंयेपठेयुर्ममेदंतेषांयुष्मन्नै
वकिंचिद्भयंस्यात्। तैश्चाप्युक्तोभागिनेयःप्रसन्नैरेतत्सत्यंकाममेवंवरंते। प्रीत्यायुक्ताःकामितंसर्वशस्तेकर्त्ता
रःस्मप्रवणाभागिनेय। असितंचार्तिमंतंचसुनीथंचापियःस्मरेत्। दिवावायदिवारात्रौनास्यसर्पभयंभवेत्।

योजरत्कारुणाजातोजरत्कारौमहायशाः।आस्तीकःसर्पसत्रेवःपन्नगान्योभ्यरक्षत।तंस्मरंतंमहाभा
गानवैहिंसितुमर्हथ।सर्पापसर्पभद्रंतेगछसर्पमहाविषः।जनमेजयस्ययज्ञांतेआस्तीकवचनंस्मर।आ
स्तीकस्यवचःश्रुत्वायःसर्पोननिवर्त्तते।शतधाभिद्यतेमूर्द्धाशिंशवृक्षफलंयथा॥ सूतउवाच ॥
सएवमुक्तस्तुतदाद्विजेंद्रःसमागतैस्तैर्भुजगेंद्रमुख्यैः।संप्राप्यप्रीतिंविपुलांमहात्माततोमनोगमनायाद्ध
दध्रे॥मोक्षयित्वातुभुजगान्सर्पसत्राद्द्विजोत्तमः।जगामकालेधर्मात्मादिष्टांतंपुत्रपौत्रवान्॥इत्याख्यानंम
यास्तीकंयथावत्तवकीर्त्तितं।यत्कीर्त्तयित्वासर्पेभ्योनभयंविद्यतेक्वचित्।यथाकथितवान्ब्रह्मन्प्रमतिः
पूर्वजस्तवपुत्रायरुरवेप्रीतःपृछतेभार्गवोत्तम।यद्दृष्टवांश्चाहमपितथाचकथितंमया।आस्तीकस्य
कवेर्विप्रश्रीमच्चरितमादितः।श्रुत्वाधर्मिष्ठमाख्यानमास्तीकंपुण्यवर्द्धनं।यन्मांत्वंपृष्टवान्ब्रह्मन्श्रुत्वाडुं
डुभभाषितं।व्येतुतेसुमहद्ब्रह्मन्कौतूहलमरिंदम इत्यादिपर्वणिसर्पसत्रेसमाप्तम् ५८
शौनकउवाच भृगुवंशात्प्रभृत्येवत्वयामेकीर्त्तितंमहत्।आख्यानमखिलंतातसौतेप्रीतोस्मितेनतेव
क्ष्यामिचैवभूयस्त्वांयथावत्सूतनंदन।याःकथाव्याससंपन्नास्ताश्चभूयःप्रचक्ष्वमे।तस्मिन्परमदुःपारेसर्प

सत्रेमहात्मनः।कर्मांतरेषुयज्ञस्यसदस्यानांतथाध्वरे।याबभूवुःकथाश्चित्रायेचार्थेषुयथातथं।त्वत्तःइ
च्छामहेश्रोतुंसौतेत्वंवैप्रचक्ष्वनः सौतिरुवाच कर्मांतरेषुकथयन्द्विजावेदाश्रयाःकथाः।व्या
सस्त्वकथयच्चित्रमाख्यानंभारतंमहत् शौनकउ महाभारतमाख्यानंपांडवानांयशस्करं।जन
मेजयेनपृष्टःसन्कृष्णद्वैपायनस्तदा।श्रावयामाससविधिवत्तदाकर्मांतरेतुसः।तामहंविधिवत्पुण्यांश्रो
तुमिच्छामिवैकथां।मनःसागरसंभूतांमहर्षेर्भावितात्मनः।कथयस्वसतांश्रेष्ठनहितृप्यामिसूतज
सौतिरुवाच हंततेकथयिष्यामिमहदाख्यानमुत्तमं।कृष्णद्वैपायनमतंमहाभारतमादितः।शृ
णुसर्वमशेषेणकथ्यमानंमयाद्विज।शंसितुंतन्महान्हर्षोममापीहप्रवर्त्तते इत्यादिपर्वणिकथा
बंधः ५७ सौतिरुवाच श्रुत्वातुसर्पसत्रायदीक्षितंजनमेजयं।अभ्यगच्छदृषिर्विद्वान्कृष्णद्वै
पायनस्तदा।जनयामासयंकालीशक्तेःपुत्रात्पराशरात्।कन्यैवयमुनाद्वीपेपांडवानांपितामहं।जातमा
त्रश्चयःसद्यइष्ट्यादेहमवीवृधत्।वेदांश्चाधिजगेसांगान्सेतिहासान्महायशाः।यन्नातितपसाकश्चिन्नवे
दाध्ययनेनच।नव्रतैर्नोपवासैश्चनप्रसूत्यानमन्युना।विव्यासैकंचतुर्धायोवेदंवेदविदांवरः।परावर

८७

ज्ञो ब्रह्मर्षिः कविः सत्यव्रतः शुचिः। यः पांडुं धृतराष्ट्रं च विदुरं चाप्यजीजनत्। शांतनोः संततिं तन्वन् पुण्यकी-
र्त्तिर्महायशाः। जनमेजयस्य राजर्षेः स महात्मा सदस्तदा। विवेश सहितः शिष्यैर्वेदवेदांगपारगैः। तत्र राजा-
नमासीनं ददर्श जनमेजयं। वृतं सदस्यैर्बहुभिर्देवैरिव पुरंदरं। तथा मूर्द्धाभिषिक्तैश्च नानाजनपदेश्वरैः॥
ऋत्विग्भिर्ब्रह्मकल्पैश्च कुशलैर्यज्ञसंस्तरे। जनमेजयस्तु राजर्षिर्दृष्ट्वा तमृषिमागतं। सगणोभ्युद्ययौ तूर्णं
प्रीत्या भरतसत्तमः। कांचनं विष्टरं तस्मै सदस्यानुमतः प्रभुः। आसनं कल्पयामास यथा शक्रो बृहस्पतेः।
तत्रोपविष्टं वरदं देवर्षिगणपूजितं। पूजयामास राजेंद्रः शास्त्रदृष्टेन कर्मणा। पाद्यमाचमनीयं च अर्घ्यं
गां च विधानतः। पितामहाय कृष्णाय तदर्हाय न्यवेदयेत्। प्रतिगृह्य तु तां पूजां पांडवान् जनमेजयात्। गां चै-
व समनुज्ञाय व्यासः प्रीतोभवत्तदा। तथा च पूजयित्वा तं प्रणयात्प्रपितामहं। उपोपविश्य प्रीतात्मा पर्य-
पृच्छदनामयं। भगवानपि तं दृष्ट्वा कुशलं प्रतिवेद्य च। सदस्यैः पूजितः सर्वैः सदस्यान् प्रत्यपूजयत्। ततस्तु
सहितः सर्वैः सदस्यैर्जनमेजयः। इदं पश्चाद् द्विजश्रेष्ठं पर्यपृच्छत्कृतांजलिः जनमेजय उ॰ कुरूणां
पांडवानां च भवान्प्रत्यक्षदर्शिवान्। तेषां चरितमिच्छामि कथ्यमानं त्वया द्विज। कथं समभवद्भेदस्तेषामक्लि-

श्री०प०
८८

ष्टकर्म्मिणां। तच्च युद्धं कथं वृत्तं भूतांतकरणं महत्। पितामहानां सर्व्वेषां दैवेनाविष्टचेतसां। कार्त्स्न्येनैत
न्ममाचक्ष्व यथावृत्तं द्विजोत्तम॥ सौतिरुवाच ॥तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनस्तदा। शशास शिष्य
मासीनं वैशंपायनमंतिके॥ व्यास उवाच ॥कुरूणां पांडवानां च यथा भेदोभवत्पुरा। तदस्मै सर्वमाचक्ष्व यन्म
त्तः श्रुतवानसि। गुरोर्व्वचनमाज्ञाय स तु विप्रर्षभस्तदा। आचचक्षे ततः सर्वमितिहासं पुरातनं। राज्ञे तस्मै सद
स्येभ्यः पार्थिवेभ्यश्च सर्वशः। भेदं सर्वविनाशं च कुरुपांडवयोस्तदा इत्यादिपर्वणि कथानुबंधे ५८
वैशंपायन उवाच गुरवे प्राङ्नमस्कृत्य मनोबुद्धिसमाधिभिः। संपूज्य च द्विजान्सर्वान्स्तथान्यान्विदु
षो जनान्। महर्षेर्विश्रुतस्येह सर्वलोकेषु धीमतः। प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यास्य महात्मनः। श्रोतुं पात्रं
च राजंस्त्वं प्राप्येमां भारतीं कथां। गुरोर्वक्त्रपरिस्पंदो मनः प्रोत्साहतीव मे। शृणु राजन्यथा भेदः कुरुपांडवयोरभू
त्। राज्यार्थे द्यूतसंभूतो वनवासस्तथैव च। यथा च युद्धमभवत्पृथिवीक्षयकारकं। तत्तेहं कथयिष्यामि पृच्छते ८८
भरतर्षभ। मृते पितरि ते वीरा वनादेत्य स्वमंदिरं। न चिरादेव विद्वांसो वेदे धनुषि चाभवत्। तांस्तथा रूपवीर्यौजः
संपन्नान्पौरसंमतान्। नामृष्यन्कुरवो दृष्ट्वा पांडवाञ्छ्रीयशोभृतः। ततो दुर्योधनः क्रूरः कर्णश्च सह सौबलः।

तेषांनिग्रहनिर्वासान्विविधांस्तेसमारभन्।यदावत्थविषंयापीभीमायधृतराष्ट्रजः।जरयामासतद्वीरःसहा
न्नेनैववृकोदरः।प्रमाणकोट्यांसंसुप्तंपुनर्बध्वावृकोदरं।तोयेषुभीमंगंगायाःप्रक्षिप्यपुनमागजत्।यदावि
बुद्धःकौन्तेयःस्तदासंछिद्यबंधनं।उदतिष्ठन्महाबाहुर्भीमसेनोगतव्यथः।आशीविषैःकृष्णसर्पैःसुप्तंचैन
मदंशयत्।सर्वेष्वेवांगदेशेषुनममारचशत्रुहा।तेषांतुविप्रकारेषुतेषुतेषुमहामतिः।मोक्षणेप्रतिकारेच
विदुरेणवहितोभवत्।स्वर्गस्थोजीवलोकस्ययथाशक्रःसुखावहः।पांडवानांतथानित्यंविदुरोपिसुखावहः।
यदातुविविधोपायैःसंवृतैर्विविधैरपि।नाशकद्विनिहंतुंतान्दैवभाव्यर्थरक्षितान्।ततःसंमंत्र्यसचिवैःकर्ण
दुःशासनादिभिः।धृतराष्ट्रमनुज्ञाप्यजातुषंगृहमादिशत्।सुतप्रियैषीतान्राजापांडवानंबिकासुतः।ततोविवा
सयामासराज्यभोगबुभुक्षया।तेप्रातिष्ठंतसहितानगरान्नागसाह्वयात्।प्रस्थानेचाभवन्मंत्रीक्षत्तातेषांमहा
त्मनां।तेनमुक्ताजतुगृहान्निशीथेप्राद्रवन्वनं।ततःसंप्राप्यकौंतेयानगरंवारणावतं।न्यवसंतमहात्मानोमा
त्रासहपरंतपाः।धृतराष्ट्रेणचाज्ञप्ताउषिताजातुषेगृहे।पुरोचनाद्रक्षमाणाःसंवत्सरमतंद्रिताः।सुरुंगांका
रयित्वातुविदुरेणप्रचोदिताः।आदीप्यजातुषंवेश्मदग्ध्वाचैवपुरोचनं।प्राद्रवन्भयसंविग्नामात्रासहपरं

नपाः।ददृशुर्द्दारुणंरक्षोहिडिंबंवननिर्झरे।हत्वाचतंराक्षसेंद्रंभीताःसमनुबोधनात्।निशिसंप्राद्रवन्पार्था
धार्त्तराष्ट्रभयार्द्दिताः।एकचक्रांततोगत्वापांडवाःशंसितव्रताः।वेदाध्ययनसंपन्नास्तेभवन्ब्रह्मचारिणः।
तेतत्रनियताःकालंकंचिद्भुनरर्षभाः।मात्रासहैकचक्रायांब्राह्मणस्यनिवेशने।तत्राससादक्षुधितंपुरु
षादंवृकोदरः।भीमसेनोमहाबाहुर्बकंनाममहाबलं।तंचापिपुरुषव्याघ्रोबाहुवीर्येणपांडवः।निहत्यत
रसावीरोनागरान्पर्यसांत्वयत्।ततस्तेशुश्रुवुःकृष्णांपांचालेषुस्वयंवरां।श्रुत्वाचैवाभ्यगच्छंतगत्वाचैवाल
भंततां।तेतत्रद्रौपदींलब्ध्वापरिसंवत्सरोषिताः।विदिताहास्तिनपुरंप्रत्याजग्मुररिंदमाः।तउक्ताधृतराष्ट्रेण
राज्ञाशांतनवेनच।भ्रातृभिर्विग्रहस्तातकथंवोनभवेदिति।अस्माभिःखांडवप्रस्थेयुष्मद्वासोनुचिंतितः।तस्माज्ज
नपदोपेतंसुविभक्तमहापथं।वासायखांडवप्रस्थंव्रजध्वंगतमत्सराः।तयोस्तेवचनाज्जग्मुःसहसर्वैःसुहृज्जनैः।
नगरंखांडवप्रस्थंरत्नान्यादायसर्वशः।तत्रतेन्यवसन्पार्थाःसंवत्सरगणान्बहून्।वशेशस्त्रप्रतापेनकुर्वंतो
न्यान्महीभृतः।एवंधर्मप्रधानास्तेसत्यव्रतपरायणाः।अप्रमत्तोत्थिताःक्षांताःप्रतपंतोऽहितान्बहून्।अजय
द्भीमसेनस्तुदिशंप्राचींमहायशाः।उदीचीमर्जुनोवीरःप्रतीचींनकुलस्तथा।दक्षिणांसहदेवस्तुविजिग्येपर

वीरहा।एवंचक्रुरिमांसर्वेवशेकृत्स्नांवसुंधरां।पंचभिःसूर्यसंकाशैःसूर्येणचविराजता।षट्सूर्येवाभवत्पृथ्वी
पांडवैःसत्यविक्रमैः।ततोनिमित्तेकस्मिंश्चिद्धर्मराजोयुधिष्ठिरः।वनंप्रस्थापयामासतेजस्वीसत्यविक्रमः।प्रा
णेभ्योपिप्रियतरंभ्रातरंसव्यसाचिनं।अर्जुनंपुरुषव्याघ्रंस्थिरात्मानंगुणैर्युतं।सवैसंवत्सरंपूर्णंमासंचैकं
वनेवसत्।ततोगच्छद्धृषीकेशंद्वारवत्यांकदाचन।लब्धवांस्तत्रबीभत्सुर्भार्यांराजीवलोचनां।अनुजांवासुदे
वस्यसुभद्रांभद्रभाषिणीं।साशचीवमहेंद्रेणश्रीःकृष्णेनेवसंगता।सुभद्रायुयुजेप्रीतापांडवेनार्जुनेन
ह।अतर्पयच्चकौंतेयःखांडवेहव्यवाहनं।बीभत्सुर्वासुदेवेनसहितोनृपसत्तम।नातिभारोहिपार्थस्यके
शवेनसहाभवत्।व्यवसायसहायस्यविष्णोःशत्रुवधेष्विव।पार्थायाग्निर्ददौचापिगांडीवंधनुरुत्तमं।इषु
धीचाक्षयैर्बाणैरथंचकपिलक्षणं।मोक्षयामासबीभत्सुर्मयंयत्रमहासुरं।सचकारसभांदिव्यांसर्वरत्न
समाचितां।तस्यांदुर्योधनोमंदोलोभंचक्रेसुदुर्मतिः।ततोक्षैर्वंचयित्वाचसौबलेनयुधिष्ठिरं।वनंप्रस्थाप
यामाससप्तवर्षाणिपंचच।अज्ञातमेकंराष्ट्रेचततोवर्षंत्रयोदशं।ततश्चतुर्दशेवर्षेयाचमानाःस्वकंवसु
।नालभंतमहाराजततोयुद्धमवर्त्तत।ततस्तेक्षत्रमुत्साद्यहत्वादुर्योधनंनृपं।राज्यंविहितभूयिष्ठंप्रत्यपद्यंत

पांडवाः।एवमेतत्पुरावृत्तंतेषामक्लिष्टकर्मणां।भेदोराज्यविनाशश्चजयश्चजयतांवर इत्यादिपर्व
णिकुरुपांडवचरितेसप्ताध्यायः ५९ जनमेजयउ कथितंवैसमासेनत्वयासर्वंद्विजोत्तम।
महाभारतमाख्यानंकुरूणांचरितंमहत्।कथांत्वनघचित्रार्थांकथयस्वतपोधन।विस्तरश्रवणेजातंकौ
तूहलमतीवमे।सभवान्विस्तरेणेमांपुनराख्यातुमर्हति।नहितृप्यामिपूर्वेषांशृण्वानश्चरितंमहत्।नतत्का
रणमल्पंवैधर्मज्ञायत्रपांडवाः।अवध्यान्सर्वशोजघ्नुःप्रशस्यन्तेचमानवैः।किमर्थंतेनरव्याघ्राःशक्ताःस
न्तोह्यनागसः।प्रयुज्यमानान्संक्लेशान्क्षांतवंतोदुरात्मनां।कथंनागायुतप्राणोबाहुशालीवृकोदरः।परि
क्लिश्यन्नपिक्रोधंधृतवान्वैद्विजोत्तमः।कथंसाद्रौपदीकृष्णाक्लिश्यमानादुरात्मभिः।~~कथंधर्मसुतोधर्मेपि~~
~~धर्मविदा~~ शक्तासतीधार्त्तराष्ट्रान्नादहत्क्रोधचक्षुषा।कथंव्यसनिनंद्यूतेपार्थौमाद्रीसुतौतदा।अन्वयु
स्तेनरव्याघ्रावाध्यमानादुरात्मभिः।कथंधर्मभृतांश्रेष्ठःसुतोधर्मस्यधर्मवित्।अनर्हःपरमंक्लेशंसोढवा
न्सयुधिष्ठिरः।कथंचबहुलाःसेनापांडवःकृष्णसारथिः।अस्यन्नेकोनयत्सर्वाःपितृलोकंधनंजयः।एतदाच
क्ष्वमेसर्वंयथावृत्तंतपोधन।यद्यच्चक्रुस्तवंतस्तेतत्रतत्रमहारथाः॥ वैशंपायनउ ॥क्षणंकुरुमहाराजवि

पुलोयमनुक्रमः।पुण्याख्यानस्यवक्तव्यः कृष्णद्वैपायनेरितः।महर्षेःसर्वलोकेषुपूजितस्यमहात्मनः।प्रव
क्ष्यामिमतंकृत्स्नंव्यासस्यामिततेजसः।इदंशतसहस्रंहिश्लोकानांपुण्यकर्मणां।सत्यवत्यात्मजेनेहव्याख्या
तममितौजसा।यइदंश्रावयेद्विद्वान्येचेदंशृणुयुर्नराः।तेब्रह्मणःस्थानमेत्यप्राप्नुयुर्देवतुल्यतां।इदंहिवे
दैःसमितंपवित्रमपिचोत्तमं।श्रव्याणामुत्तमंचेदंपुराणमृषिसंस्तुतं।अस्मिन्नर्थश्चकामश्चनिखिलेनोपदे
क्ष्यते।इतिहासेमहापुण्येबुद्धिश्चपरिनैष्ठिकी।अक्षुद्रान्दानशीलांश्चसत्यशीलानानास्तिकान्।कार्ष्णवेद
मिमंविद्वाञ्छ्रावयित्वार्थमश्नुते।भ्रूणहत्याकृतंचापिपापंजह्यादसंशयं।इतिहासमिमंश्रुत्वापुरुषोपि
सुदारुणः।मुच्यतेसर्वपापेभ्योराहुणाचंद्रमायथा।जयोनामेतिहासोयंश्रोतव्योविजिगीषुणा।महींविज
यतेराजाशत्रूंश्चापिपराजयेत्।इदंपुंसवनंश्रेष्ठमिदंस्वस्त्ययनंमहत्।महिषीयुवराजाभ्यांश्रोतव्यंबहुश
स्तथा।वीरंजनयतेपुत्रंकन्यांवाराज्यभागिनीं।धर्मशास्त्रमिदंपुण्यमर्थशास्त्रमिदंपरं।मोक्षशास्त्रमिदंप्रो
क्तंव्यासेनामितबुद्धिना।संप्रत्याचक्षतेचेदंतथाश्रोष्यंतिचापरे।पुत्राःशुश्रूषवःसंतिप्रेष्याश्चप्रियकारिणः।
शरीरेणकृतंपापंवाचाचमनसैवच।सर्वंसंत्यजतिक्षिप्रंयइदंशृणुयान्नरः।भारतानांमहज्जन्मशृण्वतां।

मनुस्यनां।नास्तिव्याधिभयंतेषांपरलोकभयंकुतः। धन्यंयशस्यमायुष्यंपुण्यंस्वर्ग्यंतथैवच।कृष्णद्वै
पायनेनेवंकृतंपुण्यचिकीर्षुणा।कीर्त्तिंप्रथयतालोकेपांडवानांमहात्मनां।अन्येषांक्षत्रियाणांचभूरिद्रवि
णतेजसां।सर्वविद्यावदातानांलोकेप्रथितकर्मणां।यइदंमानवोलोकेपुण्यार्थेब्राह्मणांछुचीन्।श्रावये
तमहापुण्यंतस्यधर्मःसनातनः।कुरूणांप्रथितंवंशंकीर्त्तयन्सततंशुचिः।वंशमाप्नोतिविपुलंलोके
पूज्यतमोभवेत्।योधीतेभारतंपुण्यंब्राह्मणोनियतंव्रतः।चतुरोवार्षिकान्मासान्सर्वपापैःप्रमुच्यते।
विज्ञेयःसचवेदानांपारगोभारतंपठन्।देवराजर्षयोह्यत्रपुण्याब्रह्मर्षयस्तथा।कीर्त्यंतेधूतपाप्मानः
कीर्त्यतेकेशवस्तथा।भगवांश्चापिदेवेशोयत्रदेवीचकीर्त्यते।अनेकजननोयत्रकार्त्तिकेयस्यसंभवः।
ब्राह्मणानांगवांचैवमाहात्म्यंयत्रकीर्त्यते।सर्वश्रुतिसमूहोयंश्रोतव्योधर्मबुद्धिभिः।यइदंश्रावयेद्वि
द्वान्ब्राह्मणानिहपर्वसु।धूतपाप्माजितःस्वर्गोब्रह्मगच्छतिशाश्वतं।श्रावयेद्ब्राह्मणांछ्राद्धेयश्चेमंपाद
मंततः।अक्षय्यंतस्यतच्छ्राद्धमुपावर्त्तेत्पितॄनिह।अह्नायदेनःक्रियतेइंद्रियैर्मनसापिवा।ज्ञानादज्ञान
तोवापिप्रकरोतिनरश्चयत्।तन्महाभारताख्यानंश्रुत्वैवप्रविलीयते।भरतानांमहज्जन्ममहाभार

नमुच्यते।निरुक्तमस्ययोवेदसर्वपापैःप्रमुच्यते।भरतानांयतश्चायमितिहासोमहाद्भुतः।महतो
ह्येनसोमर्त्यान्मोचयेदनुकीर्त्तितः।त्रिभिर्वर्षैर्लब्धकामःकृष्णद्वैपायनोमुनिः।नित्योत्थितःशुचिःश
क्तोमहाभारतमादितः।तपोनियममास्थायकृतमेतन्महर्षिणा।तस्मान्नियमसंयुक्तैःश्रोतव्यंब्रा
ह्मणैरिदं।कृष्णप्रोक्तामिमांपुण्यांभारतीमुत्तमांकथां।श्रावयिष्यन्तियेविप्रायेचश्रोष्यन्तिमानवाः।स
र्वथावर्त्तमानावैनतेशोच्याःकृताकृतैः।नरेणधर्मकामेनसर्वःश्रोतव्यइत्यपि।निखिलेनेतिहासोयं
ततःसिद्धिमवाप्नुयात्।नतांस्वर्गगतिंप्राप्यतुष्टिंप्राप्नोतिमानवः।यांश्रुत्वैवमहापुण्यमितिहासमुप
श्रुते।श्रृण्वन्श्राद्धःपुण्यशीलःश्रावयंश्चेदमद्भुतं।नरःफलमवाप्नोतिराजसूयाश्वमेधयोः।यथास
मुद्रोभगवान्यथामेरुर्महागिरिः।उभौख्यातौरत्ननिधीतथाभारतमुच्यते।इदंहिवेदैःसमितंपवित्रम
पिचोत्तमं।श्रव्यंश्रुतिसुखंचैवपावनंशीलवर्द्धनं।यइदंभारतंराजन्वाचकायप्रयच्छति।तेनसर्वामहीदत्ता
भवेत्सागरमेखला।पारिक्षितकथांदिव्यांपुण्यायविजयायच।कथ्यमानांमयाकृत्स्नांश्रृणुहर्षकरीमि
मां।त्रिभिर्वर्षैःसदोत्थायीकृष्णद्वैपायनोमुनिः।महाभारतमाख्यानंकृतवानिदमद्भुतं।धर्मेचार्थेचकामेच

मोक्षेचभरतर्षभ।यदिहास्तितदन्यत्रयन्नेहास्तिनतत्क्वचित्   इत्यादिपर्वणिभारतप्रशंसा ६
वैशं॰   राजोपरिचरोनामधर्मनित्योमहीपतिः।बभूवमृगयांगंतुंसदाकिलधृतव्रतः।सचेदिविषयं
रम्यंवसुःपौरवनंदनः।इंद्रोपदेशाज्जग्राहरमणीयंमहीपतिः।तमाश्रमेन्यस्तशस्त्रंनिवसंतंतपोनिधिं।दे
वाःशक्रपुरोगावैराजानमुपतस्थिरे।इंद्रत्वमर्होराजायंतपसेत्यनुचिंत्यवै।तंसांत्वेननृपंसाक्षात्तपसः
संन्यवर्तयन्॥ देवाऊचुः ॥नसंकीर्येतधर्मोयंपृथिव्यांपृथिवीपते।त्वयाहिधर्मोविधृतःकृ
त्स्नंधारयतेजगत् इंद्रउवाच ॥लोकेधर्मंपालयत्वंनित्ययुक्तःसमाहितः।धर्मयुक्तस्ततोलोका
न्पुण्यानाप्स्यसिशाश्वतान्।दिविष्ठस्यभुविष्ठस्त्वंसखाभूतोममप्रियः।रम्यःपृथिव्यांयोदेशस्तमाव
सनराधिप।पशव्यश्चैवपुण्यश्चप्रभूतधनधान्यवान्।स्वारक्ष्यश्चैवसौम्यश्चभोग्यैर्भूमिगुणैर्युतः।अर्थ
वानेषदेशोहिधनरत्नादिभिर्युतः।वसुपूर्णाचवसुधावसचेदिषुचेदिप।धर्मशीलाजनपदाःसुसंतोषा
श्चसाधवः।नचमिथ्याप्रलापोत्रस्वैरेष्वपिकुतोन्यथा।नचपित्राविभज्यंतेपुत्रागुरुहितेरताः।युंजतेधु
रिनोगाश्चकृशाःसंधुक्षयंतिच।सर्ववर्णाःस्वधर्मस्थाःसदाचेदिषुमानद।नतेस्त्यविदितंकिंचित्त्रिषु

लोकेषुयद्भवेत्।देवोपभोग्यंदिव्यंत्वामाकाशेस्फाटिकंमहत्।आकाशगंत्वांमद्दत्तंविमानमुपपत्स्य
ते।त्वमेकःसर्वमर्त्येषुविमानवरमास्थितः।चरिष्यस्युपरिस्थोहिदेवोविग्रहवानिव।ददामितेवैज
यंतींमालामम्लानपंकजां।धारयिष्यतिसंग्रामेयात्वांशस्त्रैरविक्षतं।लक्षणंचैतदेवेहभविताते नराधि
प।इंद्रमालेतिविख्यातंधन्यमप्रतिमंमहत्।यष्टींचवैणवींतस्मैददौवृत्रनिषूदनः।इष्टप्रदानमुद्दिश्यशि
ष्टानांप्रतिपालिनीं।तस्याःशक्रस्यपूजार्थंभूमौभूमिपतिस्तदा।प्रवेशंकारयामासगतेसंवत्सरेतदात
तःप्रभृतिचाद्यापियष्टेःक्षितिपसत्तमैः।प्रवेशःक्रियतेराजन्यथातेनप्रवर्त्तितः।अपरेद्युस्ततस्तस्याःक्रि
यतेसुच्छ्रयोनृपैः।अलंकृतायाःपिटकैर्गंधैर्माल्यैश्चभूषणैः।माल्यदामपरिक्षिप्ताविधिवत्क्रियतेपिच।
भगवान्पूज्यतेचात्रहंसरूपीमहेश्वरः।स्वयमेवगृहीतेनवसोःप्रीत्यामहात्मनः।सतांपूजांमहेंद्रस्तुदृ
ष्ट्वाकृतांशुभां।वसुनाराजमुख्येनप्रीतिमानब्रवीत्प्रभुः।येपूजयिष्यंतिनराःराजानश्चमहंमम।का
रयिष्यंतिचमुदायथाचेदिपतिर्नृपः।तेषांश्रीर्विजयश्चैवसराष्ट्राणांभविष्यति।तथास्फीतोजनपदो
मुदितश्चभविष्यति।एवंमहात्मनातेनमहेंद्रेणनराधिप।वसुःप्रीत्यामघवतामहाराजोभिसत्कृतः।

आ०प०
८२

उत्सवंकारयिष्यंतिसदाशक्रस्ययेनराः।भूमिरत्नादिभिर्दानैस्तथापूज्याभवंतिते।वरदानमहायज्ञैस्तथा
शक्रोत्सवेनच।संपूजितोमघवतावसुश्चेदीश्वरोनृप४।पालयामासधर्मेणचेदिस्थःपृथिवीमिमां।इंद्र
प्रीत्याचेदिपतिश्चकारेंद्रमहंवसुः।पुत्राश्चास्यमहावीर्याःपंचाशन्नमितौजसः।नानाराज्येषुचसुतान्सस
म्राडभ्यषेचयत्।महारथोमागधानांविश्रुतोयोबृहद्रथः।प्रत्यग्रहःकुशांबश्चयमाहुर्मणिवाहनं।मा
वेल्लश्चयदुश्चैवराजन्यश्चापराजितः।एतेतस्यसुताराजन्राजर्षेर्भूरितेजसः।न्यवेशयन्नामभिःस्वैस्तेदे
शांश्चपुराणिच।वासवाःपंचराजानःपृथग्वंशाश्चशाश्वताः।वसंतमिंद्रप्रासादेआकाशेस्फाटिकेचतं।
उपतस्थुर्महात्मानंगंधर्वाप्सरसोनृपं।राजोपरिचरेत्येवंनामतस्याथविश्रुतं।पुरोपवाहिनींतस्यनदीं
शुक्तिमतींगिरिः।अरौत्सीच्चेतनायुक्तःकामात्कोलाहलःकिल।गिरिंकोलाहलंतंतुपदावसुरताडयत्।
निश्चक्रामनतस्तेनप्रहारविवरेणसा।तस्यांनद्यामजनयन्मिथुनंपर्वतःस्वयं।तस्माद्विमोक्षणात्प्रीतानदी र ३
राज्ञेन्यवेदयत्।यःपुमानभवत्तत्रतंसराजर्षिसत्तम४।वसुर्वसुप्रदश्चक्रेसेनापतिमरिंदमः।चकारपत्नीं
कन्यांतुतथातांगिरिकांनृपः।वसोःपत्नीतुगिरिकाकामकालंन्यवेदयत्।ऋतुकालमनुप्राप्तास्नातापुंस

वनेपुण्येधिकविक्रमे। तदहःपितरश्चैनमूचुर्जहिमृगानिति। तंराजसत्तमंप्रीताःतदामतिमतांवरं। सपितॄणांनियोगं
तमनतिक्रम्यपार्थिवः। चचारमृगयांकामीगिरिकामेवसंस्मरन्। अतीवरूपसंपन्नांसाक्षाच्छ्रियमिवाप
रां। तस्यरेतःप्रचस्कंदचरतोगहनेवने। स्कन्नमात्रंचतद्रेतोवृक्षपत्रेणभूमिपः। प्रतिजग्राहमिथ्यामेनपतेदृ
तइत्युत। इदंमिथ्यापरिस्कन्नंरेतोमेनभवेदिति। ऋतुश्चतस्याःपत्न्यामेनमोघःस्यादितिप्रभुः। संचिंत्यैवंतदा
राजाविचार्यचपुनःपुनः। अमोघत्वंचविज्ञायरेतसोराजसत्तमः। शुक्रप्रस्थापनेकालंमहिष्याःप्रसमीक्ष्यवै।
अभिमंत्र्याथतच्छुक्रमारात्तिष्ठन्तमाशुगं। सूक्ष्मधर्मार्थतत्वज्ञोगत्वाश्येनंततोब्रवीत्। मत्प्रियार्थमिदंसौम्य
शुक्रंममगृहंनय। गिरिकायाःप्रयच्छाशुतस्याह्यार्त्तवमद्यवै। गृहीत्वातत्तदाश्येनस्तूर्णमुत्पत्यवेगवान्।
जवंपरममास्थायप्रदुद्रावविहंगमः। तमपश्यदथायांतंश्येनंश्येनस्तथापरः। अभ्यद्रवच्चतंसद्योदृष्ट्वैवा
मिषशंकया। तुंडयुद्धमथाकाशेतावुभौसंप्रचक्रतुः। युध्यतोरपतद्रेतस्तच्चापियमुनांभसि। तत्राद्रिकेतिवि
ख्याताब्रह्मशापाद्वराप्सराः। मीनभावमनुप्राप्ताबभूवयमुनाचरी। श्येनपादपरिभ्रष्टंतद्वीर्यमथवासवं। ज
ग्राहतरसोपेत्यसाद्रिकामत्स्यरूपिणी। कदाचिदपिमत्सींतांबबंधुर्मत्स्यजीविनः। मासेचदशमेप्राप्तेतदा

आ०प०
८४

भरतसत्तम।तज्जज्ञेकुरुदराज्ञस्याः स्त्रीपुमांसंचमानुषं।आश्चर्यभूतंतद्गृत्वाराज्ञेथप्रत्यवेदयत्।कायेम
त्स्याद्द्वौराजन्संभूतौमानुषाविति।तयोःपुमांसंजग्राहराजोपरिचरस्तदा।समत्स्योनामराजासीद्धा
र्मिकःसत्यसंगरः।साप्सरामुक्तशापाचक्षणेनसमपद्यत।यापुरोक्ताभगवतातिर्यग्योनिगताशुभा।
मानुषौजनयित्वात्वंशापमोक्षमवाप्स्यसि।ततःसाजनयित्वातौविशस्तामत्स्यघातिना।संत्यज्यमत्स्यरू
पंसादिव्यंरूपमवाप्यसा।सिद्धर्षिचारणपथंजगामाथवराप्सराः।सकन्यादुहितातस्यामत्स्यामत्स्यज
गंधिनी।राज्ञादत्ताचदासायकन्येयंतेभवत्विति।रूपसत्वसमायुक्तासर्वैःसमुदितागुणैः।सातुसत्यवती
नाममत्स्यजात्यभिसंश्रयात्।आसीत्सामत्स्यगंधैवकंचित्कालंशुचिस्मिता।शुश्रूषार्थंपितुर्नावंवाहयं
तींजलेचतां।तीर्थयात्रांपरिक्रामन्नपश्यद्वैपराशरः।अतीवरूपसंपन्नांसिद्धानामपिकांक्षितां।दृष्ट्वैव
वसतांधीमांश्चकमेचारुहासिनीं।दिव्यांतांवासवीकन्यांरंभोरुंमुनिपुंगवः।संगमंममकल्याणिकुरु
ष्वेत्यभभाषत।साब्रवीत्पश्यभगवन्पारावारेस्थितानृषीन्।आवयोर्दृष्टयोरेभिःकथंनुस्यात्समागमः।
एवंतयोक्तोभगवान्नीहारमसृजत्प्रभुः।येनदेशःससर्वस्तुतमोभूतइवाभवत्।दृष्ट्वासृष्टंतुनीहारंततस्तं

परमर्षिणा।विस्मितासाभवत्कन्याव्रीडिताचतपस्विनी सत्यवत्युवाच विद्धिमांभगवकन्यांसदा
पितृवशानुगां।त्वत्संयोगाच्चदुष्येतकन्याभावोममानघ।कन्यात्वेदूषितेचापिकथंशक्ष्येद्विजोत्तम।गृहंगं
तुमृषेचाहंधीमन्नस्थातुमुत्सहे।एतत्संचिंत्यभगवन्विधत्स्वयदनंतरं।एवमुक्तवतींतांतुप्रीतिमानृषिस
त्तमः।उवाचमत्प्रियंकृत्वाकन्यैवत्वंभविष्यसि।वृणीष्वचवरंभीरुयंत्वमिच्छसिभामिनि।वृथाहिनप्रसादो
मेभूतपूर्वःशुचिस्मिते।एवमुक्तावरंवव्रेगात्रसौगंध्यमुत्तमं।सचास्यैभगवान्प्रादान्मनसःकांक्षितंप्रभुः।
ततोलब्धवराप्रीतास्त्रीभावगुणभूषिता।जगामसहसंसर्गमृषिणाद्भुतकर्मणा।तेनगंधवतीत्येवंनामास्याः
प्रथितंभुवि।तस्यास्तुयोजनाद्गंधमाजिघ्रंतनराभुवि।तस्यायोजनगंधेतिततोनामापरंस्मृतं।पराशरोपि
भगवान्जगामस्वंनिवेशनं।इतिसत्यवतीहृष्टालब्ध्वावरमनुत्तमं।पराशरेणसंयुक्तासद्योगर्भमवापसा।
जज्ञेचयमुनाद्वीपेपाराशर्यःसवीर्यवान्।समातरमुपस्थायतपस्येवमनोदधे।स्मृतोहंदर्शयिष्यामिकृ
त्येष्वितिचसोब्रवीत्।एवंद्वैपायनोयज्ञेसत्यवत्यांपराशरात्।न्यस्तोद्वीपेसयद्बालस्तस्माद्द्वैपायनःस्मृतः।
पादापसारिणंधर्मंसतुविद्वान्युगेयुगे।आयुःशक्तिंचमर्त्यानांयुगानुगमवेक्ष्यह।ब्रह्मणोब्राह्मणानां

चनथानुग्रहकांक्षया॥विव्यासवेदान्यस्मात्सतस्माद्व्यासइतिस्मृतः।वेदानध्यापयामासमहाभारतपं
चमान्।सुमंतुंजैमिनिंपैलंशुकंचैवस्वमात्मजं।प्रभुर्वरिष्ठोवरदोवैशंपायनमेवचा।संहितास्तैःपृथक्त्वे
नभारतस्यप्रकाशिताः।तथाभीष्मःशांतनवोगंगायाममितद्युतिः।वसुवीर्यात्समभवन्महावीर्योमहाय
शाः।वेदार्थविच्चभगवान्ऋषिर्विप्रोमहायशाः।शूलेप्रोतःपुराणर्षिरचौरश्चौरसंख्यया।अणीमांडव्यइत्येवंवि
ख्यातःसुमहायशाः।सधर्ममाहूयपुरामहर्षिरिदमुक्तवान्।इषीकयाममयाबाल्याद्विद्धाह्येकाशकुंतिका।त
त्किल्बिषंस्मरेधर्मनान्यंपापमहंकृतं।तन्मेसहस्रसमितंकस्मान्नेहाजयत्तपः।गरीयान्ब्राह्मणवधस्सर्व
भूतवधाद्यतः।तस्मात्त्वंकिल्बिषीधर्मशूद्रयोनौजनिष्यसि।तेनशापेनधर्मोपिशूद्रयोनावजायत।विद्व
न्विदुररूपेणधार्मीतनुरकिल्बिषी।संजयोमुनिकल्पस्तुजज्ञेसूतोगवल्गणात्।सूर्याच्चकुंतिकन्यायांजज्ञे
कर्णोमहाबलः।सहजंकवचंबिभ्रत्कुंडलोद्योतिताननः।अनुग्रहार्थंलोकानांविष्णुर्लोकनमस्कृतः।वसुदे
वात्तुदेवक्यांप्रादुर्भूतोमहायशाः।अनादिनिधनोदेवःसकर्त्ताजगतःप्रभुः।अव्यक्तमक्षरंब्रह्मप्रधानंत्रिगु
णात्मकं।आत्मानमव्ययंचैवप्रकृतिंप्रभवंप्रभुं।पुरुषंविश्वकर्माणंसत्वयोगंध्रुवाक्षरं।अनंतमचलंदेवं

हंसंनारायणंप्रभुं।धातारमव्यक्तंयमाहुःपरमव्ययं।कैवल्यंनिर्गुणंविश्वमनादिमजमव्ययं।पुरुषःसवि
भुःकर्त्तासर्वभूतपितामहः।धर्मसंवर्द्धनार्थायप्रजज्ञेंधकवृष्णिषु।अस्त्रज्ञौतुमहावीर्यौसर्वशास्त्रविशार
दौ।सात्यकिःकृतवर्माचनारायणमनुव्रतौ।सत्यकाद्धृदिकाच्चैवजज्ञातेस्त्रविशारदौ।भरद्वाजस्यचस्कंन्नं
द्रोण्यांशुक्रमवर्द्धत।महर्षेरुग्रतपसस्तस्माद्द्रोणोप्यजायत।गौतमान्मिथुनंजज्ञेशरस्तंवाच्छरद्वतः।अश्व
त्थाम्नश्चजननीकृपश्चैवमहावलः।अश्वत्थामाततोजज्ञेद्रोणादेवमहावलः।तथैवधृष्टद्युम्नोपिसाक्षाद
ग्निसमद्युतिः।वैतानेकर्म्मणिततेपावकात्समजायत।वीरोद्रोणविनाशायधनुरादायवीर्यवान्।तत्रै
ववेद्यांकृष्णापिजज्ञेतेजस्विनीशुभा।विभ्राजमानावपुषाविभ्रतीरूपमुत्तमं।प्रह्लादशिष्योनग्नजित्सु
वलश्चाभवत्ततः।तस्यप्रजाधर्महंत्रीजज्ञेदेवप्रकोपनात्।गंधारराजपुत्रोभूच्छकुनिःसौवलस्तथा।दुर्यो
धनस्यजननीजज्ञातेर्थविशारदौ।कृष्णद्वैपायनाज्जज्ञेधृतराष्ट्रोजनेश्वरः।क्षेत्रेविचित्रवीर्यस्यपांडुश्चैव
महावलः।धर्मार्थकुशलोधीमान्मेधावीधूतकल्मषः।विदुरःशूद्रयोनौतुजज्ञेद्वैपायनादपि।पांडोस्तु
जज्ञिरेपंचपुत्रादेवसमाःपृथक्।द्वयोःस्त्रियोर्गुणज्येष्ठस्तेषामासीद्युधिष्ठिरः।धर्माद्युधिष्ठिरोजज्ञेमारु

ताच्चवृकोदरः।इंद्राद्धनंजयःश्रीमान्सर्वशस्त्रभृतांवरः।जज्ञातेरूपसंपन्नावश्विभ्यांचयमावपि।नकुलः
सहदेवश्चगुरुशुश्रूषणेरतौ।तथापुत्रशतंयज्ञेधृतराष्ट्रस्यधीमतः।दुर्योधनप्रभृतयोयुयुत्सुःकर
णस्तथा।ततोदुःशासनश्चैवदुःसहश्चापिभारत।दुर्मर्षणोविकर्णश्चचित्रसेनोविविंशतिः।जयःसत्यव्र
तश्चैवपुरुमित्रश्चभारत।वैश्यापुत्रोयुयुत्सुश्चएकादशमहारथाः।अभिमन्युःसुभद्रायामर्जुनादभ्यजा
यत।स्वस्त्रीयोवासुदेवस्यपौत्रःपांडोर्महात्मनः।पांडवेभ्योहिपांचाल्यांद्रौपद्यांपंचजज्ञिरे।कुमारारूप
संपन्नाःसर्वशास्त्रविशारदाः।प्रतिविंध्योयुधिष्ठिरात्सुतसोमोवृकोदरात्।अर्जुनाच्छ्रुतकीर्तिस्तुशतानी
कस्तुनाकुलिः।तथैवसहदेवाच्चश्रुतसेनःप्रतापवान्।हिडिंबायांभीमसेनाद्वनेजज्ञेघटोत्कचः।शिखं
डीद्रुपदाज्जज्ञेकन्यापुत्रत्वमागता।यांयक्षःपुरुषंचक्रेस्थूणःप्रियचिकीर्षया।कुरूणांविग्रहेतस्मिन्
समागच्छन्बहून्यथ।राज्ञांशतसहस्राणियोत्स्यमानानिसंयुगे।तेषामपरिमेयानांनामधेयानिसर्वशः।
नशक्यानिसमाख्यातुंवर्षाणामयुतैरपि।एतेनुकीर्तितामुख्यायैराख्यानमिदंततं इत्यादिपर्व
णि ६१ जनमेजयउ यएतेकीर्तिताब्रह्मन्येचान्येनानुकीर्तिताः।सम्यक्तांछ्रोतुमिच्छा

मिराजन्श्चान्यान्सहस्रशः। यदर्थमिह संभूता देवकल्पा महारथाः। भुवि तन्मे महाभाग सम्यगाख्यातु
मर्हसि वैशं रहस्यं खल्विदं राजन्देवानामिति नः श्रुतं। तत्तु ते कथयिष्यामि नमस्कृत्वा स्व
यंभुवे। त्रिसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां पुरा। जामदग्न्यस्तपस्तेपे महेंद्रे पर्वतोत्तमे। तदा निःक्ष
त्रिये लोके भार्गवेण कृते सति। ब्राह्मणान्क्षत्रिया राजन्सुतार्थिन्योभिचक्रमुः। ताभिः सह समापेतुर्ब्राह्म
णाः शंसितव्रताः। ऋतावृतौ नरव्याघ्र न कामान्नानृतौ तथा। तेभ्यश्च लेभिरे गर्भं क्षत्रियास्ताः सहस्रशः।
ततः सुषुविरे राजन्क्षत्रियान्वीर्यवत्तरान्। कुमारांश्च कुमारीश्च पुनः क्षत्राभिवृद्धये। एवं तद्ब्राह्मणैः क्ष
त्रं क्षत्रियासु तपस्विभिः। जातं वृद्धं च धर्मेण सुदीर्घेणायुषान्वितं। चत्वारोपि ततो वर्णा बभूवुर्ब्राह्मण
त्तराः ८। अभ्यगच्छन्नृतौ नारीं न कामान्नानृतौ तथा। तथैवान्यानि भूतानि तिर्यग्योनिगतान्यपि। ऋतौ दारां
स्तु गच्छंति तत्तथा भरतर्षभ। ततोवर्द्धंत धर्मेण सहस्रशतजीविनः। ताः प्रजाः पृथिवीपाल धर्मव्रतपराय
णाः। आधिभिर्व्याधिभिश्चैव विमुक्ताः सर्वशो नराः। अथेमां सागरापांगीं गां राजेंद्र गताखिलां। अध्यति
ष्ठत्पुनः क्षत्रं सशैलवनपत्तनां। प्रशासति पुनः क्षत्रे धर्मेणेमां वसुंधरां। ब्राह्मणाद्यास्ततो वर्णा लेभिरे मुद

त्तमां।कामक्रोधोद्भवान्दोषान्निरस्यचनराधिपाः।धर्मेणदंडंदंडेषुप्रणयंतोन्वयालयन्।तथाधर्म
परेलोकेसहस्राक्षःशतक्रतुः।स्वादुदेशेचकालेचववर्षेणपालयत्प्रजाः।नबालएवम्रियतेतदाकश्चि
ज्जनाधिपा।नचस्त्रियंप्रजानातिकश्चिदप्राप्तयौवनः।एवमायुष्मतीभिस्तुप्रजाभिर्भरतर्षभ।इयंसाग
रपर्यंतासमापूर्यतमेदिनी।ईजिरेचमहायज्ञैःक्षत्रियावहुदक्षिणैः।सांगोपनिषदान्वेदान्विप्राश्चाध
यतेतदा।नचविक्रीणतेतत्रब्राह्मणाःस्मतदानृपा।नचशूद्रसमाभ्यासेवेदानुच्चारयंत्युत।कारयंतः
कृषिंगोभिस्तथावैश्याःक्षिताविह।युंजतेधुरिनोगाश्चकृशांगाश्चाप्यजीवयन्।फेनपांश्चतथावत्सा
न्दुहंतिस्ममानवाः।नकूटमानैर्वणिजःपण्यंविक्रीणतेतदा।कर्माणिचनरव्याघ्रधर्मोपेतानिमान
वाः।धर्ममेवानुपश्यंतश्चक्रुर्धर्मपरायणाः।स्वकर्मनिरताश्चासन्सर्वेवर्णानराधिपा।एवंतदानरव्याघ्र
धर्मोनह्रसतेक्वचित्।कालेगावःप्रसूयंतेनार्यश्चभरतर्षभा।भवंत्यृतुषुवृक्षाणांपुष्पाणिचफलानिचाए
वंकृतयुगेसम्यग्वर्त्तमानेतदानृपा।आपूर्यतमहीकृत्स्नाप्राणिभिर्वहुभिर्भृशं।एवंसमुदितेलोकेसानु
षेभरतर्षभा।असुराजज्ञिरेक्षेत्रेराज्ञांतुमनुजेश्वरा।आदित्यैर्हितदादैत्यावहुशोनिर्जितायुधि।ऐश्वर्या

च्युतास्वर्गात्संबभूवुःक्षिताविह।इहदेवत्वमिछंतोमानुषेषुमनस्विनः।जज्ञिरेसुहिभूतेषुतेषुतेष्वसुर
विभो।गोष्वश्वेषुचराजेंद्रखरोष्ट्रमहिषेषुच।क्रव्यात्सुचैवभूतेषुगजेषुचमृगेषुच।जातैरिहमहीपालजा
यमानैश्चतैर्मही।नशशाकात्मनात्मानमिदंधारयितुंधरा।अथजातामहीपालाःकेचिद्बहुमदान्विताः
।दितेःपुत्रादनोश्चैवतदालोकइहामुत।वीर्यवंतोवलिप्तास्तेनानारूपधरामही।इमांसागरपर्यंतांपरी
युररिमर्द्दनाः।ब्राह्मणान्क्षत्रियान्वैश्यान्शूद्रांश्चैवाप्यपीडयन्।अन्यानिचैवसत्वानिपीडयामासुरोज
सा।त्रासयंतोविनिघ्नंतःसर्वभूतगणांश्चते।विचेरुःसर्वशोराजन्महींशतसहस्रशः।आश्रमस्थानमह
र्षींश्चधर्षयंतस्ततस्ततः।अब्राह्मण्यावीर्यमदामत्तामदबलेनच।एवंवीर्यबलोत्सिक्तैर्भूरियंतैर्महासु
रैः।पीड्यमानामहीराजन्ब्रह्माणमुपचक्रमे।नह्यमीभूतसत्वौघाःपन्नगाःसनगांमही।नदाधारयितुंशेकु
राक्रांतांदानवैर्बलात्।ततोमहीमहीपालभारार्त्ताभयपीडिता।जगामशरणंदेवंसर्वभूतपितामहं।सा
संवृतंमहाभागैर्देवद्विजमहर्षिभिः।ददर्शदेवंब्रह्माणंलोककर्त्तारमव्ययं।गंधर्वैरप्सरोभिश्चदेवकर्म
सुनिष्ठितैः।वंद्यमानंमुदोपेतैर्ववंदेचैनमेत्यसा।अथविज्ञापयामासभूमिस्तंशरणार्थिनी।सन्निधौलो

आ०प०
४८

कपालानांसर्वेषामेवभारत।तत्त्वधानात्मनस्तस्यभूमेःकृत्यंस्वयंभुवः।पूर्वमेवाभवद्राजन्विदितंपर
मेष्ठिनः।स्रष्टाहिजगतःकस्मान्नसंबुध्येतभारत।ससुरासुरलोकानामशेषेणमनोगतं।तामुवाचम
हाराजभूमिंभूमिपतिःप्रभुः।प्रभवःसर्वभूतानामीशःशंभुःप्रजापतिः॥ ब्रह्मोवाच ॥यदर्थम
सिसंप्राप्तामत्सकाशंवसुंधरे।तदर्थंसन्नियोक्ष्यामिसर्वानेवदिवौकसः।इत्युक्त्वासमहीदेवोब्रह्माराजन्
विसृज्यच।आदिदेशतदासर्वान्विबुधान्भूतकृत्स्वयं।अस्याभूमेर्निरसितुंभारंभागैःपृथक्पृथक्।अ
स्यामेवप्रसूयध्वंविरोधायेतिचाब्रवीत्।तथैवचसमानीयगंधर्वाप्सरसांगणान्।उवाचभगवान्सर्वा
निदंवचनमर्थवत्॥ ब्रह्मोवाच ॥स्वैःस्वैरंशैःप्रसूयध्वंयथेष्टंमानुषेषुच।अथशक्रादयःसर्वे
श्रुत्वासुरगुरोर्वचः।तथ्यमर्थ्यंचपथ्यंचवतस्यतेजगृहुस्तदा।अथतेसर्वशोंऽशैःस्वैर्गंतुंभूमिंकृतक्षणाः।
नारायणममित्रघ्नंवैकुंठमुपचक्रमुः।यःसचक्रगदापाणिःपीतवासाःशितिप्रभः।पद्मनाभःसुरारिघ्नः
पृथुवक्षांचितेक्षणः।प्रजापतिपतिर्देवःसुरनाथोमहाबलः।श्रीवत्सांकोहृषीकेशःसर्वदैवतपूजितः।
तंभुवःशोधनायेंद्रउवाचपुरुषोत्तमं।अंशेनावतरस्वेतितथेत्याहचतंहरिः॥ इत्यादिपर्वणि

४८

रणावतरणे ६४ वैशं ॥अथनारायणेनेंद्रश्चकारसहसंविदं।अवतर्तुंमहींस्वर्गादेशनःसहितः
सुरैः।आदिश्यचस्वयंशक्रःसर्वानेवदिवौकसः।निर्जगामपुनस्तस्मात्क्षयान्नारायणस्यह।तेमरारि
विनाशायसर्वलोकहितायच।अवतेरुःक्रमेणैवमहींस्वर्गाद्दिवौकसः।ततोब्रह्मर्षिवंशेषुपार्थिवर्षिकु
लेषुच।जज्ञिरेराजशार्दूलयथाकामंदिवौकसः।दानवान्राक्षसांश्चैवगंधर्वान्पन्नगांस्तथा।पुरुषादानि
चान्यानिजघ्नुःसत्वान्यनेकशः।दानवाराक्षसाश्चैवगंधर्वाःपन्नगास्तथा।नताव्बलस्थान्बाल्येपिजघ्नुर्भरत
सत्तम जनमेजयउ देवदानवसंघानांगंधर्वाप्सरसांतथा।मानवानांचसर्वेषांतथावैयक्षर
क्षसां।श्रोतुमिच्छामितत्वेनसंभवंकृत्स्नमादितः।प्राणिनांचैवसर्वेषांसंभवंवक्तुमर्हसि॥ वैशं ॥
हंततेकथयिष्यामिनमस्कृत्यस्वयंभुवे।सुरादीनामहंसम्यक्लोकानांप्रभवाप्ययं।ब्रह्मणोमानसाःपुत्रा
विदिताःषण्महर्षयः।मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः।मरीचेःकश्यपःपुत्रःकश्यपात्तुइमाःप्रजाः।
प्रजज्ञिरेमहाभागदक्षकन्यास्त्रयोदश।अदितिर्दितिर्दनुःकालादनायुःसिंहिकाइला।क्रोधाप्राधाचवि
श्वाचविनताकपिलामुनिः।कद्रूश्चमनुजव्याघ्रदक्षकन्यैवभारत।एतासांवीर्यसंपन्नंपुत्रपौत्रमनंतकं।

अदित्यां द्वादशादित्याः संभूता भुवनेश्वराः। ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत। धाता मित्रोर्यमा श
क्रो वरुणस्त्वंश एव च। भगो विवस्वान्पूषा च सविता दशमस्तथा। एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्य
ते। जघन्यजस्तु सर्वेषामादित्यानां गुणाधिकः। एक एव दितेः पुत्रो हिरण्यकशिपुः स्मृतः। नाम्ना ख्यातास्त
स्येमे पंच पुत्रा महात्मनः। प्रह्लादः पूर्वजस्तेषां संह्लादस्तदनंतरं। अनुह्लादस्तृतीयोभूत्तस्माच्च शिबिबा
ष्कलौ। प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्वत्र भारत। विरोचनश्च कुंभश्च निकुंभश्चेति भारत। विरोचनस्य
पुत्रोभूद्बलिरेकः प्रतापवान्। बलेश्च प्रथितः पुत्रो बाणो नाम महासुरः। रुद्रस्यानुचरः श्रीमान्महाकाले
ति यं विदुः। चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत। तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः। शंबरो
नमुचिश्चैव पुलोमा चेति विश्रुतः। असिलोमा च केशी च दुर्जयश्चैव दानवः। अयःशिरा अश्वशिरा अ
यःशंकुश्च वीर्यवान्। तथा गगनमूर्द्धा च वेगवान्केतुमांश्च सः। स्वर्भानुरश्वोश्वपतिर्वृषपर्वाजकस्तथा।
अश्वग्रीवश्च सूक्ष्मश्च तुहुंडश्च महासुरः। एकपादेकचक्रश्च विरूपाक्षमहोदरौ। निचंद्रश्च निकुंभश्च कुपटः
कपटस्तथा। शरभः शलभश्चैव सूर्याचंद्रमसौ तथा। एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः। अन्यौ तु

खलुदेवानांसूर्याचंद्रमसौस्मृतौ।अन्यौदानवमुख्यानांसूर्याचंद्रमसौतथा।इमेचवंश्याःप्रथिताःसत्व
वंतोमहाबलाः।दनुपुत्रामहाराजदशदानववंशजाः।एकाक्षोमृतपोवीरःप्रलंबनरकावपि।वातापीश
त्रुतपनःशठश्चैवमहासुरः।गविष्ठश्चवनायुश्चदीर्घजिह्वश्चदानवः।असंख्येयास्मृतास्तेषांपुत्राःपौत्राश्च
भारत।सिंहिकासुषुवेपुत्रंराहुंचंद्रार्कमर्द्दनं।सुचंद्रंचंद्रहंतारंतथाचंद्रप्रमर्द्दनं।क्रूरस्वभावंक्रूरायाःपु
त्रपौत्रमनंतकं।गणःक्रोधवशोनामक्रूरकर्माऽरिमर्द्दनः।दनायुषःपुनःपुत्राश्चत्वारोऽसुरपुंगवाः।विक्षरोब
लवीरौचवृत्रश्चैवमहासुरः।कालायाःप्रथिताःपुत्राःकालकल्पाःप्रहारिणः।प्रविख्यातामहावीर्यादानवे
षुपरंतपाः।विनाशनश्चक्रोधश्चक्रोधहंतातथैवच।क्रोधशत्रुस्तथैवान्येकालकेयाइतिश्रुताः।असुरा
णामुपाध्यायःशुक्रस्त्वर्षिसुतोभवत्।ख्याताश्चौशनसःपुत्राश्चत्वारोसुरयाजकाः।त्वष्टाधरस्तथात्रि
श्चद्वावन्योरौद्रकर्मिणौ।तेजसासूर्यसंकाशौब्रह्मलोकपरायणौ।इत्येषवंशःप्रभवःकथितस्तेतरस्विनां।
असुराणांसुराणांचपुराणेसंश्रुतोमया।एतेषांयदपत्यंतुनशक्यंतदशेषतः।प्रसंख्यातुंमहीपालगुणभू
तमनंतकं।तार्क्ष्यश्चारिष्टनेमिश्चतथैवगरुडारुणौ।आरुणिर्वारुणिश्चैववैनतेयाःप्रकीर्तिताः।शेषोनं

तोवासुकिश्चतक्षकश्चभुजंगमः।कूर्मश्चकुलिकश्चैवकाद्रवेयाःप्रकीर्त्तिताः।भीमसेनोग्रसेनौचसुपर्णो
वरुणस्तथा।गोपतिर्धृतराष्ट्रश्चसूर्यवर्चाश्चसप्तमः।सत्यवागर्कपर्णश्चप्रयुतश्चापिविश्रुतः।भीमश्चि
त्ररथश्चैवविख्यातःसर्वविद्वशी।तथाशालिशिराराजन्पर्जुन्यश्चचतुर्दशः।कलिःपंचदशस्तेषांनार
दश्चैवषोडशः।इत्येतेदेवगंधर्वामौनेयाःपरिकीर्त्तिताः।अथप्रभूतान्यन्यानिकीर्त्तयिष्यामिभारत।अ
नवद्यामनुवंशामसुरांमार्गणप्रियां।अरूपांसुभगांभासीमितिप्राधाव्यजायत।सिद्धिःपूर्णश्चवर्हीच
पूर्णायुश्चमहायशाः।ब्रह्मचारीरतिगुणःसुपर्णश्चैवसप्तमः।विश्वावसुश्चभानुश्चसुचंद्रोदशमस्तथा
।इत्येतेदेवगंधर्वाःप्राधान्याःपरिकीर्त्तिताः।इमंत्वप्सरसांवंशंविदितंपुण्यलक्षणं।प्राधासूतमहाभा
गादेवीदेवर्षितःपुरा।अलंबुषामिश्रकेशीविद्युत्पर्णातिलोत्तमा।अरुणारक्षितोचैवरंभातद्वन्मनोर
मा।केशिनीचसुवाहुश्चसुरतासुरजातथा।सुप्रियाचातिवाहुश्चविख्यातौचहाहाहूहू।तुंबुरुश्चेतिचत्वा
रःस्मृतागंधर्वसत्तमाः।अमृतंब्राह्मणागावोगंधर्वाप्सरसस्तथा।अपत्यंकपिलायास्तुपुराणेपरि।
कीर्त्तितं।इतितेसर्वभूतानांसंभवःकथितोमया।यथावत्संपरिख्यातोगंधर्वाप्सरसांतथा।भुजंगानांसु

पर्णानांरुद्राणांमरुतांतथा।गवांचब्राह्मणानांचश्रीमतांपुण्यकर्मणां।आयुष्यश्चैवपुण्यश्चधन्यःश्रु
तिसुखावहः।श्रोतव्यश्चैवसततंश्राव्यश्चैवानसूयया।इमंतुवंशंनियमेनयःपठेन्महात्मनांब्राह्म
णदेवसन्निधौ।अपत्यलाभंलभतेसपुष्कलंश्रियंयशःप्रेत्यचशोभनांगतिं इत्यादिपर्वणि
आवतरणे ६२ वंशं ब्रह्मणोमानसाःपुत्राविदिताःषण्महर्षयः।एकादशसुताःस्था
णोःख्याताःपरमतेजसः।मृगव्याधश्चसर्पश्चनिर्ऋतिश्चमहायशाः।अजैकपादहिर्बुध्न्यःपिनाकीच
परंतपः।दहनोथेश्वरश्चैवकपालीचमहाद्युतिः।स्थाणुर्भगश्चभगवान्रुद्राएकादशस्मृताः।मरी
चिरंगिराअत्रिःपुलस्त्यःपुलहःक्रतुः।षडेतेब्रह्मणःपुत्रावीर्यवंतोमहर्षयः।त्रयस्त्वंगिरसःपुत्रा
लोकेसर्वत्रविश्रुताः।बृहस्पतिरुतथ्यश्चसंवर्त्तश्चधृतव्रताः।अत्रेस्तुबहवःपुत्राःश्रूयंतेमनुजाधि
पासर्ववेदविदःसिद्धाःशांतात्मानोमहर्षयः।राक्षसाश्चपुलस्त्यस्यवानराःकिंनरास्तथा।यक्षाश्चम
नुजव्याघ्रपुत्रास्तस्यचधीमतः।पुलहस्यसुताराजन्शलभाश्चप्रकीर्तिताः।सिंहाःकिंपुरुषाव्याघ्रा
ऋक्षाईहामृगास्तथा।क्रतोःक्रतुसमाःपुत्राःपतंगसहचारिणः।विश्रुतास्त्रिषुलोकेषुसत्यव्रतपरा

यणाः। दक्षस्त्वजायतांगुष्ठाद्दक्षिणाद्भगवांनृषिः। ब्रह्मणः पृथिवीपाल शांतात्मा सुमहातपाः। वामाद
जायतांगुष्ठाद्भार्या तस्य महात्मनः। तस्यां पंचाशतं कन्याः स एवाजनयन्मुनिः। ताः सर्वास्त्वनवद्यांग्यः
कन्याः कमललोचनाः। पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजापतिः। ददौ स दश धर्माय सप्तविंशति
मिंदवे। दिव्येन विधिना राजन् कश्यपाय त्रयोदश। नामतो धर्मपत्न्यस्ताः कीर्त्यमानानिबोध मे। कीर्त्ति
र्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा। बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश। द्वाराण्येतानि धर्म
स्य विहितानि स्वयंभुवा। सप्तविंशतिः सोमस्य पत्न्यो लोकस्य विश्रुताः। कालस्य नयने युक्ताः सोमप
त्न्यः सुचिव्रताः। सर्वा नक्षत्रयोगिन्यो लोकयात्राविधानतः। पैतामहो मुनिर्देवस्तस्य पुत्रः प्रजापतिः।
तस्याष्टौ वसवः पुत्रास्तेषां वक्ष्यामि विस्तरं। धरो ध्रुवश्च सोमश्च अहश्चैवानिलोनलः। प्रत्यूषश्च प्रभा
सश्च ~~प्रभासस्य सुतौ स्मृतौ~~ वसवोष्टाविति स्मृताः। धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा। चंद्र
मास्तु मनस्विन्याः श्वसायाश्च श्वसनस्तथा। रतायाश्चाप्यहः पुत्रः शांडिल्याश्च हुताशनः। प्रत्यूषश्च प्रभास
श्च प्रभातायाः सुतौ स्मृतौ। धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा। ध्रुवस्य पुत्रो भगवान्कालो लोकप्र

कालनः।सोमस्यतुसुतोवर्च्चोवर्च्चस्वीयेनजायते।मनोहरायाः शिशिरःप्राणोथरमणस्तथा।अह्नःसु
तस्तथाज्योतिः समः शांतस्तथामुनिः।अग्नेःपुत्रःकुमारस्तुश्रीमाञ्छरवणालयः।तस्यशाखोविशा
खश्चनैगमेयश्चपृष्ठजः।कृत्तिकाभ्युपपन्नेश्चकार्त्तिकेयइतिस्मृतः।अनिलस्यशिवाभार्यातस्याः
पुत्रोमनोजवः।अविज्ञातगतिश्चैवद्वौपुत्रावनिलस्यतु।प्रत्यूषस्यविदुःपुत्रमृषिंनाम्नाथदेवलं।
द्वौपुत्रौदेवलस्यापिक्षमावंतौमनीषिणौ।बृहस्पतेश्चभगिनीवरस्त्रीब्रह्मवादिनी।योगशक्ताजग
त्कृत्स्नमसक्ताविचचारह।प्रभासस्यतुभार्यासावसूनामष्टमस्यह।विश्वकर्मामहाभागोजज्ञेशि
ल्पप्रजापतिः।कर्त्ताशिल्पसहस्राणांत्रिदशानांचवर्द्धकिः।भूषणानांचसर्वेषांकर्त्ताशिल्पवतांव
रः।योदिव्यानिविमानानित्रिदशानांचकारह।मनुष्याश्चोपजीवंतियस्यशिल्पंमहात्मनः।पूजयं
तिवयंनित्यंविश्वकर्माणमव्ययं।स्तनंतुदक्षिणंभित्वाब्रह्मणोनरविग्रहः।निःसृतोभगवान्धर्मःस
र्वलोकसुखावहः।त्रयस्तस्यवराःपुत्राःसर्वभूतमनोहराः।शमःकामश्चहर्षश्चतेजसालोकधारि
णः।कामस्यतुरतिर्भार्याशमस्यप्राप्तिरंगना।नंदीतुभार्याहर्षस्ययासुलोकाःप्रतिष्ठिताः।मरीचेः

कश्यपःपुत्रःकश्यपस्यसुरासुराः।जज्ञिरेनृपशार्द्दूललोकानांप्रभवस्तुसः।त्वाष्ट्रीतुसवितुर्भार्याव
डवारूपधारिणी।असूयतमहाभागासांतरिक्षेश्विनावुभौ।द्वादशैवादितेःपुत्राःशक्रमुख्यानराधि
पातेषामवरजोविष्णुर्यत्रलोकाःप्रतिष्ठिताः।त्रयस्त्रिंशतइत्येतेदेवास्तेषामहंतव।अन्वयंसंप्रव
क्ष्यामिपक्षैश्चकुलतोगणान्।रुद्राणामपरःपक्षःसाध्यानांमरुतांतथा।वसूनांभार्गवंविद्याद्विश्वे
देवांस्तथैवच।वैनतेयस्तुगरुडोबलवानरुणस्तथा।बृहस्पतिश्चभगवानादित्येष्वेवगण्यते।अ
श्विनौगुह्यकान्विद्धिसर्वौषध्यस्तथापशून्।एतेदेवगणाराजन्कीर्तितास्तेतुपूर्वशः।यान्कीर्तयि
त्वामनुजःसर्वपापैःप्रमुच्यते।ब्रह्मणोहृदयंभित्वानिःसृतोभगवान्भृगुः।भृगोःपुत्रःकविर्विद्वां
च्छुक्रःकविसुतोग्रहः।त्रैलोक्यप्राणयात्रार्थंवर्षावर्षेभयाभये।स्वयंभुवानियुक्तःसभुवनंपरि
धावति।योगाचार्योमहाबुद्धिर्दैत्यानामभवद्गुरुः।सुराणांचापिमेधावीब्रह्मचारीयतव्रतः।तस्मिन्नि
युक्तेविधिनायोगक्षेमायभार्गवे।अन्यमुत्पादयामासपुत्रंभृगुरनिंदितं।च्यवनंदीप्ततपसंधर्मात्मा
नंयशस्विनं।यःसरोषाच्च्युतोगर्भान्मातुर्मोक्षायभारत।आरुषीतुमनोःकन्यातस्यपत्नीमनीषिणः।

और्वस्तस्यांसमभवदूरुंभित्वामहायशाः।महातेजामहावीर्योबालएवगुणैर्युतः।ऋचीकस्तस्यपुत्रस्तु
जमदग्निस्ततोभवत्।जमदग्नेस्तुचत्वारश्चासन्पुत्रामहात्मनः।रामस्तेषांजघन्योभूदजघन्यैर्गुणैर्यु
तः।सर्वशस्त्रेषुकुशलःक्षत्रियांतकरोवशी।और्वस्यासीत्पुत्रशतंजमदग्निपुरोगमं।तेषांपुत्रसहस्राणिव
भूवुर्भुविविस्तरः।द्वौपुत्रौब्रह्मणस्त्वन्यौययोस्तिष्ठतिलक्षणं।लोकेधाताविधाताचयौस्थितौमनुनास
ह।तयोरेवस्वसादेवीलक्ष्मीःपद्मगृहाशुभा।तस्यास्तुमानसाःपुत्रास्तुरगाव्योमचारिणः।वरुणस्यभा
र्यायाज्येष्ठाशुक्राद्देव्यजायत।त स्याःपुत्रंबलंविद्धिसुराणांसुरनंदिनीं।प्रजानामन्नकामानाम
न्योन्यपरिभक्षणात्।अधर्मस्तत्रसंजातःसर्वभूतविनाशकः।तस्यापिनिकृतिर्भार्यानैर्ऋतायेनराक्ष
साः।घोरास्तस्यास्त्रयःपुत्राःपापकर्मरताःसदा।भयोमहाभयश्चैवमृत्युर्भूतांतकस्तथा।नतस्यभार्या
पुत्रोवाकश्चिदस्त्यंतकोहिसः।काकींश्येनींतथाभासींधृतराष्ट्रींतथाशुकीं।ताम्रातुसुषुवेदेवीपंचैतालो
कविश्रुताः।उलूकांस्तुसुषुवेकाकीश्येनीश्येनान्व्यजायत।भासीभासानजनयद्गृध्रांश्चैवजनाधिप।धृत
राष्ट्रीतुहंसांश्चकलहंसांश्चसर्वशः।चक्रवाकांश्चभद्रातुजनयामाससैवतु।शुकीचजनयामासशुका

आ०प०
१०३

नेवयशस्विनी।कल्याणगुणसंपन्नासर्वलक्षणपूजिता।नवक्रोधवशानारीः प्रजज्ञेक्रोधसंभवाः।मृगी
चमृगमंदाचहरिर्भद्रमनाअपि।मातंगीत्वथशार्दूलीश्वेतासुरभिरेवच।सर्वलक्षणसंपन्नासुरसाचैव
भामिनी।अपत्यंतुमृगाःसर्वेमृगयानरवरोत्तम।ऋक्षाश्चमृगमंदायाःसृमराश्चपरंतप।ततस्त्वैरावतं
नागंजज्ञेभद्रमनाःसुतं।ऐरावतस्सुतस्तस्यादेवनागोमहागजः।हर्य्याश्चहरयोपत्यंवानराश्चतपस्विनः।
गोलांगूलांश्चभद्रंतेहर्य्याःपुत्रान्प्रचक्षते।प्रजज्ञेत्वथशार्दूलीसिंहान्व्याघ्राननेकशः।द्वीपिनश्चमहास
त्वान्सर्वानेवनसंशयः।मातंग्यपि चमातंगानपत्यानिनराधिप।दिशांगजंतुश्वेताख्यंश्वेताजन
यदाशुगं।तथादुहितरौराजसुरभि र्वैव्यजायत।रोहिणींचैवभद्रंतुगंधर्वीतुयशस्विनीं।विम
लामपिभद्रंतेअनलामपिभारत।रोहिण्यांजज्ञिरेगावोगंधर्व्यांवाजिनःसुताः।सप्तपिंडफलान्वृक्षा
ननलापिव्यजायत।अनलायाःशुकीपुत्रीकंकस्तुसुरसासुतः।अरुणस्यभार्याश्येनीतुवीर्यवंतौम
हाबलौ।संपातिंजनयामासवीर्यवंतंजटायुषं।सुरसाजनयन्नागान्कद्रूःपुत्रांस्तुपन्नगान्।द्वौपुत्रौवि
नतायास्तुविख्यातौगरुडारुणौ।इत्येषसर्वभूतानांमहतांमनुजाधिप।प्रभवःकीर्तितःसम्यग्मयाम

१०३

तिमत्तांवरांयंश्रुत्वापुरुषःसम्यङ्मुक्तोभवतिपाप्मनः।सर्वज्ञतांचलभतेगतिमग्र्यांचविंदति ॥
इत्यादिपर्वण्यंशावतरणे ६४ जनमेजय उ० देवानांदानवानांचगंधर्वोरगरक्षसां।सिं
हव्याघ्रमृगाणांचपन्नगानांपतत्रिणां।सर्वेषांचैवभूतानांसंभवंभगवन्नहं।श्रोतुमिच्छामितत्वेन
मानुषेषुमहात्मनां।जन्मकर्मचभूतानामेतेषामनुपूर्वशः वैशं० मानुषेषुमनुष्येंद्रसंभूता
येदिवौकसः।प्रथमंदानवांश्चैवतांस्तेवक्ष्याम्यशेषतः।विप्रचित्तिरितिख्यातोयआसीद्दानवर्षभः।
जरासंधइतिख्यातःसआसीन्मनुजर्षभः।दितेःपुत्रस्तुयोराजन्हिरण्यकशिपुःस्मृतः।सजज्ञेमा
नुषेलोकेशिशुपालोनरर्षभः।संह्लादइतिविख्यातःप्रह्लादस्यानुजस्तुयः।सशल्यइतिविख्यातोज
ज्ञेवाह्लीकपुंगवः।अनुह्लादस्तुतेजस्वीयोभूत्ख्यातोजघन्यजः।धृष्टकेतुरितिख्यातःसबभूवनरेश्व
रः।यस्तुराजन्शिबिर्नामदैतेयःपरिकीर्तितः।द्रुमइत्यभिविख्यातःसआसीद्भुविपार्थिवः।वाष्कलोना
मयस्तेषामासीदसुरसत्तमः।भगदत्तइतिख्यातःसयज्ञेपुरुषर्षभः।अयःशिराअश्वशिराअयःशं
कुश्चवीर्यवान्।तथागगनमूर्द्धाचवेगवांश्चात्रपंचमः।पंचैतेजज्ञिरेराजन्वीर्यवंतोमहासुराः।के

केयेषुमहात्मानः पार्थिवर्षभसत्तमाः।केतुमानितिविख्यातोयस्ततोन्यःप्रतापवान्।अमितौजाइ
तिख्यातःसोग्रकर्मानराधिपः।स्वर्भानुरितिविख्यातःश्रीमान्यस्तुमहासुरः।उग्रसेनइतिख्यातउग्र
कर्म्मानराधिपः।यस्त्वश्वइतिविख्यातःश्रीमानासीन्महासुरः।अशोकोनामराजासीन्महावीर्योपरा
जितः।तस्मादवरजोयस्तुराजन्नश्वपतिःस्मृतः।दैतेयःसोभवद्राजाहार्दिक्योमनुजर्षभः।वृषपर्वेति
विख्यातःश्रीमान्यस्तुमहासुरः।दीर्घप्रज्ञइतिख्यातःपृथिव्यांसोभवन्नृपः।अजकस्त्ववरोराजन्य
आसीद्वृषपर्वणः।सशाल्वइतिविख्यातःपृथिव्यामभवन्नृपः।अश्वग्रीवइतिख्यातःसत्ववान्योम
हासुरः।रोचमानइतिख्यातःपृथिव्यांसोभवन्नृपः।सूक्ष्मस्तुमतिमान्राजन्कीर्त्तिमान्यःप्रकीर्त्तितः
बृहद्रथइतिख्यातःक्षितावासीत्सपार्थिवः।तुहुंडइतिविख्यातोयआसीदसुरोत्तमः।सेनाबिंदुरि
तिख्यातःसबभूवनराधिपः।इषुमान्नामयस्तेषामसुराणांबलाधिकः।नग्नजिन्नामराजासीद्भुविवि
ख्यातविक्रमः।एकचक्रइतिख्यातआसीद्यस्तुमहासुरः।प्रतिविंध्यइतिख्यातोबभूवप्रथितःक्षितौ।
विरूपाक्षस्तुदैतेयश्चित्रयोधीमहासुरः।चित्रधर्मेतिविख्यातःक्षितावासीत्सपार्थिवः।हरस्त्वरिहरो

वीरश्चासीद्योदानवोत्तमः।सुबाहुरितिविख्यातःश्रीमान्नासीत्सपार्थिवः।मुहरस्तुमहातेजाःशत्रुपक्ष
क्षयंकरः।वाह्लीकोनामराजासवभूवप्रथितःक्षितौ।निचंद्रश्चंद्रवक्रस्तुयश्चासीदसुरोत्तमः।मुंज
केशइतिख्यातःश्रीमानासीत्सपार्थिवः।निकुंभस्त्वजितःसंख्येमहामतिरजायत।भूमौभूमिपतिश्रे
ष्ठोदेवाधिपइतिस्मृतः।शरभोनामयस्तेषांदैतेयोनांमहासुरः।पौरवोनामराजर्षिःसवभूवनरोत्त
मः।द्वितीयःशलभस्तेषामसुराणांवभूवहा।प्रह्लादोनामवाह्लीकःसवभूवनराधिपः।चंद्रस्तुदितिजश्
श्रेष्ठोलोकेताराधिपोपमः।ऋषिकोनामराजर्षिर्बभूवनृपसत्तमः।मृतपाइतिविख्यातोयश्चासीदसु
रोत्तमः।पश्चिमानूपकंविद्धितंनृपंनृपसत्तम।गविष्ठस्तुमहातेजायःप्रख्यातोमहासुरः।द्रुमसेनइ
तिख्यातःपृथिव्यांसोभवन्नृपः।मयूरइतिविख्यातःश्रीमान्यस्तुमहासुरः।सविश्वइतिविख्यातोवभू
वपृथिवीपतिः।सुपर्णइतिविख्यातस्तस्मादवरजस्तुयः।लोककीर्तिरितिख्यातःपृथिव्यांसोभवन्नृपः।
चंद्रहंतेतियस्तेषांकीर्तितःप्रवरोसुरः।शुनकोनामराजर्षिःसवभूवनराधिपः।विनाशनस्तुचंद्रस्य
यश्चाख्यातोमहासुरः।जानकिर्नामविख्यातःसोभवन्मनुजाधिपः।दीर्घजिह्वस्तुकौरव्ययउक्तोदानव

र्षभः।काशिराजःसविख्यातःपृथिव्यांपृथिवीपते॥ग्रहंतुसुषुवेयंतुसिंहिकार्केंदुमर्द्दनं।सक्राथइति
विख्यातोबभूवमनुजाधिपः।अनायुषस्तुपुत्राणांचतुर्णांप्रवरोसुरः।विक्षरोनामतेजस्वीवसुमित्रो
नृपःस्मृतः।द्वितीयोविक्षराद्यस्तुनराधिपमहासुरः।पांसुराष्ट्राधिपइतिविख्यातःसोभवन्नृपः।वली
नइतिविख्यातोयस्त्वासीदसुरोत्तमः।पौंड्रमत्स्यकइत्येवंबभूवसनराधिपः।वृत्रइत्यभिविख्यातोय
स्तुराजन्महासुरः।मणिमान्नामराजर्षिःसबभूवनराधिपः।क्रोधहंतेतियस्तस्यबभूवावरजोऽसुरः।
दंडइत्यभिविख्यातःसआसीन्नृपतिःक्षितौ।क्रोधवर्द्धनइत्येवयस्त्वन्यःपरिकीर्त्तितः।दंडधारइतिख्या
तःसोभवन्मनुजर्षभः।कालेयानांतुयेपुत्रास्तेषामष्टौनराधिपाः।जज्ञिरेराजशार्दूलशार्दूलसमवि
क्रमाः।मगधेषुजयत्सेनस्तेषामासीत्सपार्थिवः।अष्टानांप्रवरस्तेषांकालेयानांमहासुरः।द्वितीय
स्तुततस्तेषांश्रीमान्हरिहयोपमः।अपराजितइत्येवंसबभूवनराधिपः।तृतीयस्तुमहातेजामहामा
योमहासुरः।निषादाधिपतिर्जज्ञेभुविभीमपराक्रमः।तेषामन्यतमोयस्तुचतुर्थःपरिकीर्त्तितः।श्रे
णिमानितिविख्यातःक्षितौराजर्षिसत्तमः।पंचमस्त्वभवत्तेषांप्रवरोयोमहासुरः।महौजाइतिविख्यातो

वभूवेहपरंतपः।षष्ठः स्तुमतिमान्यो वैतेषामासीन्महासुरः।अभीरुरितिविख्यातःक्षितौराजर्षिसत्तमः।
समुद्रसेनस्तुनृपस्तेषामेवाभवद्गणात्।विश्रुतःसागरांतायांक्षितौधर्मार्थतत्ववित्।वृहन्नामाष्टम
स्तेषांकालेयानांनराधिप।वभूवराजाधर्मात्मासर्वभूतहितेरतः।कुक्षिस्तुराजन्विख्यातोदानवानां
महावलः।पार्वतीयइतिख्यातःकांचनाचलसन्निभः।क्रथनश्चमहावीर्यःश्रीमान्राजन्महासुरः।सू
र्याक्षइतिविख्यातःक्षितौजज्ञेमहीपतिः।असुराणांतुयःसूर्यःश्रीमांश्चैवमहासुरः।दरदोनामवाह्लि
कोवरःसर्वमहीक्षितां।गणःक्रोधवशोनामयस्तेराजन्प्रकीर्तितः।ततःसंजज्ञिरेवीराःक्षिताविहन
राधिपाः।मद्रकःकर्णवेष्टश्चसिद्धार्थःकीटकस्तथा।सुवीरश्चसुवाहुश्चमहावीरोथवाह्लिकः।क्रथो
विचित्रःसुरथःश्रीमान्नीलश्चभूमिपः।चीरवासाश्चकौरव्यभूमिपालश्चनामतः।दंतवक्रश्चनामासी
दुर्जयश्चैवदानवः।रुक्मीचनृपशार्दूलोराजाचजनमेजयः।आषाढोवायुवेगश्चभूरितेजास्तथैव
च।एकलव्यःसुमित्रश्चवाटधानोथगोमुखः।कारूषकाश्चराजानःक्षेमधूर्तिस्तथैवच।श्रुतायुरुद्वह
श्चैववृहत्सेनस्तथैवच।क्षेमोग्रतीर्थःकुहरःकलिंगेषुनराधिपाः।मतिमांश्चमनुष्येंद्रईश्वरश्चेतिवि

आ०प०
१०६

श्रुताः।गणाक्रोधवशादेषराजपूगोभवत्क्षितौ।जातःपुरामहाभागोमहाकीर्त्तिर्महाबलः।यस्त्वासी
द्देवकोनामदेवराजसमद्युतिः।सगंधर्वपतिर्मुख्यःक्षितौजज्ञेनराधिपः।बृहस्पतेर्बृहत्कीर्त्तेर्देवर्षेर्वि
द्धिभारत।अंशाद्द्रोणंसमुत्पन्नंभारद्वाजमयोनिजं।धन्विनांनृपशार्दूलयःसर्वार्थविदुत्तमः।महत्की
र्त्तिर्महातेजाःसयज्ञेमनुजेश्वरः।धनुर्वेदेचवेदेचयंतंवेदविदोविदुः।वरिष्ठंचित्रकर्माणंद्रोणंस्वकुल
वर्द्धनं।महादेवांतकाभ्यांचकामाक्रोधाच्चभारत।एकत्वमुपपन्नानांजज्ञेशूरःपरंतपः।अश्वत्थामहा
वीर्यःशत्रुपक्षक्षयावहः।वीरःकमलपत्राक्षःक्षितावासीन्नराधिपः।जज्ञिरेवसवस्त्वष्टौगंगायांशं
तनोःसुताः।वशिष्ठस्यचशापेननियोगाद्वासवस्यच।तेषामवरजोभीष्मःकुरूणामभयंकरः।मति
मान्वेदविद्वाग्मीशत्रुपक्षक्षयंकरः।जामदग्न्येनरामेणसर्वास्त्रविदुषांवरः।योयुध्यतमहातेजाभार्गवे
णमहात्मना।यस्तुराजन्कृपोनामब्रह्मर्षिरभवत्क्षितौ।रुद्राणांतुगणाद्विद्धिसंभूतमतिपौरुषं।शा
कुनिर्नामयस्त्वासीद्राजालोकेमहारथः।द्वापरंविद्धितंराजन्संभूतमरिमर्द्दनं।सात्यकिःसत्यसंधश्च
योसौवृष्णिकुलोद्वहः।पक्षात्सयज्ञेमरुतांदेवानामरिमर्द्दनः।द्रुपदश्चैवराजर्षिस्ततएवाभवद्गणात्।

१०६

मानुषेनृपलोकेस्मिन्सर्वशस्त्रभृतांवरः।ततश्चकृतवर्म्माणंविद्धिराजन्जनाधिपं।तमप्रतिमकर्म्माणंक्ष
त्रियर्षभसत्तमं।मरुतांतुगणाद्विद्धिसंजातमरिमर्द्दनं।विराटंनामराजानंपरराष्ट्रप्रतापनं।अरिष्टाया
स्तुयःपुत्रोहंसइसभिविश्रुतः।सगंधर्वपतिर्जज्ञेकुरुवंशविवर्द्धनः।धृतराष्ट्रइतिख्यातःकृष्णद्वैपाय
नात्मजः।दीर्घबाहुर्महातेजाःप्रज्ञाचक्षुर्नराधिपः।मातुर्दोषादृषेःकोपादंधएवव्यजायत।तस्यैवावर
जोभ्रातामहासत्वोमहाबलः।सपांडुरितिविख्यातःसत्यधर्मरतःशुचिः।अत्रेयस्तुमहाभागंपुत्रंपुत्रव
तांवरं।विदुरंविद्धितंलोकेजातंबुद्धिमतांवरं।कलेरंशास्तुसंजज्ञेभुविदुर्योधनोनृपः।दुर्बुद्धिर्दुर्मतिश्चैव
कुरूणामयशस्करः।जगतोयस्तुसर्वस्यविद्विष्टःकलिपूरुषः।यःसर्वांघातयामासपृथिवींपृथिवीपतेः
उद्दीपितंयेनवैरंभूतांतकरणंमहत्।पौलस्त्याभ्रातरश्चास्यजज्ञिरेमनुजेष्विह।शतंदुःशासनादीनांस
र्वेषांक्रूरकर्म्मिणां।दुर्मुखोदुःसहश्चैवयेचान्येनानुकीर्त्तिताः।दुर्य्योधनसहायास्तेपौलस्त्याभरतर्षभ॥

जनमेजयउ श्रेष्ठानुश्रेष्ठतांचैवनामधेयानिवाविभो।धृतराष्ट्रस्यपुत्राणमातुपूर्वेणकीर्त्तय

वैशं दुर्योधनोयुयुत्सुश्चराजन्दुःशासनस्तथा।दुःसहोदुःशलश्चैवदुर्मुखश्चतथापरः।विविंशति

आ०प०
१०७

र्विकर्णश्चजलसंधःसुलोचनः।विंदानुविंदौदुर्द्धर्षःसुबाहुर्दुःप्रधर्षणः।दुर्मर्षणोदुर्मुखश्चदुःकर्णःक
र्णएवच।चित्रोपचित्रौचित्राक्षश्चारुचित्रांगदश्चह।दुर्मदोदुःप्रहर्षश्चविवित्सुर्विकटःसमः।ऊर्णनाभःप
द्मनाभस्तथानंदोपनंदकौ।सेनापतिःसुषेणश्चकुंडोदरमहोदरौ।चित्रबाहुश्चित्रवर्मासुवर्म्मादुर्विरो
चनः।अयोबाहुर्महाबाहुश्चित्रचापसुकुंडलौ।भीमवेगोभीमबलोबलाकीभीमविक्रमः।उग्रायुधो
भीमशरःकनकायुर्दृढायुधः।दृढवर्मादृढक्षत्रःसोमकीर्त्तिरनूदरः।जरासंधोदृढसंधःसत्यसंधःसहस्र
बाहुः।उग्रश्रवाउग्रसेनःक्षेममूर्त्तिस्तथैवच।अपराजितःपंडितकोविशालाक्षोदुराधनः।दृढहस्तःसुहस्त
श्चवातवेगसुवर्चसौ।आदित्यकेतुर्बह्वाशीनागदत्तानुयायिनौ।कवचीनिषंगीदंडीदंडधारोधनुर्ग्रहः।उग्रो
भीमरथोवीरोवीरबाहुरलोलुपः।अभयोरौद्रकर्माचतथादृढरथश्रयः।अनाधृष्यःकुंडभेदीविरावीदीर्घ
लोचनः।दीर्घबाहुर्महाबाहुर्व्यूढोरुःकनकांगदः।कुंडजश्चित्रकश्चैवदुःशलाचशताधिका।वैश्यापुत्रोयुयु
त्सुश्चधार्त्तराष्ट्रःशताधिकः।एतदेकशतंराजन्कन्याचैकाप्रकीर्त्तिता।नामधेयानुपूर्व्याचज्येष्ठानुज्येष्ठतां
विदुः।सर्वेत्वतिरथाःशूराःसर्वेयुद्धविशारदाः।सर्ववेदविदश्चैवराजशास्त्रेचपारगाः।सर्वसंग्रामविद्यासु

१०७

विद्याभिजनशोभिनः। सर्वेषामनुरूपाश्च कृता दारा महीपते। दुःशलां समये राजन्सिंधुराजाय कौरवः। ज
यद्रथाय प्रददौ सौबलानुमते तदा। धर्मस्यांशं तु राजानं विद्धि राजन्युधिष्ठिरं। भीमसेनं तु वातस्य देवराजस्य
वार्जुनं। अश्विनोस्तु तथैवांशौ रूपेणाप्रतिमौ भुवि। नकुलः सहदेवश्च सर्वभूतमनोहरौ। यस्तु वर्च्चा इति ख्या
तः सोमपुत्रः प्रतापवान्। सोभिमन्युर्बृहत्कीर्त्तिरर्जुनस्य सुतोभवत्। यस्यावतरणे राजन्सुरान्सोमोब्रवीदिदं।
नाहं दद्यां प्रियं पुत्रं मम प्राणैर्गरीयसं। समयः क्रियतामेष न शक्यमतिवर्त्तितुं। सुरकार्यं हि नः कार्यमसुराणां
क्षितौ वधः। तत्र यास्यत्ययं वर्च्चा न च स्थास्यति वै चिरं। ऐंद्रिर्नरस्तु भविता यस्य नारायणः सखा। सोर्जुनेत्यभि
विख्यातः पांडोः पुत्रः प्रतापवान्। तस्यायं भविता पुत्रो बालो भुवि महारथः। ततः षोडश वर्षाणि स्थास्यत्यमरस
त्तमाः। अस्य षोडशवर्षस्य स संग्रामो भविष्यति। यत्रांशा वः करिष्यंति कर्म वीरनिषूदनं। नरनारायणाभ्यां तु
स संग्रामो विनाकृतः। चक्रव्यूहं समास्थाय योधयिष्यति वः सुराः। विमुखाञ्छात्रवान्सर्वान्कारयिष्यति मे
सुतः। बालः प्रविश्य च व्यूहमभेद्यं विचरिष्यति। महारथानां वीराणां कदनं च करिष्यति। सर्वेषामेव शत्रूणां च
तुर्थांशं नयिष्यति। दिनार्द्धेन महाबाहुः प्रेतराजपुरं प्रति। ततो महारथैर्वीरैः समेत्य बहुशो रणे। दिनक्षये महाबा

कुर्म्मयाभूयः समेष्यति। एकं वंशकरं पुत्रं वीरं वै जनयिष्यति। प्रनष्टं भारतं वंशं सभूयो धारयिष्यति। एतत्सो
मवचः श्रुत्वा तथास्त्विति दिवौकसः। प्रत्यूचुः सहिताः सर्वे ताराधिपमपूजयन्। एवं ते कथितं राजन्स्तव जन्म पि
तुः पितुः। अग्नेर्भागं तु विद्धि त्वं धृष्टद्युम्नं महारथं। शिखंडिनमथो राजन्स्त्रीपूर्वं विद्धि राक्षसं। द्रौपदेयाश्च ये
पंच वभूवुर्भरतर्षभ। विश्वान्देवगणान्विद्धि संजातान्भरतर्षभान्। प्रतिविंध्यः श्रुतिसोमः श्रुतकीर्त्तिस्तथा
परः। नाकुलिस्तु शतानीकः श्रुतसेनश्च वीर्यवान्। शूरो नाम यदुश्रेष्ठो। वसुदेवपिता भवत्। तस्य कन्या पृथा
नाम रूपेणासदृशी भुवि। पितुः स्वस्रीयपुत्राय सोनपत्याय वीर्यवान्। अग्रमग्रे प्रतिज्ञाय स्वस्यापत्यस्य वै त
दा। अग्रजातेति तां कन्यां शूरोनुग्रहकांक्षया। अददत्कुंतिभोजाय सतां दुहितरं तदा। सा नियुक्ता पितुर्गेहे ब्रा
ह्मणातिथिपूजने। उग्रं पर्यचरद्घोरं ब्राह्मणं शंसितव्रतं। निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः। तमुग्रं शंसि
तात्मानं सर्वयत्नैरतोषयत्। तुष्टोभिचारसंयुक्तमाचचक्षे यथाविधि। उवाच चैनां भगवान्प्रीतोस्मि सुभगे त
वायं यं देवं त्वमेतेन मंत्रेणावाहयिष्यसि। तस्य तस्य प्रसादात्त्वं देवि पुत्रान्जनिष्यसि। एवमुक्ता च सा बाला त
दा कौतूहलान्विता। कन्या सती देवमर्कमाजुहाव यशस्विनी। प्रकाशकर्मा तपनस्तस्यां गर्भं दधौ तदा। अजीज

नन्सुतं चास्यां सर्वशस्त्रभृतां वरं। सकुंडलं सकवचं देवगर्भश्रियान्वितं। दिवाकरसमं दीप्त्या चारुसर्वांग

भूषितं। निगूहमाना जातं वै बंधुपक्षभयात्तदा। उत्ससर्ज्जे जले कुंती नं कुमारं यशस्विनं। तमुत्सृष्टं जले गर्भं

राधाभर्त्ता महायशाः। राधायाः कल्पयामास पुत्रं सोधिरथस्तदा। चक्रतुर्नाम राधेयं तस्य वालस्य तावुभौ। दं

पती वसुषेणेति दिक्षु सर्वासु विश्रुतं। स वर्द्धमानो वलवान्सर्वास्त्रेषूत्तमोभवत्। वेदांगानि च सर्वाणि जजाप ज

पतां वर ४। यस्मिन्काले जपन्नास्ते धीमान्सत्यपराक्रमः। नादेयं ब्राह्मणेष्वासीत्तस्मिन्काले महात्मनः। तमिंद्रो

ब्राह्मणो भूत्वा पुत्रार्थे भूतभावनः। ययाचे कुंडले वीरं कवचं च सहांगजं। उत्कृत्य कर्ण्णो ह्यददत्कवचं कुंडले त

था। शक्तिं शक्रो ददौ तस्मै विस्मितश्चेदमब्रवीत्। देवासुरमनुष्याणां गंधर्वोरगरक्षसां। यस्मिन्क्षेप्स्यसि

दुर्द्धर्ष स एको न भविष्यति। पुरा नाम च तस्यासीद्वसुषेण इति क्षितौ। ततो वैकर्त्तनः कर्ण्णः कर्मणा तेन सो

भवत्। आमुक्तकवचो वीरो यस्तु जज्ञे महायशाः। स कर्ण्ण इति विख्यातः पृथायाः प्रथमः सुतः। स तु सूतकुले

वीरो वर्द्धे राजसत्तम। कर्ण्णं नरवरः श्रेष्ठं सर्वशस्त्रभृतां वरं। दुर्योधनस्य सचिवं मित्रं शत्रुविनाशनं। दिवाक

रस्यांशं विद्धि राजन्नंशमनुत्तमं। यस्तु नारायणो नाम देवदेवः सनातनः। तस्यांशो मानुषेष्वासीद्वासुदेवः प्रता

पवान्॥ शेषस्यांशश्च नागस्य बलदेवो महाबलः॥ सनत्कुमारं प्रद्युम्नं विद्धि राजन्महौजसं॥ एवमन्ये मनुष्ये-
न्द्रा बहवोंशा दिवौकसां॥ जज्ञिरे वसुदेवस्य कुले कुलविवर्द्धनाः॥ गणस्त्वप्सरसां यो वै मया राजन्प्रकीर्तितः॥
तस्य भागः क्षितौ जज्ञे नियोगाद्वासवस्य ह॥ तानि षोडश देवीनां सहस्राणि नराधिप॥ बभूवुर्मानुषे लोके वासु-
देवपरिग्रहः॥ श्रियस्तु भागः संजज्ञे रत्यर्थं पृथिवीपते॥ भीष्मकस्य कुले साध्वी रुक्मिणी नाम नामतः॥ द्रौपदी
त्वथ संजज्ञे शचीभागादनिंदिता॥ द्रुपदस्य कुले कन्या वेदीमध्याद्विनिर्गता॥ नातिह्रस्वा न महती नीलोत्पल-
सुगंधिनी॥ पद्मायताक्षी सुश्रोणी स्वसितांचितमूर्द्धजा॥ सर्वलक्षणसंपूर्णा वैडूर्यमणिसन्निभा॥ पंचानां पुरु-
षेंद्राणां चित्तप्रथमनी रहः॥ सिद्धिर्धृतिश्च ये देव्यौ पंचानां मातरौ तु तौ॥ कुंती माद्री च जज्ञाते मतिस्तु सुबलात्मजा॥
इति देवासुराणां ते गंधर्वाप्सरसां तथा॥ अंशावतरणं राजन्राक्षसानां च कीर्त्तितं॥ ये पृथिव्यां समुद्भूता राजानो युद्ध-
दुर्मदाः॥ महात्मानो यदूनां च ये जाता विपुले कुले॥ ब्राह्मणाः क्षत्रिया वैश्या मया ते परिकीर्तिताः॥ धन्यं यशस्यं पुत्री-
यमायुष्यं विजयावहं॥ इदमंशावतरणं श्रोतव्यमनसूयता॥ अंशावतरणं श्रुत्वा देवगंधर्वरक्षसां॥ प्रभावाप्यय-
वित्प्राज्ञो न कृच्छ्रेष्ववसीदति   इत्यादिपर्वण्यंशावतरणं समाप्तम्   ६५   जनमेजय उवाच॥

त्वत्तःश्रुतमिदंब्रह्मन्देवदानवरक्षसां।अंशावतरणंसम्यग्गंधर्वाप्सरसांतथा। इदंतुभूयइच्छामिकुरूणांवंशमा
दितः।कथ्यमानंत्वयाविप्रविप्रर्षिगणसन्निधौ॥ वैशं ॥पौरवाणांवंशकरोदुष्यंतोनामवीर्यवान्।पृथिव्या
श्चतुरंतायागोप्ताभरतसत्तम।चतुर्भागंभुवःकृत्स्नंयोभुंक्तेमनुजेश्वरः।समुद्रावरणांश्चापिदेशान्ससमितिंजयः।
आम्लेच्छावधिकान्सर्वान्सभुंक्तेरिपुमर्दनः।रत्नाकरसमुद्रांतांश्चातुर्वर्ण्यजनावृतान्।नवर्णसंकरकरोनकृष्याक
रकृज्जनः।नपापकृत्कश्चिदासीत्तस्मिन्राजनिशासति।धर्मेरतिंसेवमानाःधर्मार्थावभिपेदिरे।तदानराननरव्या
घ्रतस्मिन्जनपदेश्वरे।नासीच्चौरभयंतातनक्षुधाभयमण्वपि।नासीद्व्याधिभयंवापितस्मिन्जनपदेश्वरे।
स्वधर्मैरेभिरेवर्णादैवेकर्मणिनिस्पृहा८।तमाश्रित्यमहीपालमासंश्चैवाकुतोभया८।कालवर्षीचपर्जन्यःस
स्यानिरसवंतिच।सर्वरत्नसमृद्धाचमहीपशुमतीतथा।स्वकर्मनिरताविप्रानानृतंतेषुविद्यते।सचाद्भुतमहा
वीर्योवज्रसंहननोयुवा।उद्यम्यमंदरंदोर्भ्यांवहेत्सवनकाननं।धनुष्यथगदायुद्धेसर्वप्रहरणेषुच।नागपृष्ठेस्वपृ
ष्ठेचबभूवपरिनिष्ठितः।बलेविष्णुसमश्चासीत्तेजसाभास्करोपमः।अक्षोभ्यत्वेर्णवसमःसहिष्णुत्वेधरासमः।सं
मतःसमहीपालःप्रसन्नपुरराष्ट्रवान्।भूयोधर्मपरैर्भावैर्मुदितंजनमाविशत्॥ इत्यादिपर्वणिशाकुंतले

आ०प०
११०

॥ ६६ ॥जनमेजय उ॥ संभवं भरतस्याहं चरितं च महामतेः। सकुंतलायाश्चोत्पत्तिं श्रोतुमिछामि तत्वतः।
दुष्यंतेन च वीरेण यथा प्राप्ता सकुंतला। तं वै पुरुषसिंहस्य भगवन्विस्तरं त्वहं। श्रोतुमिछामि तत्वज्ञ सर्वं मतिम
तां वर वैशं सकदाचिन्महाबाहुः प्रभूतबलवाहनः। वनं जगाम गहनं हयनागशतैर्हृतो। बलेन चतु
रंगेन हृतः परमवल्गुना। खड्गशक्तिधरैर्वीरैर्गदामुशलपाणिभिः। नानायुधधरैश्चापि नानावेषधरैस्तथा॥
प्रासतोमरहस्तैश्च ययौ योधशतैर्हृतः। सिंहनादैश्च योधानां शंखदुंदुभिनिस्वनैः। रथनेमिस्वनैश्चैव सनाग
वरबृंहितैः। हेषितस्वनमिश्रैश्च क्ष्वेडितास्फोटितस्वनैः। आसीत्किलकिलाशब्दस्तस्मिन्गछति पार्थिवे। प्रासादव
रशृंगस्थाः परया नृपशोभया। ददृशुस्तं स्त्रियस्तत्र शूरमात्मयशस्करं। शक्रोपमममित्रघ्नं परवारणवारणं। प
श्यंतः स्त्रीगणास्तत्र वज्रपाणिं स्म मेनिरे। अयं स पुरुषव्याघ्रो रणे वसुपराक्रमः। यस्य बाहुबलं प्राप्य न भवंत्य
सुहृद्गणाः। इति वाचो ब्रुवंत्यस्ताः स्त्रियः प्रेम्णा नराधिपं। तुष्टुवुः पुष्पवृष्टिश्च ससृजुस्तस्य मूर्द्धनि। तत्र तत्र च विप्रे
न्द्रैः स्तूयमानः समंततः। निर्ययौ परमप्रीत्या वनं मृगजिघांसया। तं देवराजप्रतिमं मत्तवारणधूर्गतं। द्विजक्षत्रि
यविट्शूद्रा निर्यांतमनुजग्मिरे। ददृशुर्वर्द्धयानास्ते आशीर्भिश्च जयेन च। सुदूरमनुजग्मुस्तं पौरजानपदास्तथा।

११०

न्यवर्त्तत ततः पश्चादनुज्ञातान्नृपेणहा।सुपर्णप्रतिमेनाथरथेनवसुधाधिपः।महिमापूरयामासघोषेणत्रिदिवं
तथा।सगच्छन्ददृशेधीमान्नंदनप्रतिमंवनं।विल्वार्कखदिराकीर्णंकपित्थधवसंकुलं।विषमंपर्वतस्त्रस्तेर
श्मभिश्चसमावृतं।निर्जलंनिर्मनुष्यंचबहुयोजनमायतं।मृगसिंहैर्वृतंघोरैरन्यैश्चापिवनेचरैः।तद्वनंमनुज
व्याघ्रःसभृत्यबलवाहनः।लोडयामासदुष्कंतःसूदयन्विविधान्मृगान्।बाणगोचरसंप्राप्तांस्तत्रव्याघ्रगणान्ब
हून्।पातयामासदुष्कंतोनिर्बिभेदचसायकैः।दूरस्थान्सायकैःकांश्चिदभिनत्सनराधिपः।अभ्यासमागतां
श्चान्यान्खड्गेननिरकृन्तत।कांश्चिदेणान्समाजघ्नेशक्त्याशक्तिमतांवरः।गदामंडलतत्वज्ञश्चचारामितविक्रमः।
तोमरैरसिभिश्चापिगदामुशलकंपनैः।चचारसविनिघ्नन्वैवन्यांस्तत्रमृगद्विजान्।राज्ञाचाद्भुतवीर्येणयो
धैश्चसमरप्रियैः।लोड्यमानंमहारण्यंतत्यजुःस्ममृगाधिपाः।तत्रविद्रुतयूथानिहतयूथपतीनिवै।मृगयू
थान्यथोत्सुकाश्शब्दंचक्रुस्ततस्ततः।शुष्काश्चापिनदीर्गत्वाजलनैराश्यकर्षिताः।व्यायामक्लांतहृदयाःपतं
तिस्मविचेतसः।क्षुत्पिपासापरीताश्चश्रांताश्चपतिताभुवि।केचित्तत्रनरव्याघ्रैरभक्ष्यंतबुभुक्षितैः।केचिद
ग्निमथोत्पाद्यसंसाध्यचवनेचराः।भक्षयंतिस्ममांसानिप्रकुद्यविधिवत्तदा।तत्रकेचिद्गजामत्ताबलिनःशाछ्र

विक्षताः।संकोच्याग्रकरान्भीताः प्राद्रवंतिस्मवेगिताः।शकृन्मूत्रंसृजंतश्च क्षरंतःशोणितंबहु।वन्याग
जवरास्तत्रममृदुर्मनुजान्बहून्।तद्वनंबलमेघेनशरधारेणसंवृतं।व्यरोचतमृगाकीर्णंराज्ञाहतमृगाधि
पं इत्यादिपर्वणिशाकुंतले ६७ वैशं ततोमृगसहस्राणिहत्वासबलवाहनः।रा
जामृगप्रसंगेनवनमन्यद्विवेशह।एकएवोत्तमबलःक्षुत्पिपासाश्रमान्वितः।सवनस्यांतमासाद्यमह
च्छून्यंसमासदत्।तच्चाप्यतीत्यनृपतिरुत्तमाश्रमसंयुतं।मनःप्रह्लादजननंदृष्टिकांतमतीवच।शीतमा
रुतसंयुक्तंजगामान्यन्महद्वनं।पुष्पितैःपादपैःकीर्णमतीवसुखशाड्वलं।विपुलंमधुरारावैर्नादितंवि
हगैस्तथा।पुंस्कोकिलनिनादैश्चझिल्लीकगणनादितं।प्रवृद्धविटपैर्वृक्षैःसुखच्छायैःसमावृतं।षट्पदाघूर्
णितलतंलक्ष्म्यापरमयायुतं।नापुष्पःपादपःकश्चिन्नाफलोनापिकंटकी।षट्पदैर्नाप्यपाकीर्णस्तस्मिन्वै
काननेभवत्।विहगैर्नादितंपुष्पैरलंकृतमतीवच।सर्वर्तुकुसुमैर्वृक्षैःसुखच्छायैःसमावृतं।मनोरमंम
हेष्वासोविवेशवनमुत्तमं।मारुताकलितास्तत्रद्रुमाःकुसुमशाखिनः।पुष्पवृष्टिंविचित्रांतुव्यसृजंस्तेपु
नःपुनः।दिवस्पृशोथसंघुष्टाःपक्षिभिर्मधुरस्वनैः।विरेजुःपादपास्तत्रविचित्रकुसुमांबराः।तेषांतत्रप्र

वालेषुपुष्पभारावनामिषु।रुवंतिरावान्मधुरान्षट्पदामधुलिप्सवः।तत्रप्रदेशांश्चबहून्कुसुमोत्करमंडि
तान्।लतागृहपरिक्षिप्तान्मनसःप्रीतिवर्द्धनान्।संपश्यन्सुमहातेजाबभूवमुदितास्तदा।परस्पराश्लिष्टशाखैः
पादपैःकुसुमाचितैः।अशोभतवनंतत्तुमहेंद्रध्वजसन्निभैः।सुखःशीतःसुगंधीचपुष्परेणुवहोनिलः।परिक्री
मन्वनेवृक्षान्नुपैतीवरिरंशया।एवंगुणसमायुक्तंददर्शसवनंनृपः।नदीकच्छोद्भवंकांतमुच्छ्रितध्वजसन्निभं।
प्रेक्षमाणोवनंतत्तुसुप्रहृष्टविहंगमं।आश्रमप्रवरंरम्यंददर्शचमनोरमं।नानावृक्षसमाकीर्णंसंप्रज्वलित
पावकं।तंतदाप्रतिमंश्रीमानाश्रमंप्रत्यपूजयत्।यतिभिर्वालखिल्यैश्चवृतंमुनिगणान्वितं।अग्न्यागारैश्चव
हुभिःपुष्पसंस्तरसंस्तृतं।महाकच्छैर्बृहद्भिश्चविभ्राजितमतीवच।मालिनीमभितोराजन्नदींपुण्यांसुखोदकां।
नैकपक्षिगणाकीर्णांतपोवनमनोरमां।तत्रव्यालमृगान्सौम्यान्पश्यन्प्रीतिमवापसः।तंचाप्रतिरथःश्रीमा
नाश्रमंप्रत्यपद्यत।देवलोकप्रतीकाशंसर्वतःसुमनोहरं।नदींचाश्रमसंश्लिष्टांपुण्यतोयांददर्शसः।सर्वप्रा
णभृतांतत्रजननीमिवधिष्ठितां।सचक्रवाकपुलिनांपुष्पफेनप्रवाहिनीं।सकिन्नरगणावासांवानरर्क्षनिषेवितां।
पुण्यस्वाध्यायसंयुष्टांपुलिनैरुपशोभितां।मत्तवारणशार्दूलभुजगेंद्रनिषेवितां।नदीमाश्रमसंबद्धांदृष्ट्वाश्र

आ०प०
११२

मपदं तथा। चकाराभिप्रवेशाय मतिं स नृपतिस्तदा। अलंकृतं द्वीपवत्या मालिन्या रम्यतीरया। नरनारायणस्था
नं गंगयेवोपशोभितं। मत्तवर्हिणसंघुष्टं प्रविवेश महद्वनं। ध्वजिनीमश्वसंबाधां पदातिगजसंकुलां। अवस्था
प्य वनद्वारि सेनामिदमुवाच सः। मुनिं विरजसं द्रष्टुं गमिष्यामि तपोधनं। काश्यपं स्थीयतामत्र यावदागमनं मम
तद्वनं नंदनप्रख्यमासाद्य मनुजेश्वरः। क्षुत्पिपासे जहौ राजा मुदं चावाप पुष्कलां। सामात्यो राजलिंगानि सोपनी
य नराधिपः। पुरोहितसहायश्च जगामाश्रममुत्तमं। दिदृक्षुस्तत्र तमृषिं तपोराशिमथाव्ययं। ब्रह्मलोकप्रती
काशमाश्रमं सोभिवीक्ष्य ह। षट्पदोद्गीतसंघुष्टं नानाद्विजगणायुतं। ऋचो बह्वृचमुख्यैश्च प्रेर्यमाणाः पदक्र
मैः। शुश्राव मनुजव्याघ्रो विततेष्विह कर्मसु। यज्ञविद्यांगविद्भिश्च क्रमविद्भिः क्रमानपि। यतात्मभिः सुनियतैः
शुशुभे स तदाश्रमः। अथर्ववेदप्रवराः पूगयज्ञियसामगाः। संहितामीरयंति स्म पदक्रमयुतां तु ते। शब्दसं
स्कारसंयुक्तैर्ब्रुवद्भिश्चापरैर्द्विजैः। नादितः स बभौ श्रीमान् ब्रह्मलोक इवापरः। यज्ञसंस्तरविद्भिश्च क्रमशिक्षा
विशारदैः। न्यायतत्त्वात्मविज्ञानसंपन्नैर्वेदपारगैः। नानावाक्यसमाहारसमवायविशारदैः। विशेषकार्यवि
द्भिश्च मोक्षधर्मपरायणैः। स्थापनाक्षेपसिद्धांतपरमार्थज्ञतां गतैः। लोकायतिकमुख्यैश्च समंतादनुनादितं।

११२

तत्रतत्रचविप्रेंद्रान्नियतान्संशितव्रतान्।जपहोमपरान्विप्रान्ददर्शपरवीरहा।आसनानिविचित्राणिपु
ष्पवंतिमहीपतिः।प्रयत्नोपहितानिस्मदृष्ट्वाविस्मयमागमत्।देवतायतनानांचप्रेक्ष्यपूजांकृतांद्विजैः।ब्रह्म
लोकस्थमात्मानंमेनेसनृपसत्तमः।सकाश्यपतपोगुप्तमाश्रमप्रवरंशुभं।नातृप्यत्प्रेक्षमाणोवैतपोवन
गुणैर्युतं।सकाश्यपस्यायतनंमहाव्रतैःवृतंसमंतादृषिभिस्तपोधनैः।विवेशसामात्यपुरोहितोरिहाविवि
क्तमत्यर्थमनोहरंशुभम् इत्यादिपर्वणिशाकुंतले ६८ वैशं ततोगछन्महाबाहुरेको
मात्यान्विसृज्यतान्।नापश्यच्चाश्रमेतस्मिंस्तमृषिंसंशितव्रतं।सोपश्यमानस्तमृषिंशून्यंदृष्ट्वातमाश्रमं।उ
वाचकइहेत्युच्चैर्वनंसन्नादयन्निव।श्रुत्वाथतस्यतंशब्दंकन्याश्रीरिवरूपिणी।निश्चक्रामाश्रमात्तस्मात्ताप
सीवेशधारिणी।सातंदृष्ट्वैवराजानंदुष्यंतमसितेक्षणा।स्वागतंतइतिक्षिप्रमुवाचप्रतिपूज्यच।आसनेना
र्चयित्वाचपाद्येनार्घेणचैवहि।पप्रछानामयंराजन्कुशलंचनराधिपं।यथावदर्चयित्वाथपृष्ट्वाचानामयं
तदा।उवाचस्मयमानेवकिंकार्यंक्रियतामिति।तामब्रवीत्ततोराजाकन्यांमधुरभाषिणीं।दृष्ट्वाचैवानवद्यांगीं
यथावत्प्रतिपूजितः।आगतोहंमहाभागमृषिंकण्वमुपासितुं।क्वगतोभगवान्भद्रेतन्ममाचक्ष्वशोभने ॥

आ०प०
११३

शकुंतलोवाच गतः पितामेभगवान्फलान्याहर्त्तुमाश्रमात्। मुहूर्त्तंसंप्रतीक्षस्वद्रष्टास्येनमुपागतं॥ वैशं० अपश्यमानस्तमृषिंतयाचोक्तस्तथाचसः। तांदृष्ट्वाचवरारोहांश्रीमतींचारुहासिनीं। विभ्राजमानांवपुषातपसाचदमेनच। रूपयौवनसंपन्नामित्युवाचमहीपतिः। कात्वंकस्यासिसुश्रोणिकिमर्थंचागतावनं। एवंरूपगुणोपेताकुतस्त्वमसिशोभने। दर्शनादेवहिशुभेत्वयामेपहृतंमनः। इच्छामित्वामहंज्ञातुंतन्ममाचक्ष्वशोभने। एवमुक्तातुसाकन्यातेनराज्ञातदाश्रमे। उवाचहसतीवाक्यमिदंसुमधुराक्षरं। कण्वस्याहंभगवतोदुष्यंतदुहितामता। तपस्विनोधृतिमतोधर्मज्ञस्यमहात्मनः॥ दुष्यंतउवाच ऊर्ध्वरेतामहाभागोभगवांल्लोकपूजितः। चलेद्धिवृत्ताद्धर्मोपिनचलेत्संशितव्रतः। कथंत्वंतस्यदुहितासंभूतावरवर्णिनी। संशयोमेमहानत्रतंमेछेत्तुमिहार्हसि शकुंतलोवाच यथायमागमोमह्यंयथाचेदमभूत्पुरा। शृणुराजन्यथातत्वंयथास्मिदुहितामुनेः। ऋषिःकश्चिदिहागम्यममजन्माभ्यचोदयत्। तस्मैप्रोवाचभगवान्यथातच्छृणुपार्थिव कण्वउवाच तप्यमानःकिलपुराविश्वामित्रोमहत्तपः। सुभृशंतापयामासशक्रंसुरगणेश्वरं। तपसादीप्तवीर्योयंस्थानान्मांच्यावयेदिति। भीतःपुरंदरस्तस्मान्मेनकामिदमब्रवीत्। गुणैरप्सरसांदि

११३

चेर्मेनकेत्वंविनिशिष्यसे।श्रेयोमेकुरुकल्याणियत्त्वांवक्ष्यामितच्छृणु।अग्न्यादित्यसंकाशोविश्वामित्रोमहातपाः।त
प्यमानस्तपोघोरंममकंपयतेमनः।मेनकेतवभारोयंविश्वामित्रःसुमध्यमे।शंसितात्मासुदुर्द्धर्षउग्रेतपसिव
र्तते।समांनच्यावयेत्स्थानात्तंवैगत्वाप्रलोभय।चरतस्तपसोविघ्नंकुरुमेप्रियमुत्तमं।रूपयौवनमाधुर्यचेष्टि
तस्मितभाषितैः।लोभयित्वावरारोहेतपसस्तंनिवर्तय मेनकोवाच महातेजाःसभगवांस्तथैवचमहा
तपाः।कोपनश्चयथाह्येनंजानातिभगवानपि।तेजसस्तपसश्चैवकोपस्यचमहात्मनः।त्वमप्युद्विजसेयस्यनो
द्विजेयमहंकथं।महाभागंवसिष्ठंयःपुत्रैरिष्टैर्व्ययोजयत्।क्षत्रजातश्चयःपूर्वमभवद्ब्राह्मणोबलात्।शौचार्थं
योनदींचक्रेदुर्गमांबहुभिर्जलैः।यांतांपुण्यतमांलोकेकौशिकीतिविदुर्जनाः।बभारयत्रास्यपुराकालेदुर्गेमहा
त्मनः।दारान्मतंगोधर्मात्माराजर्षिर्व्याधतांगतः।अतीतकालेदुर्भिक्षेअभ्येत्यपुनराश्रमं।मुनिःपारेतिनद्या
वैनामचक्रेतदाप्रभुः।मतंगंयाजयांचक्रेयत्रप्रीतमनाःस्वयं।त्वंचसोमंभयाद्यस्यगतःपातुंसुरेश्वर।अतिन
क्षत्रयोगाद्धुक्रुद्धोनक्षत्रसंपदा।प्रतिश्रवणपूर्वाणिनक्षत्राणिचकारयः।एतानियस्यकर्माणितस्याहंभृश
मुद्विजे।यथासौनदहेत्क्रुद्धस्तथाज्ञापयमांविभो।तेजसानिर्द्दहेल्लोकान्कंपयेद्धरणींपदा।संक्षिपेच्चमहामे

आ०प०
११४

रंनूर्णमावर्त्तयेद्दिशः।नाहंशंतपसायुक्तंप्रदीप्तमिवपावकं।कथमस्मद्विधानारीजितेंद्रियमभिस्पृशेत्।हुताश
नमुखंदीप्तंसूर्यचंद्राक्षितारकं।कालजिह्वंसुरश्रेष्ठकथमस्मद्विधास्पृशेत्।यमश्चसोमश्चमहर्षयश्चसाध्या
विश्वेवालखिल्याश्चसर्वे।एतेपियस्योद्विजंतेप्रभावात्तस्मात्कस्मान्मादृशीनोद्विजेत।त्वयैवमुक्ताचकथंस
मीपमृषेर्नगच्छेयमहंसुरेंद्र।रक्षांतुमेचिंतयदेवराजयथात्वदर्थेरक्षिताहंचरेयं।कामंतुमेमारुतस्तत्रवासः
प्रक्रीडितायाविवृणोतुदेव।भवत्वमेमन्मथस्तत्रकार्येसहायभूतस्तुतवप्रसादात्।वनाच्चवायुःसुरभिःप्र
वायात्तस्मिन्कालेतमृषिंलोभयंत्याः।तथेत्युक्ताविहितेचैवतस्मिंस्ततोययौसाश्रमंकौशिकस्य इत्या
दिपर्वणिशाकुंतले ६९ कएवउवाच एवमुक्तस्तयाशक्रःसंदिदेशसदागतिं।प्रातिष्ठतततः
कालेमेनकावायुनासह।अथापश्यद्वरारोहातपसादग्धकिल्बिषं।विश्वामित्रंतप्यमानंमेनकाभीरुराश्रमे। ११४
अभिवाद्यततःसातंप्राक्रीडदृषिसन्निधौ।अपोवाहचवासोस्यामारुतःशशिसन्निभं।सागच्छत्त्वरिताभूमिंवास
स्तदभिलिप्सती।स्मयमानेवसव्रीडंमारुतंवरवर्णिनी।पश्यतस्तस्यतत्रर्षेरप्यग्निसमतेजसः।विश्वामित्रस्त
तस्तांतुविषमस्थामनिंदितां।गृध्रांवाससिसंभ्रांतांमेनकांमुनिसत्तमः।अनिर्देश्यवयोरूपामपश्यद्विवृतां

तदा तस्या रूपगुणान् दृष्ट्वा स तु विप्रर्षभ स्तदा। चकार भावं संसर्गे त्रया कामवशंगतः। न्यमंत्रयत् तत्वाप्येनां सा
चाप्यैच्छदनिंदितां। तौ तत्र सुचिरं कालमुभौ व्याहरतां तदा। रममाणौ यथाकामं यथैकदिवसं तथा। जनयामा
स स मुनिर्मेनकायां सकुंतलां। प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीं। जातमुत्सृज्य तं गर्भं मेनका मालिनी
मनु। कृतकार्या तत स्तूर्णमगच्छक्रसंसदं। तं वने विजने गर्भे सिंहव्याघ्रसमाकुले। दृष्ट्वा शयानं शकुनाः स
मंतात्पर्यवारयन्। नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृध्रिनः। पर्यरक्षंत तां तत्र सकुंता मेनकात्मजां। उपस्प्र
ष्टुं गतश्चाहमपश्यं शायितामिमां। निर्जनेपि वने रम्ये सकुंतैः परिवारितां। आनयित्वा ततश्चैनां दुहितृत्वे
न्यवेशयं। शरीरकृत्प्राणदाता यस्य चान्नानि भुंजते। क्रमेणैते त्रयोप्युक्ताः पितरो धर्मशासने। निर्जने तु वने य
स्मात्सकुंतैः परिवारिता। सकुंतलेति नामास्याः कृतं चापि ततो मया। एवं दुहितरं विद्धि मम विप्र शकुंतलां। श
कुंतला च पितरं मन्यते मामनिंदिता   शकुंतलोवाच   एतदाचष्ट पृष्टः सन्मम जन्म महर्षये। सुतां क
ण्वस्य मामेवं विद्धि त्वं मनुजाधिप। कण्वं हि पितरं मन्ये पितरं स्वमजानती। इति ते कथितं राजन्यथावृत्तं श्रुतं
मया   इत्यादिपर्वणि शाकुंतले ७०   दुष्यंत उवाच   सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भा

षसे। भार्यामेभवसुश्रोणिब्रूहिकिंकरवाणिते। सुवर्णमालांवासांसिकुंडलेपरिहाटके। नानापत्तनजेशु
भ्रेमणिरत्नेचशोभने। आहरामितवाद्याहंनिष्कादीन्यजिनानिच। सर्वंराज्यंतवाद्यास्तुभार्यामेभवशोभने।
गांधर्वेणचमांभीरुविवाहेनैहिसुंदरि। विवाहानांहिरंभोरुगांधर्वःश्रेष्ठउच्यते शकुंतलोवाच
फलाहारोगतोराजन्पितामइतआश्रमात्। मुहूर्तंसंप्रतीक्षस्वसमांतुभ्यंप्रदास्यति राजोवाच इच्छा
मित्वांवरारोहेभजमानामनिंदिते। त्वदर्थंमांस्थितंविद्धित्वद्गतंहिमनोमम। आत्मनोबंधुरात्मैवगतिरात्मैव
चात्मनः। आत्मनैवात्मनोदानंकर्तुमर्हसिधर्मतः। अष्टावेवसमासेनविवाहाधर्मतःस्मृताः। ब्राह्मोदैवस्त
थैवार्षःप्राजापत्यस्तथासुरः। गांधर्वोराक्षसश्चैवपैशाचश्चाष्टमःस्मृतः। तेषांधर्मान्यथापूर्वंमनुःस्वायंभुवो
ब्रवीत्। प्रशस्तांश्चतुरःपूर्वान्ब्राह्मणस्योपधारय। षडानुपूर्व्याक्षत्रस्यविद्धिधर्म्याननिंदिते। राज्ञांतुराक्षसो

प्युक्तोविट्शूद्रेष्वासुरःस्मृतः। पंचानांतुत्रयोधर्म्याअधर्म्यौद्वौस्मृताविह। पैशाचश्चासुरश्चैवनकर्तव्यौकदा
चन। अनेनविधिनाकार्योधर्मस्यैषागतिःस्मृता। गांधर्वराक्षसौक्षत्रेधर्म्यौतौमाविशंकिथाः। पृथग्वायदि
वामिश्रौकर्तव्यौनात्रसंशयः। सात्वंममसकामस्यसकामावरवर्णिनी। गांधर्वेणविवाहेनभार्याभवतुमर्ह

स्ति शकुंतलोवाच यदि धर्मपथस्त्वेष यदि चात्मा प्रभुर्मम। प्रदाने पौरवश्रेष्ठ शृणु मे समयं प्रभो
।सत्यं मे प्रतिजानीहि यथा वक्ष्याम्यहं रहः। मयि जायेत यः पुत्रः स भवेत्त्वदनंतरः। युवराजो महाराज सत्य
मेतद्ब्रवीमि ते। यद्येतदेवं दुष्कंत अस्तु मे संगमस्त्वया वैशं एवमस्त्विति तां राजा प्रत्युवाचाविचा
रयन्। अपि च त्वां हि नेष्यामि नगरं स्वं शुचिस्मिते। यथा त्वमर्हसि सुश्रोणि सत्यमेतद्ब्रवीमि ते। एवमुक्त्वा स
राजर्षिस्तामनिंदितगामिनीं। जग्राह विधिवत्पाणावुवास च तया सह। विश्वास्य चैनं स प्रायाद्ब्रवीच्च पु
नः पुनः। प्रेषयिष्ये तवार्थाय वाहिनीं चतुरंगिणीं। तया त्वानाययिष्यामि निवासं स्वं शुचिस्मिते॥ ॥
वैशं इति तस्याः प्रतिश्रुत्य स नृपो जनमेजय। मनसा चिंतयन्प्रायात्काश्यपं प्रति पार्थिवः। भगवांस्त
पसा युक्तः श्रुत्वा किं नु करिष्यति। एवं संचिंतयन्नेव प्रविवेश स्वकं पुरं। मुहूर्त्ते याते तस्मिंस्तु कण्वोप्याश्र
ममागमत्। सा कुंतला च पितरं ह्रिया नोपजगाम तं। विज्ञायाथ च तां कण्वो दिव्यज्ञानो महातपाः। उवाच भ
गवान्प्रीतः पश्यन्दिव्येन चक्षुषा। त्वयाद्य भद्रे रहसि मामनादृत्य यः कृतः। पुंसा सह समायोगो न स धर्मोप
घातकः। क्षत्रियस्य हि गांधर्वो विवाहः श्रेष्ठ उच्यते। सकामायाः सकामेन निर्मंत्रो रहसि स्मृतः। धर्मात्मा च म

हात्माच दुष्कंतः पुरुषोत्तमः। अभ्यगाच्छः पतिं यत्त्वं भजमानं शकुंतले। महात्माजनिता लोके पुत्रस्तव महाब
लः। य इमां सागरोपांगीकृत्स्नां भोक्ष्यति मेदिनीं। परं चाभिप्रयातस्य चक्रं तस्य महात्मनः। भविष्यस्य प्रतिह
तं सततं चक्रवर्त्तिनः। ततः प्रक्षाल्य पादौ सा विश्रांतं मनुमब्रवीत्। विनिधाय ततो भारं सन्निधाय फलानि च
॥ शकुंतलोवाच ॥ मया पतिर्वृतो राजा दुष्कंतः पुरुषोत्तमः। तस्मै ससचिवाय त्वं प्रसादं कर्त्तुमर्ह
सि कण्व उवाच प्रसन्न एव तस्याहं त्वत्कृते वरवर्णिनी। गृहाण च वरं मत्तस्त्वं शुभे यदभीप्सितं
वैशं ततो धर्मिष्ठतां वव्रे राज्याच्चास्खलनं तथा। शकुंतला पौरवाणां दुष्कंतहितकाम्यया इत्यादि प
र्वणि शाकुंतले ७१ वैशं प्रतिज्ञाय तु दुष्कंते प्रतियाते शकुंतला। असूत गर्भं वामोरूः कुमा
रममितौजसं। त्रिषु वर्षेषु पूर्णेषु दीप्तानलसमद्युतिं। रूपौदार्यगुणोपेतं दौष्कंतिं जनमेजय। जातकर्मादि
संस्कारं कण्वः पुण्यकृतां वरः। विधिवत्कारयामास वर्द्धमानस्य धीमतः। दंतैः शुक्लैः शिखरिभिः सिंहसंह
ननो महान्। चक्रांकितकरः श्रीमान्महामूर्द्धा महाबलः। कुमारो देवगर्भाभः स तत्राशु व्यवर्द्धत। षड्वर्ष एव वा
लः स कण्वाश्रमपदं प्रति। सिंहान् व्याघ्रान्वराहांश्च महिषांश्च गजांस्तथा। बबंध वृक्षे बलवानाश्रमस्य स

मीपतः।आरुहद्रुमयंश्चैवक्रीडंश्चपरिधावति।ततोस्यनामचक्रुस्तेकण्वाश्रमनिवासिनः।अस्त्वयंसर्व
दमनःसर्वंहिदमयत्ययं।ससर्वदमनोनामकुमारःसमपद्यत।विक्रमेणौजसाचैवबलेनचसमन्वितः।
तंकुमारमृषिर्दृष्ट्वाकर्मचास्यातिमानुषं।समयोयौवराज्यायेत्यब्रवीच्चशकुंतलां।तस्यतद्बलमाज्ञायकण्
वःशिष्यानुवाचह।शकुंतलामिमांशीघ्रंसहपुत्रामितोगृहात्।भर्त्रेप्रापयताद्यैवसर्वलक्षणपूजितां।
नारीणांचिरवासोहिबांधवेषुनरोचते।कीर्त्तिचारित्रधर्मघ्नस्तस्मान्नयतमाचिरं।तथेत्युक्त्वातुतेसर्वेप्रा
तिष्ठंतमहौजसः।शकुंतलांपुरस्कृत्यसपुत्रांगजसाह्वयं।गृहीत्वामरगर्भाभंपुत्रंकमललोचनं।आ
जगामततःसुभ्रूर्दुष्यंतंविदिताद्वनात्।अभिसृत्यचराजानंविदिताचप्रवेशिता।सहतेनैवपुत्रेणबालार्क
समतेजसा।निवेदयित्वातेसर्वेआश्रमंपुनरागताः।पूजयित्वायथान्यायमब्रवीच्चशकुंतला।अयंपुत्रस्त्व
याराजन्यौवराज्येभिषिच्यतां।त्वयाह्ययंसुतोराजन्मय्युत्पन्नःसुरोपमः।यथासमयमेतस्मिन्वर्त्तस्वपुरु
षोत्तम।यथामत्संगमेपूर्वंयःकृतःसमयस्त्वया।तंस्मरस्वमहाभागकण्वाश्रमपदंप्रति।सोथश्रुत्वैवतद्
द्वाक्यंतस्याराजास्मरन्नपि।अब्रवीन्नस्मरामीतिकस्यत्वंदुष्टतापसि।धर्मकामार्थसंबंधंनस्मरामित्वया

सहागछवानिछवाकामंयद्वापीछसितत्कुरु।सैवमुक्तावरारोहाव्रीडितेवतपस्विनी।निःसंज्ञेवचदुःखे
नतस्थौस्थूणेवनिश्चला।संरंभामर्षताम्राक्षीस्फुरमाणोष्ठसंपुटा।कटाक्षैर्निर्दहंतीवतिर्यग्राजानमै
क्षत।आकारंगूहमानाचमन्युनाचसमीरिता।तपसासंभृतंतेजोधारयामाससैवतदा।सामुहूर्त्तमिव
ध्यात्वादुःखामर्षसमन्विता।भर्त्तारमभिसंप्रेक्ष्यक्रुद्धावचनमब्रवीत्।जानन्नपिमहाराजकस्मादेवंप्रभा
षसे।नजानामीतिनिःशंकंयथान्यःप्राकृतोजनः।अत्रतेहृदयंवेदसत्यस्यैवानृतस्यच।कल्याणंवद
साक्ष्येणमात्मानमवमन्यथाः।योन्यथासंतमात्मानमन्यथाप्रतिपद्यते।किंतेननकृतंपापंचौरेण
त्मापहारिणा।एकोहमस्मीतिचमन्यसेत्वंनहृछयंवेत्सिमुनिंपुराणं।योवेदिताकर्मणःपापकस्यत
स्यांतिकेत्वंवृजिनंकरोषि।मन्यतेपापकंकृत्वानकश्चिद्वेत्तिमामिति।विदंतिचैनंदेवाश्चयश्चैवांतरपू
रुषः।आदित्यचंद्रावनिलानलौचद्यौर्भूमिरापोहृदयंयमश्च।अहश्चरात्रिश्चउभेचसंध्येधर्मस्यजाना
तिनरस्यवृत्तं।यमोवैवस्वतस्तस्यनिर्यातयतिदुष्कृतं।हृदिस्थितःकर्मसाक्षीक्षेत्रज्ञोयस्यतुष्यति।न
तुतुष्यतियस्यैषपुरुषस्यदुरात्मनः।तंयमःपापकर्माणंनिर्यातयतिदुष्कृतं।योवमन्यात्मनात्मान

मन्यथाप्रतिपद्यते।नतस्यदेवाःश्रेयांसोयस्यात्मापिनकारणं।स्वयंप्राप्तेतिमामेवंमावमंस्थाःपति
व्रतां।अर्चार्हांनार्चयसिमांस्वयंभार्यामुपस्थितां।किमर्थंमांप्राकृतवदुपप्रेक्षसिसंसदि।नखल्वहमि
दंशून्येरौमिकिंनशृणोषिमे।यदिमेयाचमानायावचनंनकरिष्यसि।दुष्यंतशतधामूर्द्धाततस्तेद्यस्फुटि
ष्यति।भार्यांपतिःसंप्रविश्यसयस्माज्जायतेपुनः।जायायास्तद्धिजायात्वंपौराणाःकवयोविदुः।यदा
गमवतःपुंसस्तदपत्यंप्रजायते।तत्तारयतिसंतत्यापूर्वप्रेतान्पितामहान्।पुन्नाम्नोनरकाद्यस्मात्पित
रंत्रायतेसुतः।तस्मात्पुत्रइतिप्रोक्तःस्वयमेवस्वयंभुवा।साभार्यायागृहेदक्षासाभार्यायाप्रजावती।
साभार्यायापतिप्राणासाभार्यायापतिव्रता।अर्द्धंभार्यामनुष्यस्यभार्याश्रेष्ठतमःसखा।भार्यामूलं
त्रिवर्गस्यभार्यामूलंतरिष्यतः।भार्यावंतःक्रियावंतःसभार्यागृहमेधिनः।भार्यावंतःप्रमोदंतेभार्यावं
तःश्रियान्विताः।सखायःप्रविविक्तेषुभवंत्येताःप्रियंवदाः।पितरोधर्मकार्येषुभवंत्यार्तस्यमातरः।कां
तारेष्वपिविश्रामोजनस्याध्वनिकस्यवै।यःसदारःसविश्वास्यस्तस्माद्दाराःपरागतिः।संसरंतमपिप्रेतंविष
मेष्वेकपातिनं।भार्यैवान्वेतिभर्त्तारंसततंयापतिव्रता।प्रथमंसंस्थिताभार्यापतिंप्रेत्यप्रतीक्षते।पूर्वंमृतं

चभर्त्तारंपश्चात्साप्यनुगच्छति।एतस्मात्कारणाद्राजन्पाणिग्रहणमिष्यते।यदाप्नोतिपतिर्भार्यामिहलोके
परत्रच।आत्मात्मनैवजनितःपुत्रइत्युच्यतेबुधैः।तस्माद्भार्यांनरःपश्येन्मातृवत्पुत्रमातरं।भार्यायांजनितं
पुत्रमादर्शेष्विवचाननं।ह्लादतेजनिताप्रेक्ष्यस्वर्गंप्राप्येवपुण्यकृत्।दह्यमानामनोदुःखैर्व्याधिभिश्चातुरान
राः।ह्लादंतेस्वेषुदारेषुघर्मार्त्ताःसलिलेष्विव।सुसंरब्धोपिरामाणांनकुर्यादप्रियंनरः।रतिंप्रीतिंचधर्मंचता
स्वायत्तमवेक्ष्यहि।आत्मनोजन्मनःक्षेत्रंपुण्यंरामाःसनातनं।ऋषीणामपिकाशक्तिःस्रष्टुंरामामृतेप्र
जां।प्रतिपद्ययदासूनुर्धरणीरेणुगुंठितः।पितुराश्लिष्यतेंगानिकिमस्त्यभ्यधिकंततः।सत्वंस्वयमभिप्रा
प्तंसाभिलाषमिमंसुतं।प्रेक्षमाणंकटाक्षेणकिमर्थमवमन्यसे।अंडानिबि[illegible]भ्रतिस्वानिनभिंदंतिपि
पीलिकाः।नभरेथाःकथंनुत्वंधर्मज्ञःसन्स्वमात्मजं।नवाससांनरामाणांनापांस्पर्शस्तथाविधः।शिशो
रालिंग्यमानस्यस्पर्शःसूनोर्यथासुखः।ब्राह्मणोद्विपदांश्रेष्ठोगौर्वरिष्ठाचतुष्पदां।गुरुर्गरीयसांश्रेष्ठःपु
त्रःस्पर्शवतांवरः।स्पृशतुत्वांसमाश्लिष्यपुत्रोयंप्रियदर्शनः।पुत्रस्पर्शात्सुखतरःस्पर्शोलोकेनविद्यते।त्रिषु
वर्षेषुपूर्णेषुप्रजाताहमरिंदम।इमंकुमारंराजेंद्रतवशोकविनाशनं।आहर्त्तावाजिमेधस्यशतसंख्यस्यपौ

खवाइतिवागंतरिक्षेमांसूतकेभ्यवदत्पुरा। ननुनामांकमारोप्यस्नेहाद्ग्रामांतरंगताः। मूर्द्धिपुत्रानुपाघ्रायप्र
तिनंदंतिमानवाः। वेदेष्वपिवदंतीमंमंत्रग्रामंद्विजातयः। जातकर्म्मणिपुत्राणांतवापिविदितंतथा। अंगादं
गात्संभवसिहृदयादधिजायसे। आत्मावैपुत्रनामासिसजीवशरदःशतं। जीवितंत्वदधीनंमेसंतानमपिचा
क्षयं। तस्मात्त्वंजीवमेपुत्रसुसुखीशरदांशतं। त्वदंगेभ्यःप्रसूतोयंपुरुषात्पुरुषोपरः। सरसीवामलेत्मानं
द्वितीयंपश्यवैसुतं। यथाह्याहवनीयोग्निर्गार्हपत्यात्प्रणीयते। तथात्वत्तःप्रसूतोयंत्वमेकःसन्द्विधाकृतः।
मृगावकृष्टेनपुरामृगयांपरिधावता। अहमासादितोराजन्कुमारीपितुराश्रमे। उर्वशीपूर्वचित्तिश्चसह
जन्याचमेनका। विश्वाचीचघृताचीचषडेवाप्सरसांवराः। तासांसामेनकानामब्रह्मयोनिर्वराप्सराः। दिवः
संप्राप्यजगतीविश्वामित्रादजीजनत्। सामांहिमवतःपृष्ठेसुषुवेमेनकाप्सराः। अवकीर्यचमांयातापरा
त्मजामिवासती। किंतुकर्माशुभंपूर्वंकृतवत्यस्म्यजन्मनि। यदहंबांधवैस्त्यक्ताबाल्येसंप्रतिचत्वया। कामंत्व
यापरित्यक्तागमिष्यामिस्वमाश्रमं। इमंतुबालंसंत्यक्तुंनार्हस्यात्मजमात्मना॥ दुष्यंतउवाच ॥
नपुत्रमभिजानामित्वयिजातंशकुंतले। असत्यवचनानार्यःकस्तेश्रद्धास्यतेवचः। मेनकानिरनुक्रोशावं

धकीजननीतव।ययाहिमवतःपृष्ठेनिर्माल्यमिवचोज्झिता।सचापिनिरनुक्रोशःक्षत्रयोनिःपितातव।वि
श्वामित्रोब्राह्मणत्वेलुब्धःकामवशंगतः।मेनकाप्सरसांश्रेष्ठामहर्षीणांपिताचते।तयोरपत्यंकस्मात्त्वं
पुंश्चलीवप्रभाषसे।अश्रद्धेयमिदंवाक्यंकथयंतीनलज्जसे।विशेषतोमत्सकाशेदुष्टतापसिगम्यतां।क्व
महर्षिःसचैवाग्र्यःसाप्सराःक्वचमेनका।क्वचत्वमेवंकृपणातापसीवेषधारिणी।अतिकायश्चतेपुत्रो
बालोतिबलवानयं।कथमल्पेनकालेनशालस्तंभइवोद्गतः।सुनिकृष्टाचतेयोनिःपुंश्चलीवप्रभाषसे।
यदृच्छयाकामरागाज्जातामेनकयाह्यसि।सर्वमेतत्परोक्षंमेयत्त्वंवदसितापसि।नाहंत्वामभिजानामिय
थेष्टंगम्यतांत्वया ॥ शकुंतलोवाच ॥ राजन्सर्षपमात्राणिपरच्छिद्राणिपश्यसि।आत्मनोबिल्वमात्रा
णिपश्यन्नपिनपश्यसि।मेनकात्रिदशेष्वेवत्रिदशाश्चानुमेनकां।ममैवोद्रिच्यतेजन्मदुष्यंततवजन्मतः।क्षि
तावटसिराजेंद्रअंतरिक्षेचराम्यहं।आवयोरंतरंपश्यमेरुसर्षपयोरिव।महेंद्रस्यकुबेरस्ययमस्यवरुणस्य
च।भवनान्यनुसंयामिप्रभावंपश्यमेनृप।सत्यश्चापिप्रवादोयंयंप्रवक्ष्यामितेनघ।निदर्शनार्थंनद्वेषाच्छ्रुत्वा
तत्क्षंतुमर्हसि।विरूपोयावदादर्शेनात्मनःपश्यतेमुखं।मन्यतेतावदात्मानमन्येभ्योरूपवत्तरं।यदातुमुख

मादृशैर्विकृतंसोभिवीक्षते।तदांतरंविजानातिआत्मानंचेतरंजनं।अतीवरूपसंपन्नोनकेचिदवमन्यते।अ
तीवजल्पन्दुर्वाचोभवतीहविहेठकः।मूर्खोहिजल्पतांपुंसांश्रुत्वावाचःशुभाशुभाः।अशुभंवाक्यमादत्तेपुरी
षमिवसूकरः।प्राज्ञस्तुजल्पतांपुंसांश्रुत्वावाचःशुभाशुभाः।गुणवद्वाक्यमादत्तेहंसःक्षीरमिवांभसः।अ
न्यान्परिवदन्साधुर्यथाहिपरितप्यते।तथापरिवदन्नन्यांस्तुष्टोभवतिदुर्जनः।अभिवाद्ययथावृद्धान्संतोग
च्छंतिनिर्वृतिं।एवंसज्जनमाक्रुश्यमूर्खोभवतिनिर्वृतः।सुखंजीवंत्यदोषज्ञादुःखंदोषानुदर्शिनः।यत्रवाच्याः
परैःसंतःपरानाहुस्तथाविधान्।अतोहास्यतरंलोकेकिंचिदन्यत्रविद्यते।यत्रदुर्जनमित्याहदुर्जनःसज्ज
नःस्वयं।सत्यधर्मच्युतात्पुंसःक्रुद्धादाशीविषादिव।अनास्तिकोप्युद्विजतेजनःकिंपुनरास्तिकः।स्वयमुत्पा
द्यवैपुत्रंसदृशंयोवमन्यते।तस्यदेवाःश्रियंघ्नंतिनचलोकानुपाश्नुते।कुलवंशप्रतिष्ठांहिपितरःपुत्रम
ब्रुवन्।उत्तमंसर्वधर्माणांतस्मात्पुत्रंनसंत्यजेत्।स्वपत्नीप्रभवान्पंचलब्धान्क्रीतान्विवर्द्धितान्।कृतान
न्यासुचोत्पन्नान्पुत्रान्वैमनुरब्रवीत्।धर्मकीर्त्यावहान्नृणांमनसःप्रीतिवर्द्धनाः।त्रायंतेनरकाज्जाताःपुत्रा
धर्मप्लवाःपितॄन्।सत्वंनृपतिशार्दूलपुत्रंनत्यक्तुमर्हसि।आत्मानंसत्यधर्मौचपालयन्पृथिवीपते।नरें

आ०प०
१२०

द्र सिंहकपटंनवोढुंत्वमिहार्हसि।वरंकूपशताद्वापीवरंवापीशतात्क्रतुः।वरंक्रतुशतात्पुत्रः सत्यंपुत्रशता
द्वरं।अश्वमेधसहस्रंचसत्यंचतुलयाधृतं।अश्वमेधसहस्राद्धिसत्यमेवविशिष्यते।सर्ववेदाधिगमनंस
र्वतीर्थावगाहनं।सत्यंचववचनंराजन्समंवस्यान्नवासमं।नास्तिसत्यसमोधर्मोनसत्याद्विद्यतेपरं।नहि
तीव्रतरंकिंचिदनृतादिहविद्यते।राजन्सत्यंपरंब्रह्मसत्यंचसमयःपरः।मात्याक्षीःसमयंराजन्सत्यंसंगत
मस्तुते।अनृतेचेत्प्रसंगस्तेश्रद्दधासिनचेत्स्वयं।आत्मनाहंतगच्छामित्वादृशेनास्तिसंगतं।त्वामृतेपिहि
दुष्कंतशैलराजावतंसकं।चतुरंतामिमांमुर्वीपुत्रोमेपालयिष्यति॥ वैशं ॥एतावदुक्त्वाराजानंप्रा
तिष्ठतशाकुंतला।अथांतरिक्षेदुष्कंतंवागुवाचाशरीरिणी।ऋत्विक्पुरोहिताचार्यैर्मंत्रिभिश्चवृतंतदा।भ
स्त्रामातापितुःपुत्रोयेनजातःसएवसः।भरस्वपुत्रंदुष्कंतमावमंस्थाःशाकुंतलां।रेतोधाःपुत्रउन्नयतिन
रदेवयमक्षयात्।त्वंचास्यधातागर्भस्यसत्यमाहशाकुंतला।जायाजनयतेपुत्रमात्मनोंगंद्विधाकृतं।तस्
माद्भरस्वदुष्कंतपुत्रंशाकुंतलंनृप।अभूतिरेषायस्त्यक्त्वाजीवेज्जीवंतमात्मजं।शाकुंतलंमहात्मानंदौष्कं
तिंभरपौरव।भर्तव्योयंत्वयायस्मादस्माकंवचनादपि।तस्माद्भवत्वयंनाम्नाभरतोनामतेसुतः।तच्छ्रुत्वा

१२०

पौरवोराजाव्याहृतंत्रिदिवौकसा।पुरोहितममात्यांश्चसंप्रहृष्टोब्रवीदिदं।श्रुतमेवंत्वेतद्भवंतोस्यदेवदूतस्यभा
षितं।अहंचाप्येवमेवैनंजानामिस्वीयमात्मजं।यद्यहंवचनादेवगृह्णीयामिममात्मजं।भवेद्धिशंक्योलो
कस्यनैवशुद्धोभवेदयं वैशं तंविशोध्यतदाराजादेवदूतेनभारत।हृष्टःप्रमुदितश्चापिप्रतिज
ग्राहतंसुतं।ततस्तस्यतदाराजापितृकर्माणिसर्वशः।कारयामासमुदितःप्रीतिमानात्मजस्यह।मूर्द्धिचैन
मुपाघ्रायसस्नेहंपरिषस्वजे।सभाज्यमानोविप्रैश्चस्तूयमानश्चवंदिभिः।समुदंपरमांलेभेपुत्रसंस्पर्शजांनृ
पः।तांचैवभार्यांदुष्यंतःपूजयामासधर्मतः।अब्रवीच्चैवतांराजासांत्वपूर्वमिदंवचः।कृतोलोकपरोक्षोयंर
संबंधोवैत्वयासह।तस्मादेतन्मयादेवित्वच्छुद्ध्यर्थंविचारितं।मन्यतेचैवलोकस्तेस्त्रीभावान्मयिसंगतं।पु
त्रश्चायंवृतोराज्येमयातस्माद्विचारितं।यच्चकोपितयात्यर्थंत्वयोक्तोस्म्यप्रियंप्रिये।प्रणयिन्याविशालाक्षि
तत्क्षांतंतेमयाशुभे।तामेवमुक्त्वाराजर्षिर्दुष्यंतोमहिषींप्रियां।वासोभिरन्नपानैश्चपूजयामासभारत।दुष्यंत
स्तुतदाराजापुत्रंशाकुंतलंतदा।भरतंनामतःकृत्वायौवराज्येभ्यषेचयत्।तस्यतत्प्रथितंचक्रंप्रावर्त्ततमहात्म
नः।भास्वरंदिव्यमजितंलोकसंनादनंमहत्।सविजित्यमहीपालांश्चकारवशवर्त्तिनः।चचारचसतांधर्मंप्राप

वानुत्तमंयशः।सराजाचक्रवर्त्त्यासीत्सार्वभौमःप्रतापवान्।ईजेचबहुभिर्यज्ञैर्यथाशक्रोमरुत्पतिः।याज
यामासतंकण्वोविधिवद्भूरिदक्षिणं।श्रीमान्गोविततंनामवाजिमेधमवापसः।यस्मिन्सहस्रंपद्मानांकण्वा
यभरतोददौ।भरताद्भारतीकीर्त्तिर्येनेदंभारतंकुलं।अपरेयेचपूर्वेवैभारताइतिविश्रुताः।भरतस्यान्ववायेहि
देवकल्पामहौजसः।बभूवुर्ब्रह्मकल्पाश्चबहवोराजसत्तमाः।येषामपरिमेयानिनामधेयानिसर्वशः।ते
षांतुतेयथामुख्यंकीर्त्तयिष्यामिभारत।महाभागान्देवकल्पान्सत्यार्जवपरायणान्।यइदंशृणुयान्नित्यंश
कुंतलमनुत्तमं।सपुत्रवान्भवेद्राजन्दुःखंतरेदितिध्रुवं।तस्माच्छ्रोतव्यमेतद्धिश्रावयेच्चप्रयत्नतः।श्रीकीर्त्ति
विशदंनृणांद्वैपायनवचोयथा इत्यादिपर्वणिशाकुंतलंसमाप्तम् ७२ वैशं प्रजापतेस्तुद
क्षस्यमनोर्वैवस्वतस्यच।भरतस्यकुरोःपूरोःराजमीढस्यचानघ।यादवानामिमंवंशंकौरवाणांचसर्वशः।त
थैवभरतानांचपुण्यंस्वस्त्ययनंमहत्।धन्यंयशस्यमायुष्यंकीर्त्तयिष्यामितेनघ।तेजोभिरुदिताःसर्वेमह
र्षिसमतेजसः।दशप्रचेतसःपुत्राःसंतःपुण्यजनाःस्मृताः।मुखजेनाग्निनायेतेपूर्वंदग्धामहौजसः।तेभ्यः
प्रजापतिर्जातोदक्षःप्राचेतसोमुनिः।आत्मतुल्यानजनयत्सहस्रंशंसितव्रतान्।सहस्रसंख्यान्संभूतान्दक्ष

पुत्रांश्च नारदः। मोहनमध्यापयामास सांख्यज्ञानमनुत्तमं। ततः पंचाशतं कन्याः पुत्रिका अभिसंदधौ प्रजा
पतिः प्रजादक्षः सिसृक्षुर्जनमेजय। ददौ स दश धर्म्माय कश्यपाय त्रयोदश। कालस्य नयने युक्ताः सप्त
विंशतिमिंदवे। त्रयोदशानां पत्नीनां या तु दाक्षायणी वरा। मारीचः कश्यपस्तस्यामादित्यान्समजीजन
त्। इंद्रादीन्वीर्यसंपन्नान्विवस्वंतमथापि च। विवस्वतः सुतो यज्ञे यमो वैवस्वतः प्रभुः। मार्त्तंडस्य मनुर्धीमा
नजायत सुतः प्रभुः। यमश्चापि सुतो जज्ञे ख्यातस्तस्यानुजः प्रभुः। धर्मात्मा स मनुर्धीमान्यत्र वंशः प्रतिष्ठि
तः। मनोर्वंशो मानवानां ततोयं प्रथितोभवत्। ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः। ततोभवन्म
हाराज ब्रह्मक्षत्रेण संगतं। ब्राह्मणा मानवास्तेषां सांगं वेदमधारयन्। वेणं धृष्णुं नरिष्यंतं नाभागेक्ष्वाकु
मेव च। कारूषमिव शर्य्यातिं तथा चैवाष्टमीमिलां। एषध्रं नवमं प्राहुः क्षत्रधर्मपरायणं। नाभागारिष्ट द
शमान्मनोः पुत्रान्प्रचक्षते। पंचाशत्तु मनोः पुत्रास्तथैवान्ये भवन्क्षितौ। अन्योन्यभेदात्ते सर्वे विनेशुरिति नः श्रु
तं। पुरूरवास्ततो विद्वानिलायां समपद्यत। सा वै तस्याभवन्माता पिता चैवेति नः श्रुतं। त्रयोदश समुद्रस्य
द्वीपानश्नन्पुरूरवाः। जहार च स विप्राणां रत्नान्युत्क्रोशतामपि। सनत्कुमारस्तं राजन्ब्रह्मलोकादुपेत्य ह।

अनुदर्शिततश्चक्रे प्रत्यगृह्णान्नवाप्यसौ। ततो महर्षिभिः क्रुद्धैः सद्यः शप्तो व्यनश्यत। लोभान्वितो बलम
दान्नष्टसंज्ञो नराधिपः। स हि गंधर्वलोकस्थानुर्वश्या सहितो विराट्। आनिनाय क्रियार्थेऽग्नीन्यथावद्वि
हितांस्त्रिधा। षट् सुता यज्ञिरे चैलादायुर्धीमानमावसुः। दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः। नहु
षं वृद्धशर्माणं रजिं गयमनेनसं। स्वर्भानवीसुतानेतानायोः पुत्रान्प्रचक्षते। आयुषो नहुषः पुत्रो धीमा
न्सत्यपराक्रमः। राज्यं शशास सुमहद्धर्मेण पृथिवीपते। पितॄन्देवानृषीन्विप्रान्गंधर्वोरगराक्षसान्। नहु
षः पालयामास ब्रह्म क्षत्रमथो विशः। स हत्वा दस्युसंघातानृषीन्करमदापयत्। पशुवच्चैव तान्पृष्ठे वा
हयामास वीर्यवान्। कारयामास चेंद्रत्वमभिभूय दिवौकसः। तेजसा तपसा चैव विक्रमेणौजसा तथा। य
तिं ययातिं संयातिमायातिमयतिं ध्रुवं। नहुषो जनयामास षट् सुतान्प्रियवादिनः। यतिस्तु योगमास्था
य ब्रह्मभूतोऽभवन्मुनिः। ययातिर्नाहुषः सम्राडासीत्सत्यपराक्रमः। स पालयामास महीमीजे च वहुभि
र्मखैः। अतिभक्त्या पितॄनर्चन्देवांश्च प्रयतः सदा। अन्वगृह्णात्प्रजाः सर्वाः ययातिरपराजितः। तस्य पुत्रा
महेष्वासाः सर्वैः समुदिता गुणैः। देवयान्यां महाराज शर्मिष्ठायां च जज्ञिरे। देवयान्यामजायेतां यदुस्तु

र्वसुरेवचाद्रुह्युश्चानुश्च पूरुश्च शर्मिष्ठायांप्रजज्ञिरे।सशाश्वतीःसमाराजन्प्रजाधर्मेणपालयन्।जरा
मार्छन्महाघोरांनाहुषोनृपनाशिनीं।जराभिभूतःपुत्रान्सराजावचनमब्रवीत्।यदुंपूरुंतुर्वसुंचद्रुह्युं
चानुंचभारत।यौवनेनचरन्कामान्युवायुवतिभिःसह।विहर्तुमहमिच्छामिसाह्यंकुरुतपुत्रकाः।तंपुत्रो
देवयानेयःपूर्वजोवाक्यमब्रवीत्।किंकार्यंभवतःकार्यमस्माकंयौवनेनच।ययातिरब्रवीत्तंवैजरामेप्र
तिगृह्यतां।यौवनेनत्वदीयेनचरेयंविषयानहं।यजतोदीर्घसत्रैर्मेशापाच्चोशनसोमुनेः।कामार्थःप
रिहीणोमेतप्येयंतेनपुत्रकाः।मामकेनशरीरेणराज्यमेकःप्रशास्तुवः।अहंतन्वाभिनवयायुवाका
ममवाप्नुयां।नतेतस्यप्रत्यगृह्णन्यदुप्रभृतयोजरां।तमब्रवीत्ततःपूरुःकनीयान्सत्यविक्रमः।राजंश्च
राभिनवयातन्वायौवनगोचरः।अहंजरांसमादायराज्येस्थास्यामितेज्ञया।एवमुक्तःसराजर्षिस्त
पोवीर्यसमाश्रयात्।संचारयामासजरांतदापुत्रेमहात्मनि।पौरवेणाथवयसाराजायौवनमास्थि
तः।यायातेनापिवयसाराज्यंपूरुरकारयत्।ततोवर्षसहस्रांतेययातिरपराजितः।स्थितःसनृप
शार्दूलःशार्दूलसमविक्रमः।ययातिरपिपत्नीभ्यांदीर्घकालंविहृत्यवा।विश्वाच्यासहितोरेमेपुत्रश्चै

गरथेवने। नाध्यगच्छत्तदातृप्तिंकामानांसमहायशाः। अवेक्ष्यमनसाराजन्निमांगाथांतदाजगौ। नजातु
कामःकामानामुपभोगेनशाम्यति। हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते। पृथिवीरत्नसंपूर्णाहिरण्यप
शवःस्त्रियः। नालमेकस्यतत्सर्वमितिमत्वाशमंव्रजेत्। यदानकुरुतेपापंसर्वभूतेषुकर्हिचित्। कर्मणाम
नसावाचाब्रह्मसंपद्यतेतदा। यदाचायंनबिभेतियदाचास्मान्नबिभ्यति। यदानेच्छतिनद्वेष्टिब्रह्मसंपद्य
तेतदा। इत्यवेक्ष्यमहाप्राज्ञःकामानांफल्गुतांनृप। समाधायमनोबुध्याप्रत्यगृह्णाज्जरांसुतात्। दत्वाच
यौवनंराजापूरुंराज्येभिषिच्यच। अतृप्तएवकामानांपूरुंपुत्रमुवाचह। त्वयादायादवानस्मित्वंमेवंशकरः
सुतः। पौरवोवंशइतितेख्यातिंलोकेगमिष्यति॥ वैशं ॥ ततःसनृपशार्दूलःपूरुंराज्येभिषिच्यच। ततः
सुचरितंकृत्वाभृगुतुंगेमहातपाः। कालेनमहतापश्चात्कालधर्ममुपेयिवान्। कारयित्वात्वनशनंसदारः
स्वर्गमाप्तवान् इत्यादिपर्वणिययाते ७२ जनमेजयउ ययातिःपूर्वजोस्माकंदशमोयः
प्रजापतेः। कथंसशुक्रतनयांलेभेपरमदुर्लभां। एतदिच्छाम्यहंश्रोतुंविस्तरेणतपोधन। आनुपूर्व्याचमेशंस
राज्ञोवंशकरान्पृथक्॥ वैशं ॥ययातिराशीन्नृपतिर्देवराजसमद्युतिः। तंशुक्रवृषपर्वाणौवव्रातेवैयथापु

रातत्वेहंसंप्रवक्ष्यामिपृछतेजनमेजया।देवयान्याश्चसंयोगंययातेर्नाहुषस्यच।सुराणामसुराणांचसमजाय
तवैमिथः।ऐश्वर्यंप्रतिसंघर्षस्त्रैलोक्येसचराचरे।जिगीषयाततोदेवाववव्रिरेंगिरसंमुनिं।पौरोहित्येनयाज्यार्थे
काव्यंतूशनसंपरे।ब्राह्मणौतावुभौनित्यमन्योन्यस्पर्द्धिनौभृशं।तत्रदेवानिजघ्नुर्यान्दानवान्युधिसंगतान्
तान्पुनर्जीवयामासकाव्योविद्याबलाश्रयात्।ततस्तेपुनरुत्थाययोधयांचक्रिरेसुरान्।असुरास्तुनिजघ्नु
र्यान्सुरान्समरमूर्द्धनि।नतान्संजीवयामासबृहस्पतिरुदारधीः।नहिवेदसतांविद्यांयांकाव्योवेत्तिवीर्यवान्।
संजीविनींततोदेवाविषादमगमन्परं।तेतुदेवाभयोद्विग्नाःकाव्यादुशनसस्तदा।ऊचुःकचमुपागम्यज्येष्ठंपुत्रं
बृहस्पतेः।भजमानान्भजस्वास्मान्कुरुनःसाह्यमुत्तमं।यासाविद्यानिवसतिब्राह्मणेमिततेजसि।शुक्रेतामाहृ
रक्षिप्रंभागभाङ्नोभविष्यसि।वृषपर्वसमीपेहिशक्योद्रष्टुंत्वयाद्विजः।रक्षतेदानवांस्तत्रनसरक्षत्यदानवान्।
तमाराधयितुंशक्तोभवान्पूर्ववयाःकविं।देवयानींचदयितांसुतांतस्यमहात्मनः।त्वमाराधयितुंशक्तोनान्यः
कश्चनविद्यते।शीलदाक्षिण्यमाधुर्यैराचारेणदमेनच।देवयान्यांहितुष्टायांविद्यांतांप्राप्स्यसिध्रुवं।तथेत्युक्त्वा
ततःप्रायाद्बृहस्पतिसुतःकचः।तदाभिपूजितोदेवैःसमीपेवृषपर्वणः।सगत्वात्वरितोराजन्देवैःसंप्रेषितःक

वः। असुरेंद्रपुरे शुक्रं दृष्ट्वा वाक्यमुवाच ह। ऋषेरंगिरसः पौत्रं पुत्रं साक्षाद्बृहस्पतेः। नाम्ना कचमिति ख्यातं
शिष्यं गृह्णातु मां भवान्। ब्रह्मचर्यं चरिष्यामि त्वय्यहं परमं गुरौ। अनुमन्यस्व मां ब्रह्मन्सहस्रं परिवत्सरान्।
शुक्र उवाच   कच सुस्वागतं तेस्तु प्रतिगृह्णामि ते वचः। अर्चयिष्येऽहमर्च्यं त्वामर्चितोस्तु बृहस्पतिः ॥
वैशं   कचस्तु तं तथेत्युक्त्वा प्रतिजग्राह तद्व्रतं। आदिष्टं कविपुत्रेण शुक्रेणोशनसा स्वयं। व्रतस्य प्राप्तकालं
स यथोक्तं प्रत्यगृह्णत। आराधयन्नुपाध्यायं देवयानीं च भारत। नित्यमाराधयिष्यंस्तां युवा यौवनगोचरे।
गायन्नृत्यन्वादयंश्च देवयानीमतोषयत्। संशीलयन्देवयानीं कन्यां संप्राप्तयौवनां। पुष्पैः फलैः प्रेषणै
श्च तोषयामास भारत। देवयान्यपि तं विप्रं नियमव्रतधारिणं। गायंती च चरंती च रहः पर्यचरत्तदा। पंचवर्ष
शतान्येवं कचस्य चरतो व्रतं। तत्रातीयुरथो बुध्वा दानवास्तं ततः कचं। गा रक्षंतं वने दृष्ट्वा रहस्येकममर्षि
ताः। जघ्नुर्बृहस्पतेर्द्वेषाद्विद्यारक्षार्थमेव च। हत्वा शालावृकेभ्यश्च प्रायच्छंल्लवशः कृतं। ततो गावो निवृत्तास्ता अ
गोपास्तन्निवेशनं। सा दृष्ट्वा रहिता गाश्च कचेनाभ्यागता वनात्। उवाच वचनं काले देवयान्यथ भारत   देव
यान्युवाच   अहुतं चाग्निहोत्रं ते सूर्यश्चास्तंगतः प्रभो। अगोपाश्चागता गावः कचस्तात न दृश्यते। व्यक्तं हतो

मृतोवापिकचस्तातभविष्यति।तंविनानचजीवेयमितिसत्यंब्रवीमिते शुक्रउवाच अयमेहीतिसंश
ब्दश्चतंसंजीवयाम्यहं।ततःसंजीविनींविद्यांप्रयुज्यकचमाह्वयत्।समिधश्चकुशादीनिकाशभारंचभाविनि।
गृहीत्वाश्रममारात्तंवटवृक्षंसमाश्रितः।गावश्चसहिताःसर्वावृक्षच्छायामुपाश्रिताः।असुरास्तत्रमांदृष्ट्वाकस्त्व
मित्यभ्यचोदयन्।बृहस्पतिसुतश्चाहंकचइत्यभिविश्रुतः।इत्युक्तमात्रेमांहत्वापेषीकृत्वातुदानवाः।दत्वाशालावृ
केभ्यस्तुसुखंजग्मुःस्वमालयं।आहूतोविद्ययाभद्रेभार्गवेणमहात्मना।त्वत्समीपमिहायातःकथंचित्समजी
वितः।भित्वाभित्वाशरीराणिवृकाणांसविनिर्गतः।आहूतःप्रादुरभवत्कथोहृष्टोथविद्यया।हतोहमितिचा
चख्यौपृष्टोब्राह्मणकन्यया।सपुनर्देवयान्योक्तःपुष्पाहारीयदृच्छया।वनंययौकचोविप्रोददृशुर्दानवाश्चतं॥
पुनस्तंपेषयित्वातुसमुद्रांभस्यमिश्रयन्।चिरंगतंपुनःकन्यापित्रेतंसन्यवेदयत्।विप्रेणपुनराहूतोविद्यया
गुरुदेहजः।पुनरावृत्यतद्वृत्तंन्यवेदयततद्यथा।ततोद्वितीयंहत्वातंदग्ध्वाकृत्वाचचूर्णशः।प्रायच्छन्ब्राह्मण
यैवसुरायामसुरास्तदा।देवयान्यथभूयोपिपितरंवाक्यमब्रवीत्।पुष्पाहारःप्रेषणकृत्कचस्तातनदृश्यते॥
शुक्रउवाच बृहस्पतेःसुतःपुत्रिकचःप्रेतगतिंगतः।विद्ययाजीवितोप्येवंहन्यतेकरवामकिं॥मैवंशु

वो मा रुद देवयानि न त्वादृशी मर्त्यमनुप्रशोचते। यस्यास्तव ब्रह्म च ब्राह्मणाश्च सेंद्रा देवा वसवोथाश्विनौ च
सुरद्विषश्चैव जगच्च सर्वमुपस्थाने सन्नमंति प्रभावात्। अशक्योसौ जीवयितुं द्विजातिः संजीवितो वध्यते
चैव भूयः॥ देवयान्युवाच ॥ यस्यांगिरा वृद्धतमः पितामहो बृहस्पतिश्चापि पिता तपोनिधिः। ऋषेः
पुत्रं तमथो वापि पौत्रं कथं न शोचेयमहं न रुद्यां। स ब्रह्मचारी च तपोधनश्च सदोत्थितः कर्मसु चैव दक्षः। क
चस्य मार्गं प्रतिपत्स्ये न भोक्ष्ये प्रियो हि मे तात कचोभिरूपः॥ वैशं॥ स पीडितो देवयान्या महर्षिः समा
हूय संरंभाच्चैव काव्यः। असंशयं मामसुरा द्विषंति ये मे शिष्यानागतान्सूदयंति। अब्राह्मणं कर्तुमिच्छंति
रौद्रास्ते मां यथा व्यभिचरंति नित्यं। अप्यस्य पापस्य भवेदिहांतः कं ब्रह्महत्या न दहेदपींद्रं। गुरोर्हि भीतो विद्यया
चोपहूतः शनैर्वाक्यं जठरे व्याजहार। तमब्रवीत्केन पथोपनीतस्त्वं चोदरे तिष्ठसि ब्रूहि विप्र॥ कच उवाच॥
तव प्रसादान्न जहाति मां स्मृतिः स्मरामि सर्वं यच्च यथा च वृत्तं। न त्वेवं स्यात्तपसः संक्षयो मे ततः क्लेशं घोरमिमं स
हामि। असुरैः सुरायां भवतोस्मि दत्तो हत्वा दग्ध्वा चूर्णयित्वा च काव्य। ब्राह्मीं मायां चासुरी विप्र माया त्वयि स्थि
ति कथमेवाभिवर्त्तेत॥ शुक्र उवाच॥ किं ते प्रियं करवाण्यद्य वत्स वधेन मे जीवितं स्यात्कचस्य। नान्यत्र कु

द्वेममभेदनेनहृश्पेत्कचोमकृतोदेवयानि देवयान्युवाच द्वौमांशोकावग्निकल्पौदहेतांकचस्यनाश
स्तवचैवापघातः।कचस्यनाशेममशर्म्मनास्तितवोपघातेजीवितुंनास्मिशक्ता शुक्रउ संसिद्धरूपो
सिबृहस्पतेःसुतयत्वांभक्तंभजतेदेवयानी।विद्यामिमांप्राप्नुहिजीविनींत्वंनचेदिंद्रःकचरूपीत्वमद्य।ननि
वर्त्तेत्पुनर्जीवन्कश्चिदन्योममोदरात।ब्राह्मणंवर्जयित्वैकंतस्माद्विद्यामवाप्नुहि।पुत्रोभूत्वाभावयभावितोमा
मस्माद्देहादुपनिष्क्रम्यतात।समीक्षेथाधर्मवतीमवेक्षांगुरोःसकाशात्प्राप्यविद्यांसविद्यः वैशंप
गुरोःसकाशात्समवाप्यविद्यांभित्वाकुक्षिंनिर्विचक्रामविप्रः।कचोभिरूपस्तत्क्षणाद्ब्राह्मणस्यशुक्लात्ययेपौ
र्णमास्यामिवेंदुः।दृष्ट्वाचतंपतितंब्रह्मराशिमुत्थापयामासमृतंकचोपि।विद्यांसिद्धांतामवाप्याभिवाद्यत
तःकचस्तंगुरुमित्युवाच।यःश्रोत्रयोरमृतंसंन्निषिंचेद्विद्यामविद्यस्ययथाममायं।तंमन्येहंपितरंमातरंचतत
स्मैनद्रुह्येत्कृतमस्यजानन्।ऋतस्यदातारमनुत्तमस्यनिधिंनिधीनामपिलब्धविद्याः।येनाद्रियंतेगुरुमर्चनी
यंपापंपीतंतदासुरयामोहितेन।समन्युरुत्थायमहानुभावस्तदोशनाविप्रहितंचिकीर्षुः।सुरापानंप्रति
संजातमन्युःकाव्यःस्वयंवाक्यमिदंजगाद।योब्राह्मणोद्यप्रभृतीहकश्चिन्मोहात्सुरांपास्यतिमंदबुद्धिः।अपेतध

अ्पुर

र्मो ब्रह्महा चैव सस्यादस्मिंल्लोके गर्हितः स्यात्परे चामयाचेतां विप्रधर्मोक्तिसीमां मर्यादां वै स्थापितां सर्वलो
के। संतो विप्राः शुश्रुवांसो गुरूणां देवा लोकाः श्चोपशृण्वंत्नु सर्वे। इतीदमुक्त्वा स महानुभावस्तपोनिधीनां निधि
रप्रमेयः। तान्दानवान्दैवविमूढबुद्धीनिदं समाहूय वचोभ्युवाच। आचक्षे वो दानवाः बालिशाः स्थ सिद्धः कचो व
त्स्यति मत्सकाशे। संजीविनीं प्राप्य विद्यां महात्मा तुल्यप्रभावो ब्राह्मणो ब्रह्मभूतः। एतावदुक्त्वा वचनं विरराम
स भार्गवः। दानवा विस्मयाविष्टाः प्रययुः स्वनिवेशनं। गुरोरुष्य सकाशे तु दश वर्षशतानि सः। अनुज्ञातः क
चो गंतुमियेष त्रिदशालयं इत्यादिपर्वणि याययाते ७४ वैशं समावृत्तव्रतं तं तु विसृष्टं गुरु
णा तदा। प्रस्थितं त्रिदशावासं देवयान्यब्रवीदिदं। ऋषेरंगिरसः पौत्र वृत्तेनाभिजनेन च। भ्राजसे विद्यया चैव त
पसा च दमेन च। ऋषिर्यथांगिरा मान्यः पितुर्मम महायशाः। तथा मान्यश्च पूज्यश्च मम भूयो बृहस्पतिः। एवं ज्ञा
त्वा विजानीहि यद्ब्रवीमि तपोधन। व्रतस्थे नियमोपेते यथा वर्त्ताम्यहं त्वयि। स समावृत्तविद्यो मां भक्तां भजितुम
र्हसि। गृहाण पाणिं विधिवन्मम मंत्रपुरस्कृतं कच उवाच पूज्यो मान्यश्च भगवान्यथा तव पिता मम
तथा त्वमनवद्यांगी पूजनीयतरा मम। प्राणेभ्योपि प्रियतरा भार्गवस्य महात्मनः। त्वं भद्रे धर्मतः पूज्या गुरुपु

१२६

त्रीसदाममामागुरोर्गरीयसीत्वत्तातस्माद्गुरुतरामममानमामर्हसिकल्याणिवक्तुमेवंशुचिस्मिते।यथाममगुरुर्नि
त्यंमान्यःशुक्रःपितातव।देवयानितथैवत्वंनैवंमांवक्तुमर्हसि देवयान्युवाच गुरुपुत्रस्यपुत्रोवैनत्वंपुत्र
श्चमेपितुः।तस्मात्पूज्यश्चमान्यश्चममापित्वंद्विजोत्तम।असुरैर्हन्यमानेचकचत्वयिपुनःपुनः।तदाप्रभृतियाप्रीति
स्तांत्वमद्यस्मरस्वमे।सौहार्देचानुरागेचवेत्थमेभक्तिमुत्तमां।नमामर्हसिधर्मज्ञत्यक्तुंभक्तामनागसं॥ कचउ
वाच अनियोज्येनियोगेमांनियुनंक्षिशुभव्रते।प्रसीदसुभ्रुत्वंमह्यंगुरोर्गुरुतराशुभे।यत्रोषितंविशाला
क्षित्वयाचंद्रनिभानने।तत्राहमुषितोभद्रेकुक्षौकाव्यस्यभाविनि।भगिनीधर्मतोमेत्वंमैवंवोचःसुमध्यमे।सुख
मस्म्युषितोभद्रेनमन्युर्विद्यतेमम।आपृच्छेत्वांगमिष्यामिशिवमाशंसमेपथि।अविरोधेनधर्मस्यस्मर्त्तव्योस्मि
कथांतरे।अप्रमत्तोत्थितानित्यमाराधयगुरुंमम देवयान्युवाच यदिमांधर्मकार्यार्थेप्रत्याख्यास्यसिया
चितः।ततःकचनतेविद्यासिद्धिमेषागमिष्यति कचउवाच गुरुपुत्रीतिकृत्वाहंप्रत्याचक्षेनदोषतः।गुरुणाचा
नुज्ञातःकाममेवंशपस्वमां।आर्षंधर्मंब्रुवाणोहंदेवयानियथात्वया।शप्तोनार्होस्मिशापस्यकामतोद्यनधर्मतः।
तस्माद्भवत्यायःकामोनतथासभविष्यति।ऋषिपुत्रोनतेकश्चिज्जातुपाणिंग्रहिष्यति।फलिष्यतिनतेविद्यायत्त्वमा

मान्हुतन्नथा। अध्यापयिष्यामितुयंतस्यविद्याफलिष्यति वैशं एवमुक्त्काद्विजश्रेष्ठोदेवयानींकचस्त
था। त्रिदशेशालयंशीघ्रंजगामद्विजसत्तमः। तमागतमभिप्रेक्ष्यदेवाइंद्रपुरोगमाः। बृहस्पतिंसभाज्येदंकचंवचन
मब्रुवन् देवाऊचुः यत्त्वयास्मद्धितंकर्मकृतंवैपरमाद्भुतं। नतेयशःप्रणशितांभागभक्चभविष्यसि
इत्यादिपर्वणियायाते ७५ वैशं कृतविद्येकचेप्राप्तेहृष्टरूपादिवौकसः। कचादधीत्यतांविद्यांकृ
तार्थाभरतर्षभ। सर्वएवसमागम्यशतक्रतुमथाब्रुवन्। कालस्तेविक्रमस्याद्यजहिशत्रून्पुरंदरः। एवमुक्तस्तुस
हितैस्त्रिदशैर्मघवांस्तदा। तथेत्युक्त्वाप्रचक्रामसोऽपश्यतवनेस्त्रियः। क्रीडंतीनांतुकन्यानांवनेचैत्ररथोपमे। वा
युर्भूतःसवस्त्राणिसर्वाण्येवव्यमिश्रयत्। ततोजलात्समुत्तीर्यकन्यास्ताःसहितास्तदा। वस्त्राणिजगृहुस्तानिय
थासन्नान्यनेकशः। तत्रवासोदेवयान्याःशर्मिष्ठाजगृहेतदा। व्यतिमिश्रमजानंतीदुहितावृषपर्वणः। ततस्तयो
र्मिथस्तत्रविरोधःशमजायत। देवयान्याश्चराजेंद्रशर्मिष्ठायाश्चतत्कृते देवयान्युवाच कस्माद्गृह्णासिमे
वस्त्रंशिष्याभूत्वाममासुरि। समुदाचारहीनायाननतेसाधुभविष्यति शर्मिष्ठोवाच आशीनंचशयानंचपि
तातेपितरंमम। स्तौतिवंदीवचाभीक्ष्णंनीचैःस्थित्वाविनीतवत्। याचतस्त्वंहिदुहितास्तुवतःप्रतिगृह्णतः। अना

युधास्वायुधायारिक्ताद्धुभ्यसिभिक्षुकि।ल्पस्यसेप्रतियोद्धारंनहित्वांगणयाम्यहं।प्रतिकूलंवदसिचेदितःप्र
भृतियाचकि।आक्रुष्यममदासीभिप्रस्यास्यामिवहिर्वहिः॥ वैशं ॥समुत्क्षिप्यदेवयानींगतांसक्रांच
वाससि।शर्मिष्ठाप्राक्षिपत्कूपेततःस्वपुरमागमत्।हतेयमितिविज्ञायशर्मिष्ठापापनिश्चया।अनवेक्ष्यय
यौवेश्मक्रोधवेगपरायणा।अथतंदेशमभ्यागाद्ययातिर्नहुषात्मजः।श्रांतयुग्यःश्रांतहयोमृगलिप्सुःपिपा
सितः।सनाहुषःप्रेक्षमाणउदपानंगतोदकं।ददर्शराजातांतत्रकन्यामग्निशिखामिव।तामपृछत्सदृष्ट्वैवक
न्याममरवर्णिनीम्।सांत्वयित्वानृपश्रेष्ठःसाम्नापरमवल्गुना।कात्वंताम्रनखीश्यामासुमृष्टमणिकुंडला।दी
र्घध्यायसिचात्यर्थंकस्माच्छोचसिचातुरा।कथंचपतितास्यस्मिन्कूपेवीरुत्तृणावृते।दुहिताचैवकस्यत्वं
वदसत्यंसुमध्यमे देवयान्युवाच योसौदेवैर्हतान्दैत्यानुत्थापयतिविद्यया।तस्यशुक्रस्यकन्याहंसमां
नूनंनबुध्यसे।एषमेदक्षिणोराजन्पाणिस्ताम्रनखांगुलिः।समुद्धरगृहीत्वामांकुलीनस्त्वंहिमेमतः।जानामि
हित्वांसंशांतंवीर्यवंतंयशस्विनं।तस्मान्मांपतितामस्मात्कूपादुद्धर्तुमर्हसि॥ वैशं तामथोब्राह्मणीं
राजाविज्ञायनहुषात्मजः।गृहीत्वादक्षिणेपाणौचुज्जहारनततोऽवटात्।उद्धृत्यचैनांतरसातस्मात्कूपान्नराधिपः।

आमंत्रयित्वासुश्रोणींययातिः~~[illegible]~~स्वपुरंययौ।गतेतुनाहुषेतस्मिन्देवयान्यथनिंदिता।उवाच
शोकसंतप्ताघूर्णिकामागतांपुरः॥ देवयान्युवाच ॥त्वरितंघूर्णिकेगच्छशीघ्रमागच्छमेपितुः।नेदानींसं
प्रवेक्ष्यामिनगरंवृषपर्वणः वेशं सातत्रत्वरितंगत्वाघूर्णिकासुरमंदिरं।दृष्ट्वाकाव्यमुवाचेदंसंभ्रमावि
ष्टचेतना।आचचक्षेमहाप्राज्ञंदेवयानींवनेहतां।शर्मिष्ठयामहाभागदुहित्रावृषपर्वणः।श्रुत्वादुहितरंका
व्यस्तत्रशर्मिष्ठयाहतां।त्वरयानिर्ययौदुःखान्मार्गमाणःसुतांवने।दृष्ट्वादुहितरंकाव्योदेवयानींततोवने।बा
हुभ्यांसंपरिष्वज्यदुःखितोवाक्यमब्रवीत्।आत्मदोषैर्नियच्छंतिसर्वेदुःखसुखेजनाः।मन्येदुश्चरितंतेस्तिय
स्येयंनिष्कृतिःकृता देवयान्युवाच निष्कृतिर्मेस्तुवामास्तुशृणुष्वावहितोमम।शर्मिष्ठयायदुक्तास्मि
दुहित्रावृषपर्वणः।सत्यंकिलैतत्साप्राहदैत्यानामसिगायनः।एवंहिमेकथयतिशर्मिष्ठावार्षपर्वणी।व
चनंतीक्ष्णपरुषंक्रोधरक्तेक्षणाभृशं।स्तुवतोदुहितानित्यंयाचतःप्रतिगृह्णतः।अहंतुस्तूयमानस्यददतोप्र
तिगृह्णतः।इदंमामाहशर्मिष्ठादुहितावृषपर्वणः।क्रोधसंरक्तनयनादर्पपूर्णापुनःपुनः।यद्यहंस्तुवतस्ता
तदुहिताप्रतिगृह्णतः।प्रसादयिष्येशर्मिष्ठामित्युक्तातुसखीमया शुक्रउवाच स्तुवतोदुहितानत्वं

याचतः प्रतिगृह्णतः। अस्तोतुस्तूयमानस्य दुहितादेवयान्यसि। वृषपर्वैवतद्वेदशक्रोराजाचनाहुषः। अचिंत्यं
ब्रह्मनिर्द्वंद्वमैश्वरंहिबलंमम। यच्चकिंचित्सर्वगतंभूमौवायदिवादिवि। तस्याहमीश्वरोनित्यंतुष्टेनोक्तः स्वयंभु
वा। अहंजलंविमुंचामिप्रजानांहितकाम्यया। पुष्णाम्यौषधयः सर्वाइतिसत्यंब्रवीमिते वैशं एवंविषादमा
पन्नांमन्युनासंप्रपीडितां। वचनैर्मधुरैःश्लक्ष्णैः सांत्वयामासतांपिता इत्यादिपर्वणियायाते ७६ शुक्र
उवाच यः परेषांनरोनित्यमतिवादांस्तितिक्षते। देवयानिविजानीहितेनसर्वमिदंजितं। यः समुत्पतितंक्रो
धंनिगृह्णातिहयंयथा। सयंतेत्युच्यतेसद्भिर्नयोरश्मिषुलंबते। यः समुत्पतितंक्रोधमक्रोधेननिरस्यति। देव
यानिविजानीहितेनसर्वमिदंजितं। यः समुत्पतितंक्रोधंक्षमयेहनिरस्यति। यथोरगस्त्वचंजीर्णांसवैपुरुषउ
च्यते। यः संधारयतेमन्युंयोतिवादांस्तितिक्षते। यश्चतप्तोनतपतिदृढंसोर्थस्यभाजनं। योयजेदपरिश्रांतोमास
िमासिशतंसमाः। नक्रुध्येद्यश्चसर्वस्यतयोरक्रोधनोधिकः। यत्कुमाराःकुमार्यश्चवैरंकुर्युरबलेसः। नतत्प्रा
ज्ञोनुकुर्वीतनविदुस्तेवलावलं॥ देवयान्युवाच ॥वेदाहंतातवालापिधर्माणांयदिहांतरं। अक्रोधेचाति
वादेचवेदचापिवलावलं। शिष्यस्याशिष्यवृत्तेस्तुनक्षंतव्यंवुभूषता। तस्मात्संकीर्णवृत्तेषुनवासोममरोचते। पुमां

न २

सोयंहिनिंदंतिवृत्तेनाभिजनेनवा।नतेषुनिवसेत्प्राज्ञः श्रेयोर्थीपापबुद्धिषु।येत्वेनमभिजानंतिवृत्तेनाभिजनेनवा।तेषुसाधुषुवस्तव्यंसवासः श्रेष्ठउच्यते।वाग्दुरुक्तंमहाघोरंदुहितुर्वृषपर्वणः।ममन्मथ्नातिहृदयमग्निकामइवारणिं।नह्यतोदुष्करतरंमन्येलोकेष्वपित्रिषु।यः सपत्नश्रियंदीप्तांहीनश्रीःपर्युपासते।मरणंशोभनंतस्यइतिविद्वज्जनाविदुः॥ इत्यादिपर्वणियायाते ७७ वैशं ततःकाव्योभृगुःश्रेष्ठःसमन्युरुपगम्यह।वृषपर्वाणमासीनमित्युवाचाविचारयन्।नाधर्मश्चरितोराजन्सद्यःफलतिगौरिव।पुत्रेषुवानप्तृषुवानचेदात्मनिपश्यति।फलत्येवध्रुवंपापंगुरुभुक्तमिवोदरे।यदघातयथाविप्रंकचमांगिरसंतदा।अपापशीलंधर्मज्ञंशुश्रूषुमद्गृहेरतं।वधादनर्हतस्तस्यवधाच्चदुहितुर्मम।वृषपर्वन्निबोधेदंत्यक्ष्यामित्वांसबांधवं।स्थातुंत्वद्विषयेराजन्नशक्ष्यामित्वयासह।अहोमामभिजानासिदैत्यमिथ्याप्रलापिनं।यथेममात्मनोदोषंननियच्छस्युपेक्षसे वृषपर्वोवाच नाधर्मंनमृषावादंत्वयिजानामिभार्गव।त्वयिधर्मश्चसत्यंचतत्प्रसीदतुनोभवान्।यद्यस्मानपहायत्वमितोगच्छसिभार्गव।समुद्रंसंप्रवेक्ष्यामोनान्यदस्तिपरायणं शुक्रउ समुद्रंप्रविशध्वंवादिशोवाद्रवतासुराः।दुहितुर्नाप्रियंसोढुंशक्तोहंदयिताहिमे।प्रसाद्यतांदेवयानीजीवितं

यत्रमेस्थितं।योगक्षेमकरस्तेहमिंद्रस्येवबृहस्पतिः वृषपर्वोवाच यत्किंचिदसुरेंद्राणांविद्यतेवसु
भार्गव।त्वयिधर्मश्चसत्यंच भुविहस्तिगवाश्वंवातस्यत्वंममचेश्वरः शुक्रउवाच यत्किंचिदस्तिद्रवि
णंदैत्येंद्राणांमहासुर।तस्येश्वरोस्मियद्येषादेवयानीप्रसाद्यतां वैशं एवमुक्तस्तथेत्याहवृषपर्वाम
हाकविं।देवयान्यंतिकंगत्वातमर्थंप्राहभार्गवः देवयान्युवाच यदित्वमीश्वरस्तातराज्ञोवित्तस्यभार्ग
व।नाभिजानामितत्त्वेहंराजातुवदतुस्वयं वृषपर्वोवाच यंकाममभिकामासिदेवयानिशुचिस्मिते।
तंतेहंसंप्रदास्यामियदिवापिहिदुर्लभं देवयान्युवाच दासींकन्यासहस्रेणशर्मिष्ठामभिकामये।
अनुमांतत्रगछेत्सायत्रदद्याच्चमेपिता वृषपर्वोवाच उत्तिष्ठत्वंगछधात्रिशर्मिष्ठांशीघ्रमानय।यंच
कामयतेकामंदेवयानीकरोतुतं वैशं ततोधात्रीतत्रगत्वाशर्मिष्ठांवाक्यमब्रवीत।उत्तिष्ठभद्रेशर्मि
ष्ठेज्ञातीनांसुखमावह।त्यजतिब्राह्मणःशिष्यान्देवयान्याप्रचोदितः।सायंकामयतेकामंसकार्योद्यत्वयानघे।
॥ शर्मिष्ठोवाच ॥यंसाकामयतेकामंकरवाण्यहमद्यतं।यद्येवमाह्वयेच्छुक्रोदेवयानीकृतेहिमां।मद्दो
षान्मागमच्छुक्रोदेवयानीचमत्कृते वैशं ततःकन्यासहस्रेणवृताशिबिकयातदा।पितुर्नियोगात्त्वरि

तानिश्च्यक्रामपुरोत्तमात्‌ शर्मिष्ठोवाच अहंदासीसहस्रेणदासीतेपरिचारिका।अनुत्वांतत्रयास्या
मियत्रदास्यतितेपिता देवयान्युवाच याचतोदुहिताचाहंस्तुवतःप्रतिगृह्णतः।स्तूयमानस्यदुहिता
कथंदासीभविष्यसि शर्मिष्ठोवाच येनकेनचिदार्त्तानांज्ञातीनांसुखमावहे।अतस्त्वामनुयास्यामिय
त्रदास्यतितेपिता वैशं प्रतिश्रुतेदास्यभावेदुहित्रावृषपर्व्वणः।देवयानीनृपश्रेष्ठपितरंवाक्यमब्रवीत्‌
॥ देवयान्युवाच प्रविशामिपुरंताततुष्टास्मिद्विजसत्तम।अमोघंतवविज्ञानमस्तिविद्याबलंचते
वैशं एवमुक्तोद्विजश्रेष्ठोदुहित्रासमहायशाः।प्रविवेशपुरंहृष्टःपूजितःसर्व्वदानवैः इत्यादिपर्व्वणि
यायाते ७८ वैशं अथदीर्घस्यकालस्यदेवयानीनृपोत्तम।वनंतदेवनिर्याताक्रीडार्थंवरवर्णिनी।
तेनदासीसहस्रेणसार्द्धंशर्मिष्ठयातदा।तमेवदेशंसंप्राप्तायथाकामंचचारसा।ताभिःसखीभिःसहितासर्व्वाभि
र्मुदिताभृशं।क्रीडंत्योभिरताःसर्व्वाःपिबंत्योमधुमाधवं।खादंत्योविविधान्भक्ष्यान्विदशंत्यःफलानिच।पुनश्चनाहु
षोराजामृगलिप्सुर्यदृच्छया।तमेवदेशंसंप्राप्तोजलार्थीश्रमकर्शितः।ददृशेदेवयानींचशर्म्मिष्ठांताश्चयोषि
तः।पिबंतीर्ललमानाश्चदिव्याभरणभूषिताः।उपविष्टांचददृशेदेवयानींशुचिस्मितां।रूपेणाप्रतिमांतासांस्त्री

णांमध्येवरांगनाम्।शर्म्मिष्ठयासेव्यमानांपादसंवाहनादिभिः ययातिरुवाच द्वाभ्यांकन्यासह
स्राभ्यांद्वेकन्येपरिवारिते।गोत्रेचनामनीचैवद्वयोःपृच्छाम्यहंशुभे देवयान्युवाच आख्यास्याम्यहमा
दत्स्ववचनंमेनराधिप।शुक्रोनामासुरगुरुःसुतांजानीहितस्यमां।इयंचमेसखीदासीयत्राहंतत्रगामि
नी।दुहितादानवेंद्रस्यशर्म्मिष्ठावृषपर्व्वणः ययातिरु कथन्नुतेसखीदासीकन्येयंवरवर्ण्णिनी।
असुरेंद्रसुतासुभ्रुपरंकौतूहलंहिमे देवयान्युवाच सर्व्वएवनरश्रेष्ठविधानमनुवर्त्तते।विधान
विहितंमत्वामाविचित्राःकथाःकृथाः।राजवद्रूपवेषौतेब्राह्मींवाचंबिभर्षिच।कोनामत्वंकुतश्चासीक
स्यपुत्रश्चशंसमे ययातिरु ब्रह्मचर्य्येणवेदोमेकृत्स्नःश्रुतिपथंगतः।राजाहंराजपुत्रश्चययाति
रितिविश्रुतः देवयान्यु केनास्यर्थेननृपतेइमंदेशमुपागतः।जिघृक्षुर्व्वारिजंकिंचिदथवामृगय
लिप्सया ययातिरु मृगलिप्सुरहंभद्रेपानीयार्थमुपागतः।बहुधाप्यनुयुक्तोस्मितदनुज्ञातुमर्ह
सि देवयान्यु द्वाभ्यांकन्यासहस्राभ्यांदास्याशर्म्मिष्ठयासह।त्वदधीनास्मिभद्रंतेसखाभर्त्ताचमे
भव ययातिरुवाच विद्ध्यौशनसिभद्रंतेनत्वामर्होस्मिभामिनि।अविवाह्याहिराजानोदेवयानि

पितुस्तव। चतुर्णामपिवर्णानांविवाहंब्राह्मणोर्हति। क्षत्रियाद्याःक्रमाधस्तान्नोत्तरोत्तरकारिणः। कामक्रो
धादथोलोभाद्यत्किंचित्कुरुतेनरः। देवयानिविजानीहिसगच्छेन्नरकंध्रुवं देवयान्यु संसृष्टंब्र
ह्मणाक्षत्रंब्रह्मक्षत्रेणसंहितं। ऋषिश्चऋषिपुत्रश्चनाहुषस्त्वंभजस्वमां ययातिरु एकदेहोद्भवा
वर्णाश्चत्वारोपिवरांगने। पृथक्धर्माः पृथक्शौचास्तेषांतुब्राह्मणोवरः देवयान्युवाच पाणिध
र्मोनाहुषायंपुंभिःसंसेवितःपुरा। तन्मेत्वमग्रहीरग्रेवृणोमित्वामहंततः। कथंनुमेमनःस्विन्याःपाणिम
न्यःपुमान्स्पृशेत। गृहीतमृषिपुत्रेणस्वयंवाप्यृषिणात्वया ययातिरु क्रुद्धादाशीविषात्सर्पात्
ज्वलनात्सर्वतोमुखात्। दुराधर्षतरोविप्रोविज्ञेयःपुरुषेणवै देवयान्युवाच कथमाशीविषात्सर्पा
त्ज्वलनात्सर्वतोमुखात्। दुराधर्षतरोविप्रआत्थमेत्वंनरर्षभ ययातिरु एकमाशीविषोहंतिशस्त्रेणै
कश्चवध्यते। हंतिविप्रःसराष्ट्राणिपुराण्यपिहिकोपितः। दुराधर्षतरोविप्रःतस्माद्भीरुमतोमम। अतोदत्तां
चपित्रात्वांभद्रेनविवहाम्यहं देवयान्यु दत्तांवहस्वतस्मान्मांपित्राराजन्वृतोमया। अयाचतोभ
यंनास्तिदत्तांचप्रतिगृह्णतः वैशं त्वरितंदेवयान्याथसंदिष्टंपितुरात्मनः। सर्वंनिवेदयामासस

धात्रीसास्मैयथातथं।श्रुत्वैववचसराजानंदर्शयामासभार्गवः।दृष्ट्वैवचागतंशुक्रंययातिःपृथिवीपतिः
।ववंदेब्राह्मणंकाव्यंप्रांजलिःप्रणतःस्थितः॥ देवयान्यु राजायंनाहुषस्तातअग्रेमेपाणिमग्रही
त्।नमस्तेदेहिमामस्मैलोकेनान्यंपतिंवृणे शुक्र उ वृतोनयापतिर्वीरसुतयात्वंमनेष्टया।गृह
णमांमयादत्तांमहिषींनहुषात्मज ययातिरु अधर्म्मोनस्पृशेदेषमहान्मामिहभार्गव।वर्ण
संकरजोब्रह्मन्निितित्वांप्रवृणोम्यहं शुक्र उ अधर्म्मात्वांविमुंचामिवृणुत्वंवरमीप्सितं।अस्मिन्वि
वाहेमाम्लासीरधर्म्मात्त्वंनराधिप।वहस्वभार्यांधर्मेणदेवयानींशुचिस्मितां।अनयासहसंप्रीतिमतु
लांसमवाप्नुहि।इयंचापिकुमारीतेशर्मिष्ठावार्षपर्वणी।संपूज्यासततंराजन्माचैनांशयनेह्वयेः
वेशम् एवमुक्तोययातिस्तुशुक्रंकृत्वाप्रदक्षिणं।शास्त्रोक्तविधिनाराजाविवाहमकरोच्छुभं।लब्ध्वा
शुक्रान्महद्वित्तंदेवयानींततोत्तमां।द्विसहस्रेणकन्यानांतथाशर्मिष्ठयासह।संपूजितश्चशुक्रेणदैत्यै
श्चनृपसत्तमः।जगामस्वपुरंहृष्टोऽनुज्ञातोथमहात्मना इत्यादिपर्वणिययाते ७९
वेशं ययातिःस्वपुरंप्राप्यमहेंद्रपुरसन्निभं।प्रविश्यांतःपुरंतत्रदेवयानींन्यवेशयत्।देवयान्या

श्यानुमते सुतां तां वृषपर्व्वणः। अशोकवनिकाभ्यासे गृहं कृत्वान्यवेशयत्। वृतां दासीसहस्रेण शर्मिष्ठां वा
र्षपर्व्वणीं। वासोभिरन्नपानैश्च संविभज्य सुसंस्कृतां। देवयान्यास्तु सहितः स नृपो नहुषात्मजः। विजहार
बहूनब्दान् देववन्मुदितः सुखी। ऋतुकाले तु संप्राप्ते देवयानी वरांगना। लेभे गर्भं प्रथमतः कुमारं च व्यजा
यत। गते वर्षसहस्रे तु शर्मिष्ठा वार्षपर्व्वणी। ददर्श यौवनं प्राप्ता ऋतुं सा चान्वचिंतयत्। ऋतुकालश्च संप्रा
प्तो न च मेस्ति पतिर्वृतः। किं प्राप्तं किं च कर्त्तव्यं किं वा कृत्वा कृतं भवेत्। देवयानी प्रजातासौ वृथाहं प्राप्त
यौवना। यथा तया वृतो भर्त्ता तथैवाहं वृणोमि तं। राज्ञा पुत्रफलं देयमिति मे निश्चिता मतिः। अपीदानीं स
धर्मात्मा इयान्मे दर्शनं रहः वैशं अथ निष्क्रम्य राजासौ तस्मिन्काले यदृच्छया। अशोकवनिकाऽ
भ्यासे शर्मिष्ठां प्रेक्ष्य धिष्ठितः। तमेकं रहिते दृष्ट्वा शर्मिष्ठा चारुहासिनी। प्रत्युद्गम्यांजलिं कृत्वा राजानं वा
क्यमब्रवीत् शर्मिष्ठोवाच सोमस्येंद्रस्य विष्णोर्वा यमस्य वरुणस्य वा। तव वा नाहुष गृहे कः स्त्रि
यं द्रष्टुमर्हति। रूपाभिजनशीलैर्हि त्वं राजन्वेत्थ मां सदा। सा त्वां प्रसादये याचे ऋतुं देहि नराधिप
ययातिरुवाच वेद्मि त्वां शीलसंपन्नां दैत्यकन्यामनिंदितां। रूपं च ते न पश्यामि सूच्यग्रमपि निंदितं।

किंत्वब्रवीन्मामुशनादेवयानीयदावहंनेयमाह्वयितव्यातेशर्म्मिष्ठावार्षपर्वणी॥ शर्म्मिष्ठोवाच
ननर्म्मयुक्तंवचनंहिनस्तिनस्त्रीषुराजन्नविवाहकाले।प्राणात्ययेसर्वधनापहारेपंचानृतान्याहुरपा
तकानि।पृष्टंतुसाक्षेप्रवदंतमन्यथावदंतिमिथ्यापतितंनरेंद्र।एकार्थतायांतुसमर्थितायांमिथ्यावदंतं
त्वनृतंनिहंति यथातिरु राजाप्रमाणंभूतानांसनश्येतमृषावदन्।अर्थकृछ्रमपिप्राप्यनमिथ्या
कर्त्तुमुत्सहे शर्म्मिष्ठो समावेतौमतौराजन्पतिःसख्याश्चयःपतिः।समंविवाहमित्याहुःसख्यामे
सिवृतःपतिः॥ ययातिरु दातव्यंयाचमानेभ्यइतिमेव्रतमाहितं।त्वंचमांयाचसेकामंब्रूहिकिंकरवा
णिते शर्म्मिष्ठो अधर्म्मात्पाहिमांराजन्धर्म्मंचप्रतिपालय।त्वत्तोपत्यवतीलोकेचरेयंधर्म्ममुत्तमं
।त्रयएवाधनाराजन्भार्यादासस्तथासुतः।यंतेसमधिगछंतियस्यैतेतस्यतद्धनं।देवयान्याभुजिष्यास्मि
वश्याचतवभार्गवी।साचाहंचत्वयाराजन्भर्त्तव्येसहसासुभः भजस्वमां वेशं एवमुक्तःसरा
जर्षिःसत्यमित्येवजग्मिवान्।पूजयामासशर्मिष्ठांधर्म्मंचप्रत्यपादयत्।समागम्यचशर्मिष्ठांयथाका
ममवाप्यच।अन्योन्यंचाभिसंपूज्यजग्मतुस्तौयथागतं।तस्मिन्समागमेसुभ्रूःशर्मिष्ठाचारुहासिनी।

आ०प०
१३३

लेभेगर्भंप्रथमतस्तस्मान्नृपतिसत्तमात्।प्रजज्ञेचततःकालेराजन्राजीवलोचना।कुमारंदेवगर्भाभंराजी
वसमलोचनं इत्यादिपर्वणियायाते ८० वैशं श्रुत्वाकुमारंजातंतु।देवयानीशु
चिस्मिता।चिंतयामासदुःखार्त्ताशर्मिष्ठांप्रतिभारत।अभिगम्यचशर्मिष्ठांदेवयान्यब्रवीदिदं देव
यान्युवाच किमिदंवृजिनंसुभ्रुकृतंवैकामलुब्धया शर्मिष्ठा ऋषिरभ्यागतःकश्चिद्धर्मात्मावेदपा
रगः।समयावरदःकामंयाचितोधर्मसंहितं।नाहमन्यायतःकाममाचरामिशुचिस्मिते।तस्मादृषेर्ममापत्यमि
तिसत्यंब्रवीमिते देवयान्यु शोभनंभीरुयद्येवमथसज्ञायतेद्विजः।गोत्रनामाभिजनतोवेत्तुमिच्छामितेद्वि
जं शर्मिष्ठा ओजसातेजसाचैवदीप्यमानोयथारविः।तंदृष्ट्वाममसंप्रष्टुंशक्तिर्नासीच्छुचिस्मिते देव
यान्यु यद्येतदेवंशर्मिष्ठेनमन्युर्विद्यतेमम।अपत्यंयदितेलब्धंज्येष्ठात्श्रेष्ठाच्चवैद्विजात् वैशं अन्योन्य
मेवमुक्त्वातुसंप्रहस्यचतेमिथः।जगामभार्गवीवेश्मतथ्यमित्येवजज्ञुषी।ययातिर्देवपुत्रावजनयन्नृपः।यदुंच
तुर्वसुंचैवविष्णुशक्राविवापरौ।तस्मादेवतुराजर्षेःशर्मिष्ठावार्षपर्वणी।द्रुह्युंचानुंचपूरुंचत्रीन्कुमारानजीज
नत्।ततःकालेतुकस्मिंश्चिद्देवजानीशुचिस्मिता।ययातिसहिताराजन्जगामरहितंवनं।ददर्शचतदातत्रकुमारा

देवरूपिणः।क्रीडमानान्सुविस्रब्धान्विस्मिताचेदमब्रवीत्॥ देवयान्यु ॥कस्यैतेदारकाराजन्देवपुत्रोपमाः
शुभाः।वर्चसारूपतश्चैवसदृशास्तेमतामम।एवंपृष्ट्वातुराजानंकुमारान्पर्यपृच्छत।किंनामधेयंगोत्रंवःपुत्रकाः
कश्चवःपिता।विब्रूतमेयथातथ्यंश्रोतुमिच्छामितंह्यहं।तेदर्शयन्प्रदेशिन्यातमेवनृपसत्तमं।शर्मिष्ठांमातरंचैव
तामाचख्युश्चदारकाः॥ वैशं ॥इत्युक्त्वासहितास्तेतुराजानमुपचक्रमुः।नाभ्यनंदततान्राजादेवयान्यास्त
दांतिके।रुदंतस्तेतुशर्मिष्ठामभ्ययुर्बालकास्तदा।दृष्ट्वातुतेषांबालानांप्रणयंपार्थिवंप्रति।बुद्ध्वाचतत्वतोदेवीश
र्मिष्ठामिदमब्रवीत्॥ देवयान्यु ॥अन्योगच्छतिमांकश्चिदृषिमित्येवमब्रवीः।ययातिमेवनूनंत्वंप्रोत्साहय
सिभामिनि।स्पष्टमेवमयाप्रोक्तंत्वयातुवृजिनंकृतं।मदधीनासतीकस्मादकार्षीर्विप्रियंमम।तमेवासुरधर्मंत्व
माश्रितानबिभेषिमे शर्मिष्ठोवाच यदुक्तमृषिरित्येवतत्सत्यंचारुहासि।न्यायतोधर्मतश्चैवचरंतीनबिभे
मिते।यदात्वयावृतोभर्त्तावृतएवतदामया।सखीभर्त्ताहिधर्मेणभर्त्ताभवतिशोभने।पूज्यासिममसान्यासिज्येष्ठाचा
प्यसिभामिनि।त्वत्तोपिममपूज्यश्चराजर्षिःकिन्नवेत्सितत् वैशं श्रुत्वातस्यास्ततोवाक्यंदेवयान्यब्रवीदिदं
राजन्नाद्येहवत्स्यामिविप्रियंमेकृतंत्वया।सहसोत्पतितांश्यामांदृष्ट्वातांसाश्रुलोचनां।त्वरितंसकाशंकाव्यस्यप्र

स्थितां व्यथितस्तदा।अनुवव्राजसंभ्रान्तः ह्रष्यतः सांत्वयन्नृपः।न्यवर्त्तत न चैवाथ क्रोधसंरक्तलोचना।अविब्रुवं
तीकिंचित्साराजानंवामलोचना।अचिरादिवसंप्राप्ता काव्यस्योशनसोंतिकं।सातुदृष्ट्वैवपितरमभिवाद्याग्रतः
स्थिता।अनंतरंययातिश्चपूजयामासभार्गवं देवयान्यु अधर्म्मेणजितोधर्म्मः प्रवृत्तमधरोत्तरं।शर्म्मि
ष्ठयातिवृत्तास्मिदुहित्रावृषपर्व्वणः।त्रयोऽस्यांजनिताःपुत्राराज्ञानेनययातिना।दुर्भगायाममद्वौतुपुत्रौतात
ब्रवीमिते।धर्मज्ञइतिविख्यातएषराजाभृगूद्वह।अतिक्रान्तश्चमर्यादांकाम्येतत्कथयामिते शुक्रउ
धर्म्मज्ञःसन्महाराजयोधर्म्ममकृथाःप्रियं।तस्माज्जरात्वामचिराद्धर्षयिष्यतिदुर्ज्जया ययातिरु
ऋतुंवैयाचमानायाभगवन्नान्यचेतसा।दुहितुर्द्दानवेंद्रस्यधर्म्यमेतत्कृतंमया।ऋतुंयोयाचमानायानददा
तिपुमानृतुं।भ्रूणहेत्युच्यतेब्रह्मन्सइहब्रह्मवादिभिः।अभिकामांस्त्रियंयश्चगम्यांरहसियाचितः।नोपैतिसह
धर्म्मेषुभ्रूणहेत्युच्यतेबुधैः।इत्येतानिसमीक्ष्याहंकारणानिभृगूद्वह।अधर्म्मभयसंविग्नःशर्म्मिष्ठामुपजग्मिवा
न्॥ शुक्रउ ॥नन्वहंप्रत्यवेक्ष्यस्तेमदधीनोसिपार्थिव।मिथ्याचारस्यधर्म्मेषुचौर्यंभवतिनाहुष वैशं
क्रुद्धेनोशनसाशप्तोययातिर्नाहुषोनृपः।पूर्व्वंवयःपरित्यज्यजरांसद्योन्वपद्यत ययातिरु अतृप्तोयौवन

स्याहंदेवयान्यांमृगृह्णहः।प्रसादंकुरुमेब्रह्मनजरेयंनविशेतमां   शुक्र उ   नाहंमिथ्याब्रवीम्येतज्जरांप्राप्नो॰
सिभूमिप।जरामेतांत्वमन्यस्मैसंक्रामययदीछसि   ययातिरु   राज्यभाक्सभवेब्रह्मपुण्यभाक्कीर्त्तिभाक्त॰
था।योमेदद्याद्वयःपुत्रस्तद्भवाननुमन्यतां   शुक्र उ   पुत्रोज्येष्ठःकनिष्ठोवायोददातिभयाद्वयः।संक्रामयि
ष्यसिजरांयथेष्टंनहुषात्मजः।मामनुध्यायभावेननचपापमवाप्स्यसि।वयोदास्यतितेपुत्रोयःसराजाभविष्यति।
आयुष्मान्कीर्त्तिमांश्चैवबह्वपत्यस्तथैवच॥   इत्यादिपर्व्वणिययाते   ८२   वैशं   जरांप्राप्यसरा
जर्षिःस्वपुरंप्राप्यचैवहि।पुत्रंज्येष्ठंवरिष्ठंचयदुमित्यब्रवीद्वचः।जरावलीचमांतातपलितानिचपर्य्यगुः।काव्यस्यो
शनसःशापान्नचतृप्तोस्मियौवने।त्वंयदोप्रतिपद्यस्वपाप्मानंजरयासह।यौवनेनत्वदीयेनचरेयंविषयानहं।
पूर्णेवर्षसहस्रेतुपुनर्दास्यामियौवनं।दत्वास्वंप्रतिपत्स्यामिपाप्मानंजरयासह   यदुरुवाच   जरायांवह
वोदोषाःपानभोजनवर्ज्जिताः।तस्माज्जरांनग्रहीष्येइतिमेरोचतेमनः।शितश्मश्रुधरोदीनोजरयाशिथिलीकृ
तः।वलीसंगतगात्रस्तुदुर्दर्शोदुर्ब्बलःकृशः।अशक्तःकार्यकारणेपरिमुक्तःसयौवनैः।सहोपजीविभिश्चैवतां
जरांनाभिकामये।संतितेवहवःपुत्रामत्तःप्रियतरानृप।जरांगृहीतुंधर्मज्ञतस्मादन्यंवृणीष्ववै॥ ययातिरु ॥

यस्त्वंमेहृदयाज्जातोवयःस्वंनप्रयच्छसि।तस्मादराज्यभाक्तातप्रजानवभविष्यति।तुर्वसोप्रतिपद्यस्वपाप्मा
नंजरयासह।यौयोवनेनचरेयंवैविषयांस्तवपुत्रक।पूर्णेवर्षसहस्रेवैपुनर्दास्यामियौवनं।दत्वास्वंप्रतिपत्स्या
मिपाप्मानंजरयासह तुर्वसुरुवाच नाहंजरांमिमांतातकामयेभोगनाशिनीं।बलरूपान्तकरणींबु
द्धिप्राणविनाशिनीं। ययातिरु यस्त्वंमेहृदयाज्जातोवयःस्वंनप्रयच्छसि।तस्मात्प्रजासमुच्छेदंतुर्वसोत
वयास्यति।संकीर्णाचारवर्णेषुप्रतिलोमचरेषुच।पिशिताशिषुगृह्येषुराजाचैवभविष्यसि।गुरुदारप्रसक्तेषुति
र्यग्योनिगतेषुच।पशुधर्मेषुपापेषुम्लेच्छेषुत्वंभविष्यसि वैशम् एवंचतुर्वसुंशप्त्वाययातिःसुतमात्म
नः।शर्मिष्ठायासुतंद्रुह्युमिदंवचनमब्रवीत् ययातिरुवाच द्रुह्योत्वंप्रतिपद्यस्ववर्णरूपविनाशिनीं।
जरांवर्षसहस्रंमेयौवनंस्वंददस्वच।पूर्णेवर्षसहस्रेतुनवंदास्यामियौवनं।स्वंचादास्याभिभूयोहंपाप्मानं
जरयासह॥ द्रुह्युरुवाच ॥नगजंनरथंनाश्वंजीर्णोभुंक्तेनचस्त्रियं।वाक्संगश्चास्यभवतितांजरांनाद्य
कामये ययातिरु यस्त्वंमेहृदयाज्जातोवयःस्वंनप्रयच्छसि।तस्माद्द्रुह्योप्रियःकामोनतेसंपत्स्यतेक्वचि
त्।यत्राश्वरथमुख्यानामश्वानांस्याद्गतंनच।हस्तिनांपीठकानांचगर्दभानांतथैवच।वस्त्राणांचगवांचैवशिवि

कानांतथैवचागुरुदुपप्लवसंतारोयत्रनित्यंभविष्यति। अराजभाजंशर्हंत्वंतत्रावाप्स्यसिमान्वयः॥ ययाति
रुवाच अनोत्वंप्रतिपद्यस्वपाप्मानंजरयासह। एकंवर्षसहस्रंतुचरेयंयौवनेनते अनुरुवाच ॥
जीर्णःशिशुवदादत्तेकालेन्नमशुचिर्यथा। नजुहोतिचकालेग्निंतांजरांनाभिकामये ययातिरु यस्त्वं
मेहृदयाज्जातोवयःस्वंनप्रयछसि। जरादोषस्त्वयाप्रोक्तःतस्मात्त्वंप्रतिलप्स्यसि। प्रजायौवनमप्राप्ताविनशि
ष्यत्यनोतव। अग्निप्रस्कंदनपरस्त्वंचाप्येवंभविष्यसि ययातिरु पूरोमेत्वंप्रियःपुत्रस्त्वंवरीयान्भ
विष्यसि। जरावलीचमांतातपलितानिचपर्यगुः। काव्यस्योशनसःशापान्नचतृप्तोस्मियौवने। पूरोत्वंप्रतिप
द्यस्वपाप्मानंजरयासह। कंचित्कालंचरेयंवैविषयान्वयसातव। पूर्णेवर्षसहस्रेतुनवदास्यामियौवनं। स्वंचैव
प्रतिपत्स्यामिपाप्मानंजरयासह॥ वैशं ॥ एवमुक्तःप्रत्युवाचपूरुःपितरमंजसा। यदात्थमांमहाराजतत्क
रिष्यामितेवचः। प्रतिपत्स्यामितेराजन्पाप्मानंजरयासह। गृहाणयौवनंमत्तश्चरकामान्यथेप्सितान्। जरया
हंप्रतिछन्नोवयोरूपधरस्तव। यौवनंभवतेदत्वाचरिष्यामियथात्थमां ययातिरु पूरोप्रीतोस्मितेवत्स
प्रीतश्चैवददानिते। सर्वकामसमृद्धातेप्रजाराज्येभविष्यति। एवमुक्त्वाययातिस्तुकाव्यंस्मृत्वामहातपाःस

क्रामयामासजरांतदापूरौमहात्मनि॥ वैशं ॥पौरवेणाथवयसाययातिर्नहुषात्मजः।प्रीतियुक्तो
नरश्रेष्ठश्चचारविषयान्स्वकान्॥यथाकामंयथोत्साहंयथाकालंयथासुखं।धर्म्माविरुद्धंराजेंद्रोयथा
र्हतिसएवहि।देवानतर्पयद्यज्ञैःश्राद्धैस्तद्वत्पितॄनपि।दीनाननुग्रहैरिष्टैःकामैश्चद्विजसत्तमान्॥अति
थीनन्नपानैश्चविशश्चपरिपालनैः।आनृशंस्येनशूद्रांश्चदस्यून्संनिग्रहेणच।धर्म्मेणचप्रजाःसर्वाय
थावदनुरंजयन्॥ययातिःपालयामाससाक्षादिंद्रइवापरः।सराजासिंहविक्रांतोयुवाविषयगोचरः।
अविरोधेनधर्म्मस्यचचारसुखमुत्तमं।ससंप्राप्यशुभान्कामान्तृप्तःखिन्नश्चपार्थिवः।कालंवर्षसह
स्रांतंसस्मारमनुजाधिपः।परिसंख्यायकालज्ञःकलाःकाष्ठाश्चवीर्यवान्॥पूर्णंमत्वाततःकालंपूरुं
पुत्रमुवाचह।यथाकालंयथोत्साहंयथाकाममरिंदम।सेविताविषयाःपुत्रयौवनेनमयातव॥नजा
तुकामःकामानामुपभोगेनशाम्यति।हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते।यत्पृथिव्यांव्रीहियवंहिरण्यं
पशवःस्त्रियः।एकस्यापिनपर्याप्तंतस्मात्तृष्णांपरित्यजेत्॥यादुस्त्यजादुर्म्मतिभिर्यानजीर्यतिजीर्यतः।या
सौप्राणांतिकोरोगस्तांतृष्णांत्यजतःसुखं।पूर्णंवर्षसहस्रंमेविषयासक्तचेतसः।तथाप्यनुदिनंतृष्णा

ममैतेह्यभिजायते।तस्मादेनामहंत्यक्त्वाब्रह्मण्याधायमानसं।निर्द्वंद्वोनिर्ममोभूत्वाचरिष्यामिमृगैः
सह।पूरोप्रीतोस्मिभद्रंतेगृहाणेदंस्वयौवनं।राज्यंचैवगृहाणेदंत्वंहिमेप्रियकृत्सुतः वैशं प्रति
पेदेजरांराजाययातिर्न्नाहुषस्तदा।यौवनंप्रतिपेदेचपूरुःस्वंपुनरात्मनः।अभिषेक्तुकामंतुनृपंपूरुंपुत्रं
कनीयसं।ब्राह्मणप्रमुखावर्णाइदंवचनमब्रुवन्।कथंशुक्रस्यनप्तारंदेवयान्याःसुतंप्रभो।ज्येष्ठंयदुंव्य
तिक्रम्यपूरोराज्यंप्रयच्छसि।यदुर्ज्येष्ठस्तवसुतोजातस्तमनुतुर्वसुः।शर्म्मिष्ठायाःसुतोद्रुह्युस्ततोनुःपू
रुरेवच।कथंज्येष्ठाननतिक्रम्यकनीयान्राज्यमर्हति।एतत्संबोधयामस्त्वांधर्म्मंत्वमनुपालय।धर्म्मंचो
ल्लंघ्ययत्राज्ञाप्रजानांदुःखमावहेत् ययातिरु ब्राह्मणप्रमुखावर्ण्णाःसर्वेशृणुतमेवचः।ज्येष्ठंप्र
तियथाराज्यंनदेयंमेकथंचनाममज्येष्ठेनयदुनानियोगोनानुपालितः।प्रतिकूलःपितुर्यश्चनसपुत्रःसतां
मतः।मातापित्रोर्वचनकृद्धितःपथ्यश्चयःसुतः।सपुत्रःपुत्रवद्यश्चवर्त्ततेपितृमातृषु।यदुनाहमवज्ञात
स्तथातुर्वसुनापिच।द्रुह्युनाचानुनाचैवमय्यवज्ञाभृशंकृता।पूरुणाचकृतंवाक्यंमानितश्चविशेषतः।क
नीयान्ममदायादोजरायेनधृतामम।सचकामोममकृतःपूरुणामित्ररूपिणा।शुक्रेणचवरोदत्तःकाव्ये

नोशनसास्त्वयं।पुत्रोयस्त्वानुवर्त्तेत सराजापृथिवीपतिः।भवतोनुनयाम्येवं पूरूराज्येभिषिच्यतां प्र
कृतयऊचाव यःपुत्रोगुणसंपन्नोमातापित्रोर्हितःसदा।सर्वमर्हतिकल्याणंकनीयानपिसप्रभो।अ
र्हःपूरुरिदंराज्यंयःप्रियःप्रियकृत्तव।वरदानेनशुक्रस्यनशक्यंवक्तुमुत्तरं वैशं पौरजानपदैस्तुष्टै
रित्युक्तोनाहुषस्तदा।अभ्यषिंचत्ततःपूरुंराज्येस्वसुतमात्मनः।दत्वाचपूरवेराज्यंवनवासायदीक्षितः।
पुरात्सनिर्ययौराजाब्राह्मणैस्तापसैर्वृतः।देवयान्याचसहितःशर्मिष्ठयाचभारत।अकरोत्सवनेराजा
सभार्यस्तपउत्तमं।यदोस्तुयादवाजातास्तुर्वसोर्यवनाःस्मृताः।द्रुह्योःसुतास्तुवैभोजाअनोस्तुम्लेछजा
तयः।पूरोस्तुपौरवोवंशोयत्रजातोसिपार्थिवः।इदंवर्षसहस्राणिराज्यंकारयितुंवशी इत्यादिपर्वणि
यायाते ७८ वैशं एवंसनाहुषोराजाययातिःपुत्रमीप्सितं।राज्येभिषिच्यमुदितोवानप्रस्थो
भवन्मुनिः।उषित्वाचवनेवासंब्राह्मणैःसंशितव्रतैः।फलमूलाशनोदांतोयथास्वर्गमितोगतः।सगतःस्व
र्निवासंतंनिवसन्मुदितःसुखं।कालस्यनातिमहतःपुनःशक्रेणपातितः।निपतन्सच्युतःस्वर्गादप्राप्तोम
दिनीतलं।स्थितआसीदंतरिक्षेसतदेतिश्रुतंमया।ततएवपुनश्चापिगतःस्वर्गमितिश्रुतिः।राज्ञावसुम

तासार्द्धमष्टकेनचवीर्यवान्॥ प्रतर्द्दनेनशिबिनासमेत्यकिलसंसदि जनमेजयउ कर्म्मणाकेन
सदिवंपुनःप्राप्तोमहीपतिः। सर्वमेतदशेषेणश्रोतुमिच्छामितत्वतः। कथ्यमानंत्वयाविप्रविप्रर्षिगणसन्नि
धौ। देवराजसमोह्यासीद्ययातिःपृथिवीपतिः। वर्द्धनःसोमवंशस्यविभावसुसमद्युतिः। तस्यविस्तीर्णय
शसःसत्यकीर्त्तेर्महात्मनः। चरितंश्रोतुमिच्छामिदिविचेहचसर्वशः॥ वैशं ॥ हंततेकथयिष्यामिय
यातेरुत्तमांकथां। दिविचेहचपुण्यार्थांसर्वपापप्रमोचनीं। ययातिर्नाहुषोराजापूरुंपुत्रंकनीयसं। राज्ये
भिषिच्यमुदितःप्रवव्राजवनंतदा। अंत्येषुचविनिक्षिप्यपुत्रान्यदुपुरोगमान्। फलमूलाशनोराजासवने
न्यवसच्चिरं। संशितात्माजितक्रोधस्तर्पयन्पितृदेवताः। अग्नींश्चविधिवज्जुह्वन्वानप्रस्थविधानतः। अ
तिथिंपूजयन्नित्यंवन्येनहविषानृपः। शिलोंछवृत्तिमास्थायशेषान्नकृतभोजनः। पूर्णंवर्षसहस्रंसएवंवृ
त्तिरभून्नृपः। अब्भक्षःशरदस्त्रिंशदासीन्नियतवाङ्मनाः। ततश्चवायुभक्षोभूत्संवत्सरमतंद्रितः। पंचाग्निमध्ये
सन्नृपस्तपस्तेपेचवत्सरं। एकपादस्थितश्चासीत्षण्मासाननिलाशनः। पुण्यकीर्त्तिस्ततःस्वर्गंजगामावृत्य
रोदसी इत्यादिपर्व्वणिपुनरयायाते ८२ वैशं स्वर्गतःसतुराजेंद्रोनिवसद्देवसन्निधौ। पू

बितंल कृप्यग्हने ॐ ॐ: पतिन्यादारं [illegible] लिलो [illegible] वृतिर्यस्य ४

जितस्त्रिदशैःसाध्यैर्मरुद्भिःवसुभिस्तथा।देवलोकाद्ब्रह्मलोकंसंचरन्पुण्यकृद्वशी।रेमेसपृथिवीपालोदीर्घका
लमितिश्रुतिः।सकदाचिन्नृपश्रेष्ठोययातिःशक्रमागमत्।कथांतेतत्रशक्रेणसपृष्टःपृथिवीपतिः॥ शक्रउ
वाच॥ यदासपूरुस्तवरूपेणराजन्जरांगृहीत्वाप्रचचारभूमौ।तदास्वराज्यंसंप्रदायैवतस्मैत्वयाकिमुक्तः
कथयेहसत्यं॥ ययातिरु॥ गंगायमुनयोर्मध्येकृत्स्नोयंविषयस्तव।मध्येपृथिव्यास्त्वंराजाभ्रातरोन्त्याधि
पास्तव।अक्रोधनःक्रोधनेभ्योविशिष्टस्तथातितिक्षुरतितिक्षोर्विशिष्टः।अमानुषेभ्योमानुषाश्चप्रधानंवि
द्वांस्तथैवाविदुषःप्रधानं।आक्रुश्यमानोनाक्रोशेतमन्युरेवतितिक्षतः।आक्रोष्टारंनिर्दहतिसुकृतंचास्यविं
दति।नारुंतुदःस्यान्ननृशंसवादीनहीनतःपरमभ्याददीत।ययास्यवाचापरउद्विजेतनतांवदेद्दुःखतींपाप
लोक्यां।अरुंतुदंपुरुषंतुतीक्ष्णंवाक्कंटकैर्वितुदंतंमनुष्यान्।विद्यादलक्ष्मीकतमंजनानांमुखेनिबद्धांनिर्ऋति
किंवहंतं॥सद्भिःपुरस्तादपिपूजितःस्यात्सद्भिस्तथापृष्ठतोरक्षितःस्यात्।सदासतामतिवादांस्तितिक्षेत्सतांवृत्तं
चाददीतार्यवृत्तः।वाक्सायकावदनान्निःपतंतियैराहतःशोचतिरात्र्यहानि।परस्यनामर्मसुतेपतंतितान्पंडि
तोनावसृजेत्परेषु॥नहीदृशंसंवननंत्रिषुलोकेषुविद्यते।दयाचमैत्रीभूतेषुदानंचमधुराचवाक्।तस्मात्सां

अकल्यानी०५
अतघ्नी०४

त्वंसदावाच्यंनवाच्यंपरुषंक्कचित्।पूज्यान्संपूजयेन्नित्यंनयाचेतकदाचन इंद्रउवाच सर्वाणिकार्य्या
णिसमाप्यराजन्गृहान्परित्यज्यवनंगतोसि।तत्वांपृछामिनहुषस्यपुत्रकेनासितुल्यस्तपसाययाते य
यातिरु नाहंदेवमनुष्येषुनगंधर्वमहर्षिषु।आत्मनस्तपसातुल्यमन्यंपश्यामिवासव इंद्रउवाच
यदावमंस्थाःसदृशान्श्रेयसश्चपापीयसश्चाविदितप्रभावः।तस्माल्लोकास्त्वंतवंतस्तवेमेक्षीणेपुण्येपतिता
तास्यद्यराजन् ययातिरु सुरर्षिगंधर्वनरावमानात्क्षयंगतामेयदिशक्रलोकाः।इछेयंवैसुरलो
काद्विहीनःसतांमध्येपतितुंदेवराज इंद्रउ सतांसकाशेपतितासिराजंश्च्युतःप्रतिष्ठांयत्रलब्धासिभू
यः।एवंविदित्वाचपुनर्ययातेनतेवमान्याःसदृशाःश्रेयसश्च॥ वैशं ॥ततःप्रहायामरराजजुष्टान्पुण्यांल्लो
कान्पतमानेययातिं।संप्रेक्ष्यराजर्षिवरोष्टकस्तमुवाचसद्धर्मविधानगोप्ता अष्टकउ कस्त्वंयुवावास
वतुल्यरूपःस्वतेजसादीप्यमानोयथाग्निः।पतस्युदीर्णांबुधरांधकारात्खात्खेचराणांप्रवरोयथार्कः।दृष्ट्वा
चत्वांसूर्यपथात्पतंतंवैश्वानरार्कद्युतिमप्रमेयं।किंनुस्विदेतत्पततीतिसर्वेवितर्कयंतःपरिमोहिताःस्मः।दृ
ष्ट्वाचत्वांधिष्ठितंदेवमार्गेशक्राग्निविष्णुप्रतिमप्रभावं।अभ्युद्गतास्त्वांवयमद्यसर्वेतत्वंप्रयातेतवजिज्ञासमानाः।

नचापित्वांधृष्णवःप्रष्टुमग्रेनचत्वमस्मान्पृच्छसियेवयंस्मः।तत्त्वाँमस्पृहणीयरूपंकस्माल्लोकात्किंनिमि
त्तंत्वमागाः।भयंचतेव्येतुविषादमोहौत्यजाशुचैवेंद्रसमानरूपः।त्वांवर्त्तमानंहिसतांसकाशेनालंप्रशोढुंवल
हापिशक्रः।संतःप्रतिष्ठाहिसुखच्युतानांसतांसदैवामरराजकल्पः।तेसंगताःस्थावरजंगमेशाःप्रतिष्ठितस्त्वं
सदृशेषुसत्सु॥प्रभुरग्निःप्रतपनेभूमिरावपनेप्रभुः।प्रभुःसूर्य्यःप्रकाशित्वेसतांचाभ्यागतःप्रभुः॥ ॥
इत्यादिपर्व्वणियायाते ८४ ययातिरु अहंययातिर्नहुषस्यपुत्रःपूरोःपितासर्व्वभूतावमानात्।
प्रभ्रंशितःसुरसिद्धर्षिलोकात्परिच्युतःप्रपताम्यल्पपुण्यः।अहंहिपूर्व्वोवयसाभवद्भ्यस्तेनाभिवादंभवतां
नयुंजे।योविद्ययातपसाजन्मनावावृद्धःसंपूज्योभवतिद्विजानाम् ययातिरु प्रतिकूलंकर्म्मणांपाप
माहुस्तद्वर्त्ततेप्रवणेपापलोक्यम्।सन्तोऽसतांनानुवर्त्ततेचैवयथाचैषामनुकूलस्तथासन्।अभूद्धनंमेविपु
लंगतंतद्विचेष्टमानोनाभिगंतातदस्मि।एवंप्रधार्य्यात्महितेनिविष्टोयोवर्त्ततेसविजानातिजीवन्।नानाभावा
वहवोजीवलोकेदैवाधीनानष्टचेष्टाधिकाराः।तत्तत्प्राप्यनविहन्येतधीरोदिष्टंबलीयइतिमत्वात्मबुध्या।सुखं
हिजंतुर्यदिवापिदुःखंदैवाधीनोविंदतेनात्मशक्त्या।तस्माद्दिष्टंबलवन्मन्यमानोनसंज्वरेनापिहृष्येत्कदाचि

म

অশ্রবনেস্যামেনো বিরোধিনি ৪ শাপেন বকং নাক্রোষস্যতুষ্ঠা ৪ প্রতিনিষিদ্ধং কর্ম্ম পাপমাহুঃ
অসতামেতল্লোপং কর্ম্মমন্তানাহুবর্ত্তন্তি নাবতিষ্ঠতি ৪ এষাং পাপানাং যথা অবস্থানং গুরুনির্দেশকঃ সন্ মত্বেমন্ত্রোভবতি ৪

ता। दुःखेन तप्येन्न सुखेन प्रहृष्येत् समेन वर्त्तेत सदैव धीरः। दिष्टं बलीय इति मन्यमानो न संज्वरेन्नापि हृष्येत् कदाचि-
त्। भयेन मुह्याम्यष्टकाहं कदाचित् संतापो मे मानसो नास्ति कश्चित्। धाता यथा मां विदधाति लोके ध्रुवं तथा-
हं भवितेति मत्वा। संस्वेदजा अंडजा उद्भिज्जाश्च सरीसृपाः कृमयोऽथाप्सु मत्स्याः। तथाश्मानस्तृणकाष्ठं च सर्वं
दिष्टक्षये स्वां प्रकृतिं भजंते। अनित्यतां सुखदुःखस्य बुद्ध्वा कस्मात् संतापमष्टकाहं भजेयं। किं कुर्यां वै किं च कृत्वा
न तप्ये तस्मात् संतापं वर्जयाम्यप्रमत्तः वैशं एवं ब्रुवाणं नृपतिं ययातिमथाष्टकः पुनरेवान्वपृछत्। मा-
तामहं सर्वगुणोपपन्नं तत्र स्थितं स्वर्गलोके यथावत्॥ अष्टक उ ॥ ये ये लोकाः पार्थिवेंद्र प्रधानास्त्वया भु-
५१
क्ताः पंचकालं यथावत्। तान्मे राजन् ब्रूहि सर्वान् यथावत् क्षेत्रज्ञवद्भाषसे त्वं हि धर्म्मान्॥ ययातिरु॥ राजाह-
मासमिह सार्वभौमस्ततो लोकान्महतश्चाजयं वै। तत्रावसं वर्षसहस्रमात्रं ततो लोकं परमस्म्यभ्युपेतः। ततो दि-
व्यमजरं प्राप्य लोकं प्रजापतेर्लोकपतेर्दुरापं। तत्रावसं वर्षसहस्रमात्रं ततो लोकं परमस्म्यभ्युपेतः। स देवदेवस्य
निवेसने च विजित्य लोकानवसं यथेष्टं। संपूज्यमानस्त्रिदशैः समस्तैस्तुल्यप्रभावद्युतिरीश्वराणां। तत्रावसं नंद-
ने कामरूपी संवत्सराणामयुतं शतानां। सहाप्सरोभिर्विहरन् पुण्यगंधान् पश्यन्नगान् पुष्पितांश्चारुरूपान्। तत्रस्थं

आ०प०
१४०

मांदेवसुखेषुसक्तंकालेतीतेमहतिततोतिमात्रं।दूतोदेवानामब्रवीदुग्ररूपोध्वंसेत्युच्चैस्त्रिःप्लुतेनस्वरेण।ए
तावन्मेविदितंराजसिंहततोभ्रष्टोहंनंदनात्क्षीणपुण्यः।वाचोश्रौषंचांतरिक्षेसुराणांसानुक्रोशाःशोचतांमा
नवेंद्र।अहोःकष्टंक्षीणपुण्योययातिःपतत्यसौपुण्यकृत्पुण्यकीर्त्तिः।तानब्रुवंपतमानस्ततोहंसतांमध्ये
निपतेयंकथंनु।तैराख्याताभवतांयज्ञभूमिःसमीक्ष्येमांत्वरितमुपागतोस्मि।हविर्गंधंदेशिकंयज्ञभूमेर्धू
मापांगंप्रतिगृह्यप्रतीतः इत्यादिपर्वणिउत्तरयायाते ८५ अष्टकउ यदावसोनंदनेका
मरूपीसंवत्सराणामयुतंशतानां॥किंकारणंकार्त्तयुगप्रधानहित्वातत्त्वंवसुधामन्वपद्यः ययातिरु
ज्ञातिःसुहृत्स्वजनोयोयथेहक्षीणेवित्तेत्यज्यतेमानवैर्हि।तथातत्रक्षीणपुण्यंमनुष्यंत्यजंतिसद्यःखेचरादे
वसंघाः अष्टकउ तस्मिन्कथंक्षीणपुण्याभवंतिसंमुह्यतेमेत्रमनोतिमात्रं।किंवावसिष्ठाःकस्यधामो १४०
पयांतितद्वैब्रूहिक्षेत्रवित्त्वंमतोमे ययातिरु इमंभौमंनरकंतेपतंतिलालप्यमानानरदेवसर्वे।तेकं
कगोमायुबलाशनार्थंक्षीणाविवृद्धिंबहुधाव्रजंति।तस्मादेतद्वर्जनीयंनरेणदुष्टंलोकेगर्हणीयंचकर्म्म।आ
ख्यातंतेपार्थिवःसर्वमेतद्भूयश्चेदानींवदकिंतेवदामि अष्टकउ यदातुतान्वितुदंतेवयांसितथागृध्राः

ज मंत्रमिष्टंनवकं ३ ज्ञानेत्रि मर्त्यानर्थीश्चानार्थीः बाळबाळवानु ३

अजुति ४ कथं किं प्रकाश: ४
भाग्दवितुकेन प्रकारेन कर्म्मा च भवंति ४

त्रीतिकंगाः पतंगाः। कथं भवंति कथमाभवंति न भौममेतं नरकं शृणोमि ॥ ययातिरु ॥ ऊर्द्ध्वं देहात्कर्म्मणो
जृंभमाणाः घ्यक्तं पृथिव्यामनुसंचरंति। इमं भौमं नरकं ते पतंति नावेक्षंते वर्षपूगाननेकान्। षष्टिं सहस्राणि प
तंति व्योम्नि तथाशीतिं च परिवत्सराणि। तान्वै रुदंति प्रपततः प्रपातं भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः॥ अ
ष्टकरु ॥ यदेनमस्ते पततस्तुदंति भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः। कथं भवंति कथमाभवंति कथं भूता ग
र्भभूता भवंति ॥ ययातिरु ॥ अस्रं रेतः पुष्पफलानुपृक्तमन्वेति तद्वै पुरुषेण सृष्टं। स वै तस्या रज आपद्यते
वै स गर्भभूतः समुपैति तत्र। वनस्पतीनोषधीश्चाविशंति अपो वायुं पृथिवीमंतरिक्षं। चतुष्पदं द्विपदं चापि
सर्वमेवंभूता गर्भभूता भवंति॥ अष्टकरु ॥ अन्यद्वपुर्विदधातीह गर्भमुताहोस्वित्स्वेन कायेन याति।
आपद्यमानो नरयोनिमेतामाचक्ष्व मे संशयात्प्रब्रवीमि। शरीरभेदाभिसमुच्छ्रयं च चक्षुः श्रोत्रे लभते केन सं
ज्ञां। यतत्त्वं सर्वमाचक्ष्व पृष्टः क्षेत्रज्ञं त्वां तात मन्याम सर्वे ॥ ययातिरु ॥ वायुः समुत्कर्षति गर्भयोनावृ
तौ रेतः पुष्पफलानुपृक्तं। स तत्र तन्मात्रकृताधिकारः क्रमेण संवर्द्धयतीह गर्भं। स जायमानो विगृहीतगात्रः
संज्ञामधिष्ठाय ततो मनुष्यः। स श्रोत्राभ्यां वेदयतीह शब्दं सर्वं रूपं पश्यति चक्षुषा च। घ्राणेन गंधं जिह्वयाथो

नभं १

रसंचत्वचास्पर्शंमनसावेदभावं॥इत्यष्टकेहोपचितिंहिविद्धिमहात्मनःप्राणभृतःशरीरे अष्टकउ ॥
यःसंस्थितःपुरुषोदह्यतेवानिखन्यतेवापिनिकृष्यतेवा।अभावभूतःसविनाशमेत्यकेनात्मानंचेतयतेपु
रस्तात्॥ ययातिरु ॥हित्वासोसूनसुप्तवद्वेष्टयित्वापुरोविधायसुकृतंदुष्कृतंवा।अन्यांयोनिंपवनाग्रा
नुसारीहित्वादेहंभजतेराजसिंह।पुण्यांयोनिंपुण्यकृतोव्रजंतिपापांयोनिंपापकृतस्तथैव।कीटाःपतंगाश्च
भवंतिपापानमेविवक्षास्तिमहानुभावः।चतुष्पदाद्विपदाषट्पदाश्चतथाभूतागर्भभूताभवंति।आख्यातमे
तन्निखिलेनसर्वंभूयस्तुकिंपृच्छसिराजसिंह· अष्टकउ किंस्वित्कृत्वालभतेतातलोकान्मर्त्यःश्रेष्ठां
स्तपसाविद्ययावा।तन्मेपृष्टःशंससर्वंयथावच्छुभान्लोकान्येनगच्छेत्क्रमेण ययातिरु तपश्चदानंच
शमोदमश्चह्रीरार्जवंसर्वभूतानुकंपा।स्वर्गस्यलोकस्यवदंतिसंतोद्वाराणिसप्तैवमहांतिपुंसां।नश्यंतिमा
नेनंतमोभिभूताःपुंसःसदैतेप्रवदंतिसंतः।सूर्यस्यलोकस्यवदंतिसंतोद्वाराण्यथैतान्यभयंकराणि॥
अधीयानःपंडितंमन्यमानोयोविद्ययाहंतियशःपरस्य।तस्यांतवंतश्चभवंतिलोकानचास्यतद्ब्रह्मफलंददा
ति।चत्वारिकर्माण्यभयंकराणिभयंप्रयच्छंत्ययथाकृतानि।मानाग्निहोत्रमुतमानमौनंमानेनाधीतमुतमा

मा